சிவரகசியம்

அம்சம் - 9

PART - I

தஞ்சாவூர் மகாராஜா சரபோஜியின்

சரசுவதி மகால் நூலகம்

தஞ்சாவூர்.

தஞ்சாவூர் சரசுவதி மகால் வெளியீட்டு எண் : 510

ஸ்ரீ:

।। शिवरहस्यम् ।।

சிவரஹஸ்யம்

(ஒன்பதாவது அம்சம்)

PART-I

பதிப்பாசிரியர்

தேதியூர். எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்,
முன்னாள் மேநிலை ஸம்ஸ்கிருத பண்டிட்,
சரசுவதி மகால் நூலகம், தஞ்சாவூர்.

தஞ்சாவூர் மகாராஜா சரபோஜியின்
சரசுவதி மகால் நூலகம்
தஞ்சாவூர்

சிவரகசியம் அம்சம்-9 தொகுதி-1

2007

0510

T.M.S.S.M-2016

விலை : ரூ. 150-00

நூற்பதிப்பு விளக்கக் குறிப்பு

நூற்பெயர்	:	சிவரஹஸ்யம் (ஒன்பதாம் அம்சம் - **PART-I**)
பதிப்பாசிரியர்	:	எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்
வெளியிடுபவர்	:	இயக்குநர், சரசுவதி மகால் நூலகம்
வெளியீட்டு எண்	:	510
மொழி	:	ஸம்ஸ்கிருதம்
பதிப்பு	:	முதற்பதிப்பு
வெளியீட்டு நாள்	:	அக்டோபர், 2007
தாள்	:	TNPL 18.6 kgs.
நூல் அளவு	:	21 x 14 c. m.
பக்கங்கள்	:	232
படிகள்	:	250
எழுத்து	:	16 & 12
அச்சிட்டோர்	:	சரசுவதி மகால் நூலகம்
புத்தகக்கட்டு	:	மெலிந்த அட்டை
பொருள்	:	சிவ தத்துவம்
விலை	:	ரூ. 150-00

வெளியீட்டாளர் முகவுரை

தஞ்சையில் அமைந்து தரணி முழுமைக்கும் பயன்பட்டுக் கொண்டிருக்கும் அரும்பெரும் நிறுவனம் சரசுவதி மகால் நூலகமாகும். சுவடிக் கருவூலமாகவும், பன்மொழி நூற்களஞ்சியமாகவும், பன்மொழி ஆய்வு மையமாகவும் திகழும் சரசுவதி மகால் நூலகம் ஆற்றிவரும் தொண்டு அளப்பரியது.

இந்நூலகம் தமிழகத்தினர் மட்டுமின்றிப் பிற மாநிலத்தவரும், பிற நாட்டினரும் பயன்படுத்தி வருகின்ற ஓர் அரிய ஞான ஆலயமாகும். பாரதநாடு பழம்பெரும் நாடு. உலகின் மிகச்சிறந்த நாகரிகத்திற்கும், பண்பாட்டிற்கும், மொழி வளத்திற்கும், இலக்கிய, இலக்கண மேம்பாட்டிற்கும், இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிடம் போன்ற நுண் கலைகளுக்கும் மெச்சும் அறிவிற்கும் மேதினியினில் உயர்நாடு.மதச்சார்பின்மை, சமயச் சுதந்திரம் போன்றவற்றால் வேற்றுமையில் ஒற்றுமை காணும் ஒரு நாடு நம்நாடு. இமய முதல் குமரிவரை சைவநெறி தழைத்து பரவியது எனினும் தமிழகத்தில் சைவ ஒளி பரவி நாயன்மார்கள், தோன்றி சைவநெறி வளர்த்தனர். சைவநெறி அன்பு, அறம், விருந்தோம்பல், பணிவு போன்ற வாழ்வியல் நெறிகளைக் கூறுவது.

பதினென் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் சிவரகசியம் எனும் பகுதியில் சிவ தத்துவங்களும், சைவ சமயச் சிறப்புகளும் கூறப்படுகின்றன. இதேபோன்று சமஸ்கிருத மொழியில் அமைந்த சிவரகசியம் நூலும் சிவ தத்துவம் பற்றிக் கூறுவதாகும். இதன் ஆசிரியர் பெயர் அறியக் கிடைத்திலது. ஒரு இலச்சத்து இருபதினாயிரம் சுலோகங்கள் கொண்ட இந்நூல் நம் சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைத்துள்ளது. சிவபெருமானின் பன்னிரண்டு பெயர்களைக் கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) பகுக்கப்பட்டுள்ளது இந்நூல். இந்நூலின் ஒவ்வொரு பகுதியிலும் இலக்கியச் செறிவோடு சிவ தத்துவங்கள் கூறப்படுகின்றன.

1971ஆம் ஆண்டில் நமது நூலகம் திரு. சுவாமிநாத ஆத்ரேயர் எனும் சமஸ்கிருத அறிஞரைப் பதிப்பாசிரியராகக் கொண்டு 3, 4, 5, 6 அம்சங்களைப் பதிப்பித்து வெளியிட்டது. இந்நூலக முன்னாள்

சமஸ்கிருதப் பண்டிட் திரு. எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களைப் பதிப்பாசிரியராகக் கொண்டு 1992ல் முதல் அம்சமும், 1996ல் 7வது அம்சத்தில் முதல் தொகுதியும், பின்னர் எஞ்சிய மூன்று தொகுதிகளும் எட்டாவது அம்சமும் வெளியிடப்பட்டுள்ளன. தற்போது இதே பண்டிட்டைப் பதிப்பாசிரியராகக் கொண்டு ஒன்பதாவது அம்சம் வெளியிடப் படுகிறது.

இப்பொழுது வெளியிடப்படும் இந்த ஒன்பதாவது அம்சத்தில் உள்ள 65 அத்தியாயங்கள் உள்ளன. இவற்றில் கந்தப்பெருமான் ஜைகீஷவ்ய முனிவர் உள்பட பல முனிவர்களுக்குச் சிவ தத்துவ ரகசியக் கருத்துக்களை கூறுவதும், திருவாரூரின் சிறப்பினைக் கூறும்முகமாக கமலாம்பிகை சிவபெருமானைக் குறித்துத்தவம் செய்தமை பற்றியும், திருநீலகண்டர், கண்ணப்பர் சிவபக்தியும், திருநாவுக்கரசர், திருஞானசம்பந்தர், அப்பூதியடிகள் முதலான சைவ சமயக்குரவர்களின் வரலாறுகள் பற்றியும், சில விரிவாகவும் சில சுருக்கமாகவும் கூறப்பட்டுள்ளது பாராட்டும் வகையில் அமைந்துள்ளன.

இந்நூல் வெளிவர நிதி உதவி நல்கிய நடுவண் அரசுக்கும், நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூல் கணினி அச்சில் வெளிவர, கணினி பிரிவில் பணிபுரிந்த ஏனையோருக்கும் என் பாராட்டுதல்களைத் தெரிவித்துக்கொள்கிறேன்.

சா. விஜயராஜ் குமார், இ. ஆ. ப.
மாவட்ட ஆட்சித்தலைவர்
மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்
4-10-07

உ

சிவமயம்

முன்னுரை

உலகின் பிற நாடுகளில் நாகரிகமும், நெறிமுறைகளும் மலராமல் அறியாமை இருள்சூழ்ந்திருந்த காலத்திலும் **கர்மபூமி** எனப்படும் பாரதநாடு - முதிர்ந்த நாகரிகச் சிறப்புடனும், பண்பாடு, நெறிமுறை, மொழியறிவு, இலக்கிய அறிவு, இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிட வடிவமைப்புத்திறன் போன்ற கலையறிவு - இறையுணர்வு இன்னபிறச் சிறப்புக்களுடனும் சிறப்புற்றிருந்தது என்பது யாவரும் அறிந்ததே.

வேத நெறிகளிலும், இறை வழிபாட்டிலும், உலகின் பிற நாடுகளுக்கு காலங்காலமாகவே நம்நாடு வழிகாட்டியாக இருந்துவந்திருக்கிறது. நம் நாட்டில் உள்ளதுபோன்ற - விரிவான - நுட்பமான சமயச் சுதந்திரம் உலகில் வேறு எந்த சமயத்திலும் இல்லை. பாரதத்தில் இமயம் முதல் குமரிவரை சைவநெறி பரந்துள்ளதெனினும் தென்னாட்டில் அதுவும் தமிழகத்தில் சைவநெறி தழைத்ததுபோல் வேறெங்கிலும் சிறப்புடன் விளங்கவில்லை எனலாம். "தென்னாடுடை சிவனே போற்றி" என்ற வழக்கும் இதனை உறுதிசெய்கின்றது. சைவம் வளர்த்த அறுபத்துமூன்று சமயக்குரவர்கள் தோன்றிய தமிழகத்தில்தான் சைவ ஆகமங்களும் - அவ்வழிவந்த பூசை முறைகளும் இன்றளவும் தழைத்து விளங்குவதாகும். சைவ சமயச் சிறப்புப்பற்றி சிவாகமங்களும், சிவபுராணம், கந்தபுராணம், திருமுறைகள் முதலானவை எழுதாக்கிளவி எனப்படும் வேதங்கள்போல் உலகுள்ளளவும் நிலைத்திருப்பவையாகும்.

சைவ சமயச் சிறப்புப்பற்றி பதினெட்டுப் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் சிவரஹஸ்யம் என்ற பகுதி விரிவாகக் கூறுவதாகும். இதேபோன்று ஸம்ஸ்க்ருத மொழியில் அமையப்பெற்ற சிவரஹஸ்யம் எனும் மாபெரும் தனி நூலும் சிவ தத்துவம்பற்றி விரிவாகக் கூறுவதாகும். இதன் ஆசிரியர் யார் என்று நூலில் எவ்விடத்திலும் கூறப்படவில்லை.

ஒரு லக்ஷம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட மாபெரும் இதிஹாஸமான மஹாபாரதம் பற்றிய ஒரு பழமொழி உண்டு. இந்த நூலில் கூறப்படும் தர்ம தத்துவங்கள். ரஹஸ்யங்கள் பலவும் பிறநூல்களில் காணப்படலாம். ஆனால் இதில் (மஹாபாரதத்தில்) காணப்படாத (கூறப்படாத) தர்ம ரஹஸ்யம் எதுவும் பிற நூல்களில் இருப்பதற்கில்லை என்ற கருத்துள்ள,

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"

எனும் வாக்கின்படி இந்த நூல் முழுவதிலும் சைவநெறி சம்பந்தமான உயர்ந்த கருத்துக்கள் பலவும் சிறப்பாகக் கூறப்பட்டுள்ளன. ஒரு லக்ஷத்தி இருபதினாயிரம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட இந்நூல் நமது சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைக்கக்கூடியதாகும்.

சிவபெருமானின் பன்னிரண்டு பெயர்களைக்கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) இந்நூல் பிரிக்கப்பட்டுள்ளது. 1. மாஹேச்வர, 2. பவ, 3. ஹர, 4. சிவ, 5. பர்க, 6. சங்கர, 7. உக்ர, 8. பீம, 9. சதாசிவ, 10. ஈச்வர, 11. மஹாதேவ, 12. ஈச என்ற பெயர்களுடன் 12 பகுதிகளாக உள்ள இந்த நூலின் ஒவ்வொரு பகுதியிலும் சிவதத்துவங்கள் மிக அழகிய பலவித சந்தங்களுடன் - இலக்கிய நயம், சொல் நயமுடனும் விளங்கும் ஸம்ஸ்க்ருத ச்லோகங்களால் விளக்கப் படுகின்றன.

இந்த நூல் முதல் இரண்டு பாகங்கள் (மாஹேச்வர பவ எனும் அம்சங்கள்) மட்டும் 1913-ம் ஆண்டில் சென்னையைச் சேர்ந்த செல்வந்தரும், சிவநெறிச் செம்மலுமாக விளங்கிய சதாசிவ செட்டியார் என்ற அன்பரால் வெளியிடப்பட்டுள்ளன. அவைகளும் இந்நாட்களில் கிடைப்பதற்கு அரிதாகவுள்ளன.

கடந்த 1971-ம் ஆண்டில் நமது நூலகத்தில் அச்சிட்டு வெளியிடப்பட்ட 3, 4, 5, 6 அம்சங்கள் தஞ்சை ஸ்ரீஸ்வாமிநாத ஆத்ரேயர் எனும் ஸம்ஸ்க்ருத பேராசிரியர் அவர்களால் சிறந்த முறையில் பதிப்பிக்கப்பட்டுள்ளன.

மீதமுள்ள பகுதிகளை (7 முதல் 12 முடியவுள்ளவை)ப் பதிப்பிக்கும் பணி 1991-ல் முன்னாள் மாவட்ட ஆட்சியரும், நூலக இயக்குநருமான திரு. சண்முகராஜேச்வரன், இ. ஆ. ப., அவர்களால் எனக்களிக்கப்பட்டது. பிழைகளைத் திருத்தம் செய்து பதிப்பிக்கும் பணி அதுமுதல் இரண்டு ஆண்டுகளில் முடிக்கப்பட்டது.

முதல் அம்சத்தில் - சிவபெருமானைக் குறித்துக் கடும் தவம்செய்த **ஜைகீஷவ்ய முனிவர்** சிவனருள்பெற்று கந்தப் பெருமானை சேவித்தல், சிவநெறிகள்பற்றி பார்வதிதேவியிடம் சிவபெருமான் அருளிச்செய்ததை உடனிருந்து செவியுற்ற கந்தப்பெருமானிடம் சிவதத்துவம்பற்றி விரிவாகக் கூறும்படி ஜைகீஷவ்யர் வேண்டுதல் - நந்திகேச்வரர், ப்ருங்கி முதலான சிவகணத்தைச் சேர்ந்தோரும் திருமால் முதலான தேவர்களும் முனிவர்களும் அடங்கிய அவையில் கந்தப்பெருமான் சிவரஹஸ்யக் கருத்துக்களைக் கூறுதல், ஸத்யோஜாதம் - வாமதேவம், அகோரம் - தத்புருஷன், ஈசானன் எனும் பஞ்சப்ரம்மங்கள் செய்த சிவஸ்துதி - கைலாய வருணனை முதலான கருத்துக்களும்,

இரண்டாம் அம்சத்தில் - பார்வதிதேவி தவமியற்றுதல், சிவபெருமான் அருள்புரிதல், சிவகைலாயம் போன்று பராசக்திக்கென ***சிந்தாமணி த்வீபம்*** அமைத்தல், பராசக்தியின்

தனி வாசஸ்தலமாக அமைக்கப்பட்ட சிந்தாமணி த்வீப வருணனை, துர்வாஸ முனிவரின் தவம், சக்தி தத்துவ விளக்கம் ஆகியவையும்,

மூன்றாவது அம்சத்தில் – காயத்ரீயின் தவம், சிவ வழிபாட்டின் சிறப்பு, மேரு மலையின் சிறப்பு, வில்வமரத்தின் பெருமை, சிவபூஜை மகிமை பற்றியும்,

நான்காவது அம்சத்தில் – நந்திகேச்வரர், சண்டேசப் பெருமான், ப்ருங்கி, மார்க்கண்டேயர், அகஸ்தியர் முதலானோருக்கு சிவபெருமான் அருள்புரிதல்.

ஐந்தாவது அம்சத்தில் – கேதாரேச்வர, ஓங்காரேச்வர, வைத்தியநாதம், குஸ்ருணேச்வர, நாகநாத, மஹாகால, பீம, த்ரியம்பகேச்வர, விச்வநாத, ஸ்ரீசைல, கோகர்ண, ராமேச்வர எனும் தலங்களில் உள்ள பன்னிரண்டு ஜோதிர்லிங்க வருணனைகளும்,

ஆறாவது அம்சத்தில் – மஹாபாரதத்தில் பகவத்கீதை போன்று வேதாந்த உபநிடதக் கருத்துக்களடங்கிய ருபு கீதையும் கூறப்பட்டுள்ளன.

ஏழாவது அம்சத்தில் – சிவஸஹஸ்ர நாமத்தின் சிறப்பு காசித்தலச்சிறப்பு, புஷ்பதந்தன் எனும் கந்தர்வன் சிவெபருமானைக் குறித்துக் கடுந்தவம் செய்தது, அவர் இயற்றிய "**சிவமஹிம்ன ஸ்தோத்ரம்**" எனும் துதிச்சிறப்பு, சிவபூஜை செய்யும்முறை, காளஹஸ்தித் தலச்சிறப்பு, வேடன் (கண்ணப்பன்) செய்த விநோதமான சிவபூஜையால் அவன் சிறப்புற்றது, சிவாலயத்தில் பிரதக்ஷிணம் செய்யும்முறை, குளிர் காலத்தில் சிவலிங்கத்திற்கு உறைந்த நெய் கொண்டு போர்வைபோல் மூடிவைத்து வழிபடும் 'க்ருதகம்பள' வழிபாடுபற்றி, கும்பகோணம், திருவிடைமருதூர் தலச்சிறப்பு, காசி தலத்தில் கடினமான பஞ்சக்ரோச யாத்திரையின் சிறப்பு கூறப்பட்டுள்ளது.

எட்டாவது அம்சத்தில் - கந்தப் பெருமான் ஜைகீஷவ்ய முனிவருக்கும் பிற முனிவர்களுக்கும் சிவதத்துவக் கருத்துக்களைக் கூறும் முகமாக,

கச்யப முனிவருக்கு இரு மனைவியர். ஒருவர் விநதா, மற்றவர் கத்ரு. விநதா அருணனுக்கும் கருடனுக்கும் தாய். கத்ரு நாகங்களின் தாய். கத்ரு பொறாமையால் தமது பிள்ளைகளின் துணை கொண்டு வஞ்சகமாக விநதாவைத் தனக்கு அடிமையாக்கிக் கொள்கிறாள். கருடன் தன் தாயின் அடிமைத்தனத்தை விலக்கிக்கொள்ள - தேவருலகிலிருந்து அமுத கலசத்தைக் கொண்டுவந்து கொடுக்கவேண்டும் என்று கத்ரு கேட்க, கருடன் அதனை ஏற்று கடும் சிவவழிபாட்டின் பயனாக பெரும் போருக்குப் பின் அமுத கலசத்தைக் கொண்டுவந்து கொடுத்து தாயை அடிமைத்தனத்திலிருந்து விடுவிக்கிறான்.

அமுத கலசத்தை இழந்த தேவர்கள் கருடனின் பலத்தை அறிந்து பயந்து திருமாலின் துணையுடன் நயமாகப் பேசி கருடனிடமிருந்து அமுத கலசத்தைப் பெற முயன்றபோது திருமால் கருடனைப் புகழ்ந்து பேசி வேண்டிய வரம் கேள் என்று கூற, "நீங்கள்சிவபெருமானை வழிபட்டு சுதர்சன சக்கரத்தைப் பெற்றவர். சுதந்திர சக்தியற்றவர். எனக்கு வரம் தருவதா! நான் உங்களுக்கு வரம் தருகிறேன் கேளுங்கள் என்று கூற, அமுத கலசத்தைக்கொடு என்று திருமால் கேட்க, கருடன் சொல் தவறாமல் அமுத கலசத்தைக் கொடுத்த வரலாறு பல அத்தியாயங்களில் கூறப்பட்டுள்ளதோடு,

விபூதி (திருநீறு), ருத்ராக்ஷ மகிமை - தக்ஷகன் ஆதிசேஷன் முதலான அரவங்கள் பாதாள உலகில் உள்ள ஹாடகேசலிங்க வழிபாடு செய்தல் - அஷ்டதிக்கஜங்களும் சிவவழிபாடு செய்தது பற்றியும் கூறப்படுகிறது.

இப்பொழுது வெளியிடப்படும் இந்த ஒன்பதாவது அம்சத்தில் உள்ள 65 அத்தியாயங்களில் - கந்தப்பெருமான் - ஜைகீஷவ்ய முனிவருக்கும் பிற முனிவர்களுக்கும்

சிவரஹஸ்ய நாமாக்களை உபதேசித்து - கிருத யுகம், த்ரேதா யுகம், துவாபர யுகம் ஆகிய யுகங்களில் ஓரளவு தர்மம் நிலைத்து இருந்தமையால் சிவபக்தி - சிவவழிபாடு நடைபெற வில்லையென்றும், கலியுகத்தில் அதர்மம் மேலிட்டு தீமைகள் தீய செயல்கள் மிகுந்து வேதநெறி முற்றிலும் இல்லாத நிலையில் சிவபெருமானே "சங்கரர்" என்ற பெயரில் கேரளத்தில் "காலடி"யில் அவதரித்து நான்கு சீடர்களுடன் அத்வைத நெறியை நிலைப்படுத்துவது பற்றியும், ஹரதத்தர் என்ற சிவாசாரியரின் சிறப்புகளைப் பற்றியும்,

சுந்தரன் எனும் பூத கணம் காமவயப்பட்டு கைலாயத்தில் "கமலினீ"யெனும் பார்வதிதேவியின் தோழியை விரும்பிய செய்தியறிந்த சிவனார், சுந்தர ! நீ பூவுலகில் சுகபோகங்களில் ஈடுபட்டும், எம்மைப் பல தலங்களில் சென்று வழிபட்டும் இருக்கும் சமயம் கமலினியும் பூவுலகில் தோன்றுவாள். யாம் உரிய நேரத்தில் உங்கள் இருவரின் திருமணத்தையும் நடத்தி வைப்போம் என்று கூற, அந்த பூத கணம் சுந்தரமூர்த்தி சுவாமிகளாகத் தோன்ற, கமலினியும் திருவாரூரில் அழகிய மங்கையாகப் பிறந்து வளரும்போது சிவபெருமான் அவர்களுக்குத் திருமணம் செய்து வைத்தமை பற்றியும்,

திருவாரூரின் சிறப்பினைக்கூறும்முகமாக கமலாம்பிகை சிவபெருமானைக் குறித்துத் தவம் செய்தமை பற்றியும், திருநீலகண்டர் - வேடன் (கண்ணப்பன்) சிவபக்தி பற்றியும், திருநாவுக்கரசர் (வாகீசர்), திருஞானசம்பந்தர், அப்பூதியடிகள் முதலான சைவ சமயக்குரவர்களின் வரலாறுகள் பற்றியும் சில விரிவாகவும், பல சுருக்கமாகவும் கூறப்படுகிறது.

இந்த ஒன்பதாவது அம்சத்திலும் சொற்பிழைகள் இலக்கணப்பிழைகள் இல்லாமல் இல்லை. ஆனால், அருமையான யதுகை மோனையுடன் செய்யுட்களை அமைத்துள்ள ஆசிரியரின் ஆற்றலைப் போற்றாமல் இயலாது.

இவ்வரிய நூலை அச்சிட்டு வெளியிட அனுமதி வழங்கிய தஞ்சை மாவட்ட ஆட்சித்தலைவர் மற்றும் நூலக இயக்குநர் உயர்திரு. சா. விஜயராஜ் குமார், இ. ஆ. ப., அவர்களுக்கு என் உளம்நிறைந்த நன்றியைத் தெரிவித்துக் கொள்கிறேன். நூலக நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும் என் உளமார்ந்த நன்றியினைத் தெரிவித்துக்கொள்கிறேன்.

சென்னை தேதியூர். S. கிருஷ்ணமூர்த்தி சாஸ்திரிகள்

23-6-2007

॥ शिवाय नमः ॥

॥ शिवरहस्यम् ॥

॥ नवमांशम् ॥

॥ प्रथमोऽध्यायः ॥

सोमात्मजं [1]सामजवक्त्रमाद्यं
गणेशसामस्तुतविघ्नवैद्यम् ।
आद्यं सुराणां निखिलैश्च वन्द्यं
वन्दे सदा हृद्यतमं त्वभेद्यम् ॥ १ ॥

श्रीसूतः (उवाच)

प्रणम्य तारकारातिं पुरारातितनूद्भवम् ।
विनयावनतो भूत्वा जैगीषव्यः स शाम्भवः ॥ २ ॥

शृण्वत्सु देवसङ्घेषु गणेष्वपि मुनिष्वपि ।
हरपादाम्बुजध्यानानन्दनिर्वृतमानसः ॥ ३ ॥

उवाच [2]मोचामधुरवाचा शीतलया मुनिः ।

जैगीषव्यः (उवाच)

तारकारे संहृतारे पुरारिप्रेममन्दिर ॥ ४ ॥

किञ्चिद्विज्ञप्तुमिच्छामि चित्ते तदुपधार्यताम् ।
अष्टमांशावसानेऽत्र त्वयैवाकथि शाङ्करे ॥ ५ ॥

T. M. S. S. L No. 1764 / 9548

1. सामाज an elephent. 2. मोचा plantain fruit.

शेषाशेषमुखप्रोक्तं शम्भोर्नामसहस्त्रकम् ।
तदभि(पि)श्रोतुमिच्छामि यद्यस्ति मयि ते दया ।। ६ ।।

तद्वदाद्य विशेषेण शेषप्रोक्तं सनातनम् ।
रसालसारं पीत्वैव नान्यदिच्छति कोकिलः ।। ७ ।।

तद्वच्छिवकथासारं पीत्वा नान्यदिहेच्छति ।
मन्मनः सद्मसंलग्नं पादपद्मं महेशितुः ।। ८ ।।

नान्यवर्णाश्रमाचारकथाभी रमते मनः ।
यथा शिवकथा सिन्धु(धोः) यथा सन्तरणं भवेत् ।। ९ ।।

न तथा सर्वधर्मार्थश्रवणे मे धृता मतिः ।
तुच्छान् न पृच्छे धर्मादीन् स्वच्छोऽस्मि त्वत्कृपावशात् ।।

सूतः (उवाच)

इति तद्वचनं श्रुत्वा सानन्दजललोचनः ।
स्वनेत्रालोकनेनाशु स्वीचकार स शाम्भवम् ।। ११ ।।

स्कन्दोऽप्युवाच तं शाङ्गं भस्माङ्गं लिङ्गपूजकम् ।
अनङ्गमातङ्गहरपादपद्मान्तरङ्गकम् ।। १२ ।।

स्कन्द उवाच

साधुपृष्टं त्वया शैव शिवपादार्चनेरत ।
शम्भोर्नामसहस्त्रं ते शेषाशेषमुखोद्गतम् ।। १३ ।।

पाताले हाटकेशार्चाकारणं तारणं नृणाम् ।
शृणु त्वं गणवृन्दैश्च बृन्दारैश्च मुनीश्वरैः ।। १४ ।।

तेन धन्योऽसि मान्योऽसि महामन्युप्रसादभाक् ।
यथा शिवकथासिन्धुतरङ्गानन्दशीकरः ।। १५ ।।

संसारतापसन्तप्तं शीतयत्यन्तरे बहिः ।
न तथा स्वर्धनी धन्या किं पावयति तन्नरम् ।। १६ ।।

गङ्गा लिङ्गैकसङ्गापि पापभङ्गाय सा नृषु ।
न मुक्तिकान्ता सङ्गाय शाङ्गायैवेह केवलम् ।। १७ ।।

भवन्ति भवपादाब्जस्मरणेन विभूतयः ।
मतयः सुप्रसन्नाः स्युः प्रसन्ने परमेश्वरे ।। १८ ।।

सन्नानि सर्वपापानि भिन्नापायो भवेत्सहि ।
यः सदा ध्यायति हृदा मुदैव परमेश्वरम् ।। १९ ।।

यदा कदा सदैवापि स तदा मुक्तिभाग्भवेत् ।
यच्चित्तं विहरेत्साधु सदाशिवपदाम्बुजे ।। २० ।।

तदेव चित्तं शैवेन्द्र अन्यत्पित्तविकारकम् ।
वित्ताशया भ्रमन्त्यज्ञा हृत्तापकरणं हि तत् ।। २१ ।।

मुधा सुधां विहायान्धाः पतन्ति विषयावटे ।
देवोरुतटिनीजूटं करटित्क्कृताम्बरम् ।। २२ ।।

विहाय पार्वतीकान्तं हा मुधा परिमोहिताः ।
कृतान्तसदने तान्ताः शान्ता अपि कलौ द्विज ।। २३ ।।

न तथा त्वं महाबुद्धे सिद्धपात्रं त्वमेव हि ।
त्रिणेत्रसुचरित्राणां द्वित्राणां श्रावकोऽपि यः ।। २४ ।।

श्रोत्रनेत्रमहाहार पादपङ्कजसेविनाम् ।
ऐहिकामुष्मिकी सिद्धिर्युष्मत्सु मुनिसत्तमाः ।। २५ ।।

हृत्तमोनाशकं ज्ञानं मुक्त एव भविष्यति ।
कालान्तकं सकृत्पूज्य कालातीतो भविष्यति ।। २६ ।।

न कालसदनं याति मदनान्तकपूजया ।
जयोऽपि हि भवेत्सद्यो विभवोऽपि हि शाश्वतः ।। २७ ।।

भक्तभावप्रसन्नानां भवानां भवनाशनम् ।
जायते नात्र सन्देहो भवोद्भवपदार्चनात् ।। २८ ।।

भवानीरमणार्चायां यो निष्ठस्तुष्ट एव सः ।
अणीयोऽपि स हि (अणीयानपि स)
ज्यायान् न द्विजोऽपि द्विजाद्वरः ।। २९ ।।

द्विजराजकलामौलिपादपङ्कजसेवया ।
द्विजानामेव सर्वेषां ध्येयः साम्बस्त्रिलोचनः ।। ३० ।।

उमासहायो विश्वेशो जगद्दुःखापहारकः ।
तारकः सर्वजन्तूनां सर्वेषामेव शङ्करः ।। ३१ ।।

किङ्करास्तस्य सर्वेऽपि असुरा भूसुराः सुराः ।
पूजनीयः (पूजाकार्या) सदा लिङ्गे बिल्वपत्रैश्च कोमलैः ।।

द्विरैर्वा(पद्म) पत्रैर्वा त्रिणेत्रो मोचकः सदा ।
भस्माभ्यक्तस्त्रिपुण्ड्राङ्को रुद्राक्षामलहारकः ।। ३३

यस्तु सम्पूजयेल्लिङ्गे तुङ्गे शाङ्गे महामनाः ।
अलिङ्गोऽपि महादेवस्तत्पापं भंगया(भञ्जय)त्यपि ।। ३४

तुङ्गं वाप्यन्तरङ्गं वा तमसङ्गं [करोच्छिवः करोति सः।।]

स्कन्दः (उवाच)

यः कोऽपि शाङ्गो भुवि भस्मसङ्गो
लिङ्गोत्तमङ्गे विमले सुतुङ्गे ।
बिल्वं तथाब्जं करवीरपुष्पं
गङ्गाम्भसा प्राव्य ददाति भाग्यैः ।।
(बिल्वं निदध्यात्करवीरमब्जं
गङ्गाप्रवाहाभं निधिं आदधाति) ।। ३६ ।।

स एव मातङ्गहराङ्गसङ्गो
मोक्षैकसङ्गाय भवेदसङ्गः ।
ये खण्डबिल्वीदलमिन्दुमौलेः
श्रीखण्डलिप्ते शिरसि क्षिपन्ति ।। ३७ ।।

आखण्डलाद्यैरभिवन्दनीया
स्ते चन्द्रखण्डं शिरसा बिभर्ति ।
आखण्डलाद्यैरभिवन्दनीया-
स्ते बिभ्रतीन्दोः शकलं स्वमूर्ध्ना ।। ३८ ।।

।। इति श्रीशिवरहस्ये नवमांशे जैगीवव्यस्कन्दसंवादे प्रथमोऽध्यायः ।।

।। द्वितीयोऽध्यायः ।।

स्कन्द उवाच

शेषाशेषमुखोद्गीतां नामसारावलीमिमाम् ।
हाटकेशोरुकटकभूतेनाहीन(न्द्र)केण तु ।। १ ।।

सहस्रनाम यत्प्रोक्तं तत्ते वक्ष्याम्यहं श्रृणु ।
धन्यं मान्यं महामन्युप्रीतिदायकमुत्तमम् ।। २ ।।

नान्येषु दापनीयं ते न देयं वेदमीदृशम् ।
पञ्चास्य हृदयाशास्यमनुशास्यामि ते हृदि ।।

ऋषिरस्यादिशेषो वै देवो देवोमहेश्वरः ।
सर्वत्र विनियोगोऽस्य कर्मस्वपि सदा द्विज ।
ध्यानं तस्यानुवक्ष्यामि त्वमेकाग्रमनाः श्रृणु ।।

स्कन्दः (उवाच)

ध्यायेदिन्दुकलाधरं गिरिधनुं सोमाग्निफालोज्ज्वलं
वैकुण्ठोरुविपाठबाणसुकरं [1]देवं रथेऽधिष्ठितम् ।
वेदाश्वं विधिसारथिं गिरिजया चित्तेऽनुसन्दध्महे
नानाकारकलाविलासजगदान्ददिसम्पूर्तये ।।

एवं ध्यात्वा महादेवं नाम्नां साहस्रमुत्तमम् ।
प्रजपेन्नियतो मन्त्री भस्मरुद्राक्षभूषणः ।।

लिङ्गमभ्यर्चयन्वापि बिल्वकोमलपल्लवैः ।
पङ्कजैरुत्पलैर्वापि प्रसादाय महेशितुः ।।

---

1. ह्युर्वीरथाधिष्ठतम् ।

अष्टम्यां वा चतुर्दश्यां[1] पर्वस्वपि विशेषतः ।
यं यं कामं सदाचित्ते भावयेत्तं तमाप्नुयात् ।।

ओं गङ्गाधरोऽन्धकरिपुः पिनाकी प्रमथाधिपः ।
भव ईशान आतार्योऽनेकधन्यो महेश्वरः ।।

महादेवः पशुपतिः स्थाणुः सर्वज्ञ ईश्वरः ।
विश्वाधिकः शिवः शान्तो विश्वात्मा गगनान्तरः ।।

परावरोऽम्बिकानाथः शरदिन्दुकलाधरः ।
गणेशतातो देवेशो भववैद्यः पितामहः ।।

तरणस्तारकस्ताम्रो प्रपञ्चरहितो हरः ।
विनायकस्तुतपदः क्ष्मारथो नन्दिवाहनः ।।

गजान्तको धनुर्धारी वीरघोषः स्तुतिप्रियः ।
प्रजासहो रणोच्चण्डताण्डवो मन्मथान्तकः ।।

शिपिविष्टः शाश्वतात्मा मेघवाहो दुरासदः ।
आनन्दपूर्णो वर्षात्मा रुद्रः संहारकारकः ।।

भगनेत्रप्रमथनो नित्यजेताऽपराजितः ।
महाकारुणिकः श्वभ्रुः प्रसन्नास्यो मखान्तकः ।।

घनाभकण्ठो गरभुक् बब्लुशो वीर्यवर्धनः ।
प्रकटस्तवनो मानी मनस्वी ज्ञानदायकः ।।

---

1. सङ्क्रमणं पूर्णिमा दर्शः कृष्णाष्टमी कृष्णचतुर्दशी चैतानि पञ्च पर्वाणि कथ्यन्ते ।

कन्दर्पसर्पदर्पघ्नो विषादी नीललोहितः ।
कालान्तको युगावर्तः सङ्क्रन्दनसुनन्दनः ।।

दीनपोषः पाशहन्ता शान्तात्मा क्रोधवर्धनः ।
कन्दर्पो विसलच्चन्द्रो लिङ्गाध्यक्षो गजान्तकः ।।

वैकुण्ठपूज्यो विश्वात्मा त्रिणेत्रो वृषभध्वजः ।
जह्नुजापतिरीशानः स्मशाननिलयो युवा ।।

पार्वतीजानिरूह्याढ्यो नाट्यविद्यापरायणः ।
सामवेदप्रियो वैद्यो विद्याधिपतिरीश्वरः ।।

कुमारजनको मारमारको वीरसत्तमः ।
कम्बलाश्वतरोद्गारिसुफणोत्कृष्टकुण्डलः ।।

आनन्दवनवासोऽथ अविमुक्तमहेश्वरः ।
ओङ्कारनिलयो धन्वी केदारेशोऽमितप्रभः ।।

नर्मदालिङ्गनिलयो निष्पापजनवत्सलः ।
महाकैलासलिङ्गात्मा वीरभद्रप्रसादकृत् ।।

कालाग्निरुद्रोऽनन्तात्मा भस्माङ्गो गोपतिप्रियः ।
वेदाश्वः कञ्जजाजानिनेत्रपूजितपादुकः ।।

जलन्धरवधोद्युक्तदिव्यचक्रप्रदायकः ।
वामनो विकटो मुण्डस्तुहुण्डकृतसंस्तुतिः ।।

फणीश्वरमहाहारो रुद्राक्षकृतकङ्कणः ।
वीणापाणिर्गानरतो ढक्कावाद्यप्रियो वशी ।।

विशालवक्षाः शैलेन्द्रजामाताऽमरसत्तमः ।
हृत्तमोनाशको बुद्धो जगत्कन्दार्दनो बली ।।

पलाशपुष्पपूज्याङ्घ्रिः पलाशनवरप्रदः ।
सागरान्तर्गतो घोरः सद्योजातोऽम्बिकासखः ।।

वामदेवः सामगीतः सोमः सोमकलाधरः ।
निःसीम महिमोदारो दू(दा)रिताखिलपातकः ।।

तपनान्तर्गतो धाता धेनुपुत्रवरप्रदः ।
बाणहस्तप्रदो नेता नमुचेर्वीर्यवर्धनः ।।

नागाजिनाङ्गो नागेशो नागेशवरभूषणः ।
अगेशशायी भूतेशो गणकोलाहलप्रियः ।।

प्रसन्नास्योऽनेकबाहुः शूलधृक् कालतापनः ।
कोलप्रमथनः कूर्ममहाखर्पटधारकः ।।

मारसिंह्माजिनधरो महालाङ्गलधृग्बली ।
ककुदुन्मथनो हेतुरहेतुः सर्वकारणः ।।

कृशानुरेताः सोत्फुल्लफालनेत्रोऽमरारिहा ।
मृगबालधरो धन्वी शक्रबाहुविभञ्जकः ।।

दक्षयज्ञप्रमथनः प्रमथाधिपतिः शिवः ।
शतावर्तो युगावर्तो मेघावर्तो दुरासदः ।।

मनोजवो जातजनो वेदाधारः सनातनः ।
पाण्डरागोः(ङ्गो)गोऽजिनाङ्गः कर्मन्दिजनवत्सलः ।

चातुर्होत्रो वीरहोता शतरुद्रीयमध्यगः ।
भीमो रुद्र उदावर्तो विषमाक्षोऽरुणेश्वरः ।।

यक्षराजनुतो नाथो नीतिशास्त्रप्रवर्तकः ।
कपालपाणिर्भगवान्वैयाघ्रत्वगलङ्कृतः ।।

मोक्षसारोऽध्वराध्यक्ष ध्वजजीवो मरुत्सखः ।
आरुणेयस्त्वगध्यक्षो कामनारहितस्तरुः ।।

बिल्वपूज्यो बिल्वनीशो हरिदश्वोऽपराजितः ।
बृहद्रथन्तरस्तुत्यो वामदेव्यस्तवप्रियः ।।

अघोरतर रोचिष्णुर्गम्भीरो मन्युरीश्वरः ।
कलिप्रवर्तको योगी साङ्ख्यमायाविशारदः ।।

विधारको धैर्यधुर्यः सोमधामान्तरस्थितः ।
शिपिविष्टो गह्वरेष्टो ज्येष्ठो देवः कनिष्ठकः ।।

पिनाकहस्तोऽवरजो वर्षहरीश्वरः ।
कवची च निषङ्गी च रथघोषोऽमितप्रभः ।।

कालञ्जरो दन्दशूको विदर्भेशो गणातिगः ।
गभस्तीशो मुनिश्रेष्ठो महर्षिः संशितव्रतः ।।

कर्णिकारवनावासी करवीरसुमप्रियः ।
नीलोत्पलमहास्रग्वी करहाटपुरेश्वरः ।।

शतर्चनः परानन्दो ब्राह्मणार्च्योपवीतवान् ।
बली बालप्रियो धर्मो हिरण्यपतिरप्पतिः ।।

यमप्रमथनोष्णीषी चक्रहस्तः पुरान्तकः ।
वसुषेणोऽङ्गनादेहः कौलाचारप्रवर्तकः ।।

तन्त्राध्यक्षो मन्त्रमयो गायत्रीमध्यगः शुचिः ।
वेदात्मा यज्ञसम्प्रीतो गरिष्ठः पारदः कली ।।

ऋग्यजुःसामरूपात्मा सर्वात्मा क्रतुरीश्वरः ।
हिरण्यगर्भजनको हिरण्याक्षवरप्रदः ।।

दमिताशेषपाषण्डो दण्डहस्तो दुरासदः ।
दूर्वार्चनप्रियकरो रन्तिदेवोऽमरेश्वरः ।।

अमृतात्मा महादेवो हरः संहारकारकः ।
त्रिगुणो विखना वाग्मी त्वङ्मांसरुधिरांशकः ।।

वत्सप्रियोऽथ सानुस्थो विष्णू रक्तप्रियो गुरुः ।
किरातवेषः शोणात्मा रत्नगर्भोऽरुणेक्षणः ।।

सुरासवबलिप्रीतस्तत्पूर्षोऽगन्धदेहवान् ।
व्योमकेशः कोशहीनः कल्पनारहितोऽक्षमी ।।

सहमानश्च विव्याधी स्फटिकोपलनिर्मलः ।
मृत्युञ्जयो दुराध्यक्षो भक्तिप्रीतो भयापहः ।।

गन्धर्वगानसुप्रीतो विष्णुगर्भोऽमितद्युतिः ।
ब्रह्मस्तुतः सूर्यनेत्रो वीतिहोत्रोऽर्जुनान्तकः ।।

गर्वापहारको वाग्मी कुम्भसम्भवपूजितः ।
मलयो विन्ध्यनिलयो महेन्द्रो मेरुनायकः ।।

पार्वतीनायकोऽजय्यो जङ्गमाजङ्गमाश्रयः ।
कुरुविन्दोऽरुणो[1] धन्वी अस्थिभूषो निशाकरः ।।

समुद्रमथनोद्भूतकालकूटविषादनः ।
सुरासुरेन्द्रवरदो दयामूर्तिः सहस्रपात् ।।

कारणो वीरणः पुत्री जन्तुगर्भो गरादनः ।
श्रीशैलमूलनिलयः श्रीमदभ्रसभापतिः ।।

दक्षिणामूर्तिरनघो जलन्धरनिपातनः ।
दक्षिणो यजमानात्मा दीक्षितो दैत्यनाशनः ।।

कल्माषपादपूज्याङ्घ्रिरतिदो तुरगप्रियः ।
उमाधवो दीनदयो दाता दान्तो दयापरः ।।

श्रीमद्दक्षिणकैलासनिवासो जनवत्सलः ।
दर्भरोमा बलोन्नेता तामसोऽन्नविवर्धनः ।।

नमस्कारप्रियो नाथ आनन्दात्मा सनातनः ।
तमालनीलसुगलः कुतर्कविनिवारकः ।।

कामरूपः प्रशान्तात्मा कारणानां च कारणः ।
तृणपाणिः कान्तिपरो मणिपाणिः कुलाचलः ।।

कस्तूरीतिलकाक्रान्तफालो भस्मत्रिपुण्ड्रवान् ।
वारणाङ्गालङ्कृताङ्गो महापापनिवारणः ।।

प्रकाशरूपो गुह्यात्मा बालरुपो बिलेशयः ।
भिक्षुप्रियो भक्ष्यभोक्ता भरद्वाजप्रियो वशी ।।

---

1. कुरुविन्दारुणो

कर्मण्यस्तारकोभूत[1]कारणो यानहर्षदः ।
वृषगामी धर्मगोप्ता कामी कामाङ्ग नाशनः ।।

कारुण्यो वाजरूपात्मा निर्धर्मो ग्रामणीः प्रभुः ।
अरण्यः पशुहर्षश्च सौनिको मेघवाहनः ।।

कुमारगुरुरानन्दो वामनो वाग्भवो युवा ।
स्वर्धुनीधन्यमौलिश्च तरुराजो महामनाः ।।

कणाशनस्ताम्रघनो मयप्रीतोऽजरामरः ।
कौणपारिः फालनेत्रो वर्णश्रमपरायणः ।।

पुराणबृन्दसम्प्रीत इतिहासविशारदः ।
समर्थो नमिताशेषदेवो द्योतकरः फणी ।।

कर्षको लाङ्गलेशश्च मेरुधन्वा प्रजापतिः ।
उग्रः पशुपतिर्गोप्ता पवमानो विभावसुः ।।

उदावसुर्वीतराग उर्वीशो वीरवर्धनः ।
ज्वालमालोऽजिताङ्गश्च वैद्युदग्निप्रवर्तकः ।।

कमनीयाकृतिः पाता आषाढो(ढः)षण्ढवर्जितः ।
पुलिन्दरूपः पुण्यात्मा पुण्यपापफलप्रदः ।

गार्हपत्यो दक्षिणाग्निः सभ्यो वसथभृत्कविः ।
द्रुम आहवनीयश्च तस्करोऽथ मयस्करः ।।

शाङ्करो वारिदोऽवार्यो वातचक्रप्रवर्तकः ।
कुलिशायुधहस्तश्च विकृतो जटिलः शिखी ।।

---

1. कर्मण्योनारकोद्भूत

सौराष्ट्रवासी देवेड्यः सह्यजातीरसंस्थितः ।
महाकायो वीतभयो गणगीतो विशारदः ।।

तपस्वी तापसाचार्यो द्रुमहस्तोज्ज्वलत्प्रभुः ।
किन्दमो मङ्कणः प्रीतो जातुकर्णिस्तुतिप्रियः ।।

वेनो वैन्यो विशाखश्चाऽकम्पनः सोमधारकः ।
उपायदो दारिताङ्गो नानागमविशारदः ।।

काव्यालापैककुशलो मीमांसावल्लभो ध्रुवः ।
तालमूलनिकेंतश्च बिल्वमूलप्रपूजितः ।।

वेदाङ्गो गमनोऽगम्यो गव्यः प्रातः फलादनः ।
गङ्गातीरस्थितो लिङ्गी अलिङ्गो रूपसंश्रयः ।।

श्रान्तिहा पुण्यनिलयः पललाशोऽर्कपूजितः ।
महेन्द्रविष्णुजनको ब्रह्मतातस्तुतोऽव्ययः ।।

कर्दमेशो मतङ्गेशो विश्वेशो गन्धधारकः ।
विशालो विमलो जिष्णुर्जयशीलो जयप्रदः ।।

दारिद्र्यमथनो मन्त्री शम्भुः शशिकलाधरः ।
शिंशुमारः शौनकेज्यः श्वानपः श्वेतजीवदः ।।

मुनिबालप्रियोऽगोत्रो मिलिन्दो मन्त्रसंस्थितः ।
काशीशः कामिताङ्गश्च वल्लकीवादनप्रियः ।।

हल्लीसलास्यनिपुणः सल्लीलो वल्लरीप्रियः ।
महापारदसंवीर्यो वह्निनेत्रो जटाधरः ।।

आलापोऽनेकरूपात्मा पुरुषः प्रकृतेः परः ।
स्थाणुर्वेणुवनप्रीतो रणजित्पाकशासनः ।।

नग्नो निराकृतो धूम्रो वैद्युतो विश्वनायकः ।
विश्वाधिकः शान्तरवः शाश्वतः सुमुखो महान् ।।

अणोरणुः श्वभ्रगतः (तोह्य) अवटेशो नटेश्वरः ।
चित्रधामा चित्रभानुर्विचित्राकृतिरीश्वरः ।।

इन्द्रोऽजोऽमूर्तिरूपात्मा(ह्य)अमूर्तो वह्निधारकः ।
अपस्मारहरो गुप्तो योगिध्येयोऽखिलादनः ।।

नक्षत्ररूपः क्षत्रात्मा क्षुत्तृष्णाश्रमवर्जितः ।
असंगो भूतहृदयो वालखिल्यो मरीचिपः ।।

पञ्चप्रेतासनासीनो योगिनीकणसेवितः ।
नानाभाषानुचतो (नुवचनो) नानादेशसमाश्रयः ।।

वृन्दारकगणस्तुत्यः पुरन्दरनतिप्रियः ।
प्रघसो विघसाशी च (चाप्य) अन्नाधिपतिरन्नदः ।।

पन्नगाभरणो योगी गुरुर्लौकिकनायकः ।
विराजो[1] विश्वतोधर्मी बब्लुशो बाहुकप्रियः ।।

प्रधाननिपुणो मित्रो ह्यूर्ध्वरेता महातपाः ।
कुरुजाङ्गलवासी च नित्यतृप्तो निरञ्जनः ।।

हिरण्यगर्भो भूतादिस्वराट् सम्राड्विराड्वटुः ।
पटहध्वनिसम्प्रीतो नतमुक्तिप्रदायकः ।।

---

1. रजो (रजा)

फलप्रदः फालनेत्रः फणीश्वरमहाङ्गधृक् ।
वास्तुपो वासवो वात्यो वर्मभिद्वसनोज्ज्वलः ।।

मीढुष्टमः शिवतमो वसुः शिवतरो बली ।
निधनेशो निधानेशः पुरुजिद्राष्ट्रवर्धनः ।।

अयुतायुः शतायुश्च प्रमितायुः शताध्वरः ।
सहस्रशृङ्गो वृषभ उरुगायोरुमीढुकः ।।

गन्ता गमयिता गाता गरुत्मान् गीतवर्धनः ।
रागरागिणिकाप्रीतस्तालपाणिर्गदापहः ।।

देवेशः खण्डपरशुः प्रचण्डतरविक्रमः ।।
उरुक्रमो महाबाहुर्हेतिधृक्पावकादनः ।

गणिकानाट्यनिरतो विमर्शो वावदूककः ।।
कलिप्रमथनो धीरो धीरोदात्तो महाहनुः ।

क्षयद्वीरोमुंजि(मञ्जु)केश [1]कल्मलीकः(की) सुरोत्तमः ।।
वज्राङ्गो वायुजनको ह्यष्टमूर्तिः कृपाकरः ।

प्रहूतः परमोदारः पञ्चाक्षरपरायणः ।।
[2]कर्कन्धुः कामदहनो मलिनाक्षो जडाजडः ।

कुबेरपूजितपदो महातक्षककङ्कणः ।।
शङ्खणो मधुरारावो मृडः सस्पिञ्जरोऽजरः ।

---

1. कल्मलीक - Lusture.
2. कर्कं कण्टकं दधाति इति कर्कन्धुः - Jujube tree according to Apte's Dictionary. Page. 537

मार्गो मार्गप्रदो मुक्तो विजितारिः परोऽवरः ।
प्रणवार्थो वेदमयो वेदान्ताम्बुज भास्करः ।।

सर्वविद्याधिपः सौम्यो यज्ञेशः क्षेत्रनायकः ।
पापनाशकरो दिव्यो गोभिलो गोपरो गणः ।।

गणेशपूजितपदो ललिताम्बामनोहरः ।
कक्षवासो महोक्षाङ्को निस्तमस्तोमवर्जितः ।।

निःसीममहिमोदारः प्रभामूर्तिः प्रसन्न((दृ)क् ।
स्तोभ[1] प्रीतो भारभूतो भूभारहरणः स्थिरः ।।

क्षराक्षरोधरो धर्ता सागरान्तर्गतो वशी ।
रम्यो रस्यो रजस्योऽथ प्रवाह्यो वैद्युतोऽनलः ।।

सिकत्यो वाद्य उर्वर्यो[2] मेध्य ईध्रिय वाक्पटुः ।
प्रपञ्चमायारहितः कीर्तिदो वीर्यवर्धनः ।।

कालचक्रान्तरहितो नित्यानित्योऽथ चेतनः ।
गर्वोन्नतो भटाकारो मृगयुर्भवहा भवः ।।

शङ्गः शताङ्गः शीताङ्गो नागाङ्गो भस्मभूषणः ।
त्रियम्बकोऽम्बिकाभर्ता नन्दिकेशः प्रसादकृत् ।।

चण्डीशवरदो दिव्यो मायाविद्याविशारदः ।
मृगाङ्कशेखरो भव्यो गौरीपूज्यो दयामयः ।।

---

1. स्तोभ - Hymn. A division of the Samaveda.

2. ऊर्वरा Fertile soil. ऊर्वरायां भवः इत्यर्थे वा ।।

प्रमाथनोऽविकथनो गर्गो वीणाप्रियः पटुः ।
वर्णी वनस्थो यतिराट् गूढगर्भो विरोचनः ।।

शबरो बर्बरो धौम्यो विराड्रूपः स्थितिप्रदः ।
महाकारुणिको भ्रान्तिनाशकः शोकहा प्रभुः ।।

अशोकपुष्पपूज्याङ्घ्रिर्मणिभद्रो धनेश्वरः ।
अमृतेशोद्रुतगति[1]स्तगरोऽर्जुनमध्यगः ।।

दमो विरोधहृत्कान्तो नीतिज्ञो विष्णुपूजितः ।
सुमप्रियो वातमयो वरीयान्कर्मठो यमः ।।

दिगम्बरो(रः) शममयो धूमपः शुक्रगर्भकः ।
अट्टहासोऽतल्पशय आसीनो धावमानकः ।।

तुराषाण्मेघमध्यस्थो [2]विपाशातीरसंस्थितः ।
कुलोन्नतः कुलीनश्च व्यवहारप्रवर्तकः ।।

केतुमालो हरिद्राङ्गो द्रावि(वी) पुष्पमयो भृगुः ।
विशोषकोर्वीनिरतस्त्वग्जातो रुधिक(र)प्रियः ।।

अकैतक(व)हृदावासः क्षपानाथकलाधरः ।
नक्तंचरोदिवाचारी दिव्यदेहो विनाशकः ।।

कदम्बवनमध्यस्थो हरिद्राङ्गोर्मिमध्यगः ।
यमुनाजलमध्यस्थो जालकोऽजमखो वसुः ।।

---

1. A. Kind of plant.

2. Name of one of the five rivers in the Panjab (BEAS)

वसुप्रदो वीरवर्यः शूलहस्तः प्रतापवान् ।
खड्गहस्तो मण्डलात्मा मृत्युर्मृत्युजिदीश्वरः ।।

लङ्कावासो मेघमालो गन्धमादनसंस्थितः ।
भैरवो भरणो भर्ता भ्रातृव्यो नामरूपगः ।।

अव्याकृतात्मा भूतात्मा पञ्चभूतान्तरोऽस्मयः ।
अहनन्यः शब्दमय कालाधरः कलाधरः ।।

भृगुतुङ्गश्चीरवासी(साः) कैवर्तोऽनायकोऽर्धकः ।
करेणुपो गन्धमदश्चाम्पेयकुसुमप्रियः ।।

भद्रदश्चर्मवसनो वैराजस्तोत्रकारकः ।
सुमप्रीतः सामगीती उर्जो वर्चः कुलेश्वरः ।।

ककुद्मान् पीतवसनो वध्येशो नारदः पिता ।
क्रव्यादनो नीतिमयो धर्मचक्रप्रवर्तकः ।।

शष्प्यः फेन्यो विनीर्णेता कङ्कणोऽनासिकोऽचलः ।
एणाङ्कः शलभाकारः शालूरो ग्रामसंस्थितः ।।

महाविशेषकथनो वारितीरास्थितोऽचलः ।
कृपीटयोनिः शान्तात्मा गुणवान् ज्ञानवाञ्छुचिः ।।

सर्वपापहरोऽलिङ्गो भगमालोऽप्रतारणः ।
आनन्दधन आतार्य इरिण्योऽथप्रपथ्यकः ।।

गङ्गातीरस्थितो देवो ह्यविमुक्तसमाश्रयः ।
महास्मशाननिलयोऽवलयो वालिपूजितः ।।

करन्धमो व्रात्यवर्यो मानवो जीवकोऽशठः ।
कर्मदेवमयो ब्रह्मा ऋतं सत्यं महेश्वरः ।।

सुमङ्गलः सुखमयो ज्ञानानन्दोऽमिताशनः ।
मनोमयः प्राणमयो विज्ञानात्मा प्रसादनः ।।

आनन्दमयकोशात्मा धर्मसीमाथ भूमकः ।
सदाशिवो विशिष्टात्मा वसिष्ठार्चितपादुकः ।।

नीलग्रीवः सैन्यपालो दिशानाथो नतिप्रियः ।
केशवोन्मथनो मौनी मधुसूदनसूदनः ।।

उदुम्बरकरो डिम्भो बम्भरः पिञ्छिलातलः ।
मूलस्तालकरो वर्ण्योऽपर्णादः प्राणमाश(ष)कः ।।

अपर्णापतिरीशास्योऽसम्पूर्णः पूर्णरूपवान् ।
दीपमालो जाङ्गलिको वैतुण्डस्तुण्डकः प्रियः ।।

ऊलूकः कलविङ्कोऽथ शुकनादप्रसादकृत् ।
जैगीषव्यतपःप्रीतो रावणेन्द्रबलार्दनः ।।

मार्कण्डेयमहामृत्युनाशको ज्ञानधारकः ।
अहर्गणक्रियातीतः सर्पप्रीतोऽनिलाशनः ।।

वेगाधारो धैर्यधनो धनधान्यप्रदायकः ।
नाद्यो वैद्यो वाद्यरतो गद्यपद्यस्तुतो द्युकः[1] ।।

भेरीभाङ्कारनिरतो मृगचर्मविधायकः ।
पुण्यकीर्तिः पुण्यलभ्यो मोहनास्त्रो(स्त्र)विशारदः ।।

---

1. Sky

कैलासशिखरावासः पारिजातवनाश्रयः ।
ईला(डा)दिरवसम्प्रीतो माहेन्द्रस्तुतिहर्षितः ।।

यूपवाटो भार वहः कोमलाङ्गो जनाश्रयः ।
विश्वामित्रप्रियो बालः पाकयज्ञरतः सुखी ।।

वामाचारप्रियोन्नेता शक्तिहस्तो दुरासदः ।
सर्वाकारः शाश्वतत्मा वाङ्मनोदूरगो हरः ।।

स्कन्द उवाच -

इत्येतन्नामसाहस्त्रं शेषाशेषमुखोद्गतम् ।
शम्भोर्दिव्यं मुनिश्रेष्ठ श्रवणात्पापनाशनम् ।।

सर्वान्कामानवाप्नोति शिवार्चनपरायणः ।
त्वमेभिर्मुनिमुख्यैश्च शृण्वन्भक्तिमवाप्नुयाः ।।

कुमारी पतिमाप्नोति निर्धनो धनवान्भवेत् ।
जयार्थी जयमाप्नोति क्षयद्वीरप्रसादतः ।।

स्कन्द (उवाच)

इति तव गदितं मे नामसाहस्त्रमेतत्
हरवरचरणाब्जाराधने साधनं ते ।
(मुनिगणवरबाणाद्यै)
मुनिजनगणवर्यैर्धार्यमेतत्सुराद्यैः
परमपदमवाप्तुः(प्तुं) शङ्कराज्ञावशेन ।।

।। इति श्रीशिवरहस्ये नवमांशे सहस्त्रनामकथनं नाम द्वितीयोऽध्यायः ।।

।। तृतीयोऽध्यायः ।।

जैगीषव्य (उवाच)

श्रुतं ते तारकाराते नामसाहस्रमुत्तमम् ।
विशेषतः शेषकृतमशेषाघनिवारकम् ।। १ ।।

प्रश्नमेनं(तं) वदाद्य त्वं पृच्छे त्वां वै कुतूहलात् ।
कृतत्रेताद्वापरेषु सर्वधर्मप्रकाशिषु ।। २ ।।

युगेष्वपि महादेवे भक्तिर्नैवोपजायते ।
कथं कलियुगे घोरे नष्टधर्मे मतिः शिवे।। ३ ।।

कथं वा कलिजानां तु शिवभक्तिर्भविष्यति ।
सङ्करणां जारजानां दुर्जीवानां विशेषतः ।। ४ ।।

वर्णाश्रमादिहीनानामवेदानां शिवात्मज ।
भक्तिः कथं भवेच्छम्भौ साक्षान्मुक्तिप्रदायिनी ।। ५ ।।

या साऽनन्ततपोलभ्या अलभ्यैव दुरात्मनाम् ।
यः शिवानुगृहीतश्चेत् स भक्तेः पात्रतामियात् ।। ६ ।।

सा न धर्मतपोलभ्या अलभ्या योगिनामपि ।
नोर्वरादानतो लभ्या न दन्त्युत्तमदानतः ।। ७ ।।

न गोसहस्रदानैर्वा न वाजिवरदानतः ।
न रथायुतदानैर्वा हिरण्यादिप्रदानतः ।। ८ ।।

न रूप्यकुप्यदानैर्वा नाम्बरादिप्रदानतः ।
न तुलापुरुषाद्यैर्वा दशधेनुप्रदानतः ।। ९ ।।

न सत्राहि न एकाहदक्षदीक्षोपसंघकैः ।
सा भक्तिः शाम्भवी जातु भविष्यति कदाचन ।। १० ।।

नान्नतोयप्रदानैर्वा विप्रग्रामप्रदानतः ।
प्रपामण्टपविस्तार छायावनसुरोपणैः ।। ११ ।।

सरसस्तीरबन्धैर्वा सा भक्तिः शाम्भवी भवेत् ।
यो महादेवपादाब्जध्यानानन्दैकमेदुरः ।। १२ ।।

तेनैव लभ्या सा भक्तिः साक्षान्मोक्षप्रदायिनी ।
न वर्णाश्रमधर्मैर्वा नैवाचारानुपालनैः ।। १३ ।।

आभिजात्येन शीलेन सा न लभ्या कथञ्चन ।
न वेदान्तानुवादैर्वा न शब्दैस्तर्ककोटिभिः ।। १४ ।।

न मीमांसासहस्रैर्वा न मीमांस्या कथञ्चन ।
प्रसादः शाङ्करो यस्य तस्य भक्तिर्महेश्वरे ।। १५ ।।

यं चिन्तयति गौरीशो मोचयामीति पाशतः ।
तं भक्तिभाग्यधौरेयं कुरुते करुणाकरः ।।। १६ ।।

शरणागतपालाय शिवाय परमात्मने ।
यो नमस्कुरुते प्रीत्या स मुक्तो मोचयेत्परान् ।। १७ ।।

द्विजो वा श्वपचो वापि न तस्य सुमहानणुः ।
भवप्रीतो महादेवो भावदः परमेश्वरः ।। १८ ।।

न तस्य कश्चिन्मित्रो वा शत्रुर्वास्ति कदाचन।
सर्वे सुरासुराविप्राः पशवस्तद्वशे स्थिताः ।। १९ ।।

स एव देवदेवेशः पशुपाशनिकृन्तनः ।
तस्य मायामयं सर्वं जगदेतच्चराचरम् ।। २० ।।

यस्याष्टमूर्तिभिर्व्याप्तं तेन भिन्नं न किञ्चन ।
ईशावास्येति वेदेन सर्वं शिवमयं जगत् ।। २१ ।।

यो सौ सूर्यस्थितो देवस्तमिन्धयति तेजसा ।
योऽसावग्निस्थितो'देवो वर्चसा तं प्रपूरयेत् ।। २२ ।।

योऽसौ चन्द्रस्थितो देवः कान्त्या तं संप्रपूरयेत् ।
योऽसौ वायुस्थितो देवश्चलनैराविशेच्च तम् ।। २३ ।।

योऽसौ विष्णुस्थितो देवः पालन्या शक्तितो युतः ।
योऽसौ ब्रह्मणि विश्वात्मा सृष्टिकर्त्रात्मना स्थितः ।। २४ ।।

योऽसौ रुद्रात्मको देवः स काले संहरेज्जगत् ।
योऽसाविन्द्रात्मको देवस्त्रिविष्टपनिविष्टितः ।। २५ ।।

योऽसौ भूमिमयो देवो धत्ते सर्वं चराचरम् ।
योऽसौ स वरुणो देवो ह्यपः पाति त्विषां पतिः ।। २६ ।।

योऽसावाकाशगो देवो व्याप्य तिष्ठति रोदसी ।
योऽसावपां शरीरो वै नदीनदगणाधिपः ।। २७ ।।

योऽसौ सर्वात्मको देवः सर्वभूतगुहाशयः ।
पुरुषः परिपूर्णात्मा तेन पूर्णमिदं जगत् ।। २८ ।।

तस्यैव कृपया भक्तिर्जायते नेतरेच्छया ।
भक्त्या ज्ञानं विजायेत सैव भक्तिप्रसादतः ।। २९

स्वतन्त्रस्य महेशस्य निरिच्छस्य पिनाकिनः ।
भक्त्यैव लभ्यते मुक्तिर्नान्यथा वेदवादतः ।। ३० ।।

तस्यैष आत्मा वृणुत इति मन्त्रानुशासनात् ।
पराञ्चिखानि देवेशो व्यावृणोत्परमेश्वरः ।। ३१ ।।

तस्माद्ब्रह्मादयो देवा मोहिताः शिवमायया ।
तेनैव सुकरो मार्गो दर्शितः शूलपाणिना ।। ३२ ।।

सर्वेषां भाति(भूति)लाभाय मुक्तयेऽपि च शाश्वतः ।
अग्निरित्यादिभिर्मन्त्रैस्त्रिकालं भस्मधारणम् ।। ३३ ।।

त्र्यायुषेण मन्त्रेण त्रिपुण्ड्रस्य च धारणम् ।
त्रियम्बकेण मन्त्रेण रुद्राक्षाणां च धारणम् ।। ३४ ।।

पञ्चाक्षरेण मन्त्रेण त्रिकालं लिङ्गपूजनम् ।
रुद्राध्याय जपश्चैव त्रिकालं सावधानतः ।। ३५ ।।

बिल्वपत्रैर्महादेवपूजनं सोमवासरे ।
कालाष्टम्यां महादेवपूजनं बिल्वपल्लवैः ।। ३६ ।।

चतुर्दश्यामपामार्गैर्निशिबिल्वैश्च पूजनम् ।
अस्तदोषे प्रदोषे च बिल्वैर्लिङ्गस्य पूजनम् ।। ३७ ।।

शिवक्षेत्रनिवासश्च अविमुक्ते विशेषतः ।
शिवभक्तार्चनं वापि भोगभाग्यैर्यथारुचि ।। ३८ ।।

शिवोत्सवादिदर्शश्च शिवाश्रमनिषेवणम् ।
शिवध्यानं महामूर्तेः साम्बस्य च विशेषतः ।। ३९ ।।

नृत्यमानं त्रयीनेत्रं साम्बं चन्द्रकलाधरम् ।
नीलकण्ठं च सानन्दनन्दिभृङ्गिनिषेवितम् ।। ४० ।।

गणेशस्कन्दजनकं ध्यायेद्देवं महेश्वरम् ।
क्षणार्धं वा तदर्धं वा स मुक्तो भवति ध्रुवम् ।। ४१ ।।

एवं भक्तिर्विरूपाक्षे यस्याऽसाधारणी भवेत् ।
स तरत्येव संसारमसारं जन्ममृत्युदम् ।। ४२ ।।

सा कथं जायते स्कन्द कलिस्थानां विशेषतः ।
नृणामत्यन्तपापानां सङ्कराणां दुरात्मनाम् ।। ४३ ।।

कलेः स्वरूपमधुना वद शङ्करसम्भव ।
त्वत्तो नान्यो रहस्यज्ञो गुरुर्मे नास्ति कश्चन ।। ४४ ।।

तस्मात्त्वां परिपृच्छामि इच्छाप्रश्ननिरूपणे ।। ४५ ।।

इति मुनिवचनं निशम्य हर्षा-
दभवसूनुः कमलच्छदाच्छनेत्रः ।
मुनिमानसहर्षवर्षधारा-
वरकेकारवचातकोऽभ्युवाच ।। ४६ ।।

।। इति श्रीशिवरहस्ये नवमांशे मुनिवाक्यं नाम तृतीयोऽध्यायः ।।

।। चतुर्थोऽध्यायः ।।

स्कन्द उवाच

यदपृच्छि त्वया तात प्रश्नमेतन्मनोहरम् ।
सर्वलोकोपाकाराय कैलासे शङ्करालये ।। १ ।।

मणिसौधसहस्राढ्ये रत्नप्राकारविस्तृते ।
मणिमण्डपसाहस्रैर्निचिते खचितोपले ।। २ ।।

नवरत्नमणिज्योतिः प्रभाकीलितदिङ्मुखे ।
वैडूर्यसूत्रान्तरगकान्तिकाञ्चितदिक्तटे ।। ३ ।।

हरिद्धरिमणीगर्भसच्छन्नामलभूतले ।
मणिगोपुरगोद्भासि कलशद्योतिताम्बरे ।। ४ ।।

चलत्पताकानिवहसंवहोद्भूतवातके ।
सभाविभासिनटनकम्पिताखिलभूतले ।। ५ ।।

मणिधारा महोदारा दूरीकृततमस्ततौ ।
(महोदारमणिज्योत्स्ना दूरीकृततमस्ततौ ।)
प्राकारगोपुरोत्तुङ्गगोपुङ्गव विराजिते ।। ६

मणिगर्भशिवागारसंशोभिसुमनोहरे ।
कैलासेशमहालिङ्गतुङ्गधामोपशोभिते ।। ७ ।।

पञ्चगङ्गातटोद्भासिलिङ्गपङ्क्ति विराजिते ।
तत्तीरसुमनोहारि रत्नसोपान संयुते ।। ८ ।।

अम्बिकाशालयोद्दाम कुम्भदीधितिदीपिते ।
नन्दिकेशादिगणपकृततूर्यरवैर्युते ।। ९ ।।

गणेशस्कन्दसदनसानन्दगिरिमस्तके ।
देवीश्वरमहाधामधगद्धगितदिक्तटे ।। १० ।।

महागिरिवरोत्तुङ्ग रत्नसौधविराजिते ।
माणिक्य खचितोदार तारहीरविराजिते ।। ११ ।।

इन्द्रनीलमहाकान्तिनीलकालकिताम्बरे ।
नन्दनानन्दनशतसुचन्दनवनावृते ।। १२ ।।

तमालसालविपिनमध्यप्रासादशोभिते ।
हरिन्मणिमहारम्भाचलत्पत्रशतावृते ।। १३ ।।

रत्नतालीवनोद्दाम घर्घरातुलमारुते ।
महासरोवरोद्भासिफुल्लनीरजशोभिते ।। १४ ।।

रत्नकल्हारकुमुदशत्रपत्रविराजिते ।
चम्पकाशोक कादम्बबिल्वनागवनावृते ।। १५ ।।

भ्रमद्भ्रमरतत्पुष्पगुच्छाच्छादितमस्तके ।
नानापक्षियुतापाररुतानन्दितकन्दरे ।। १६ ।।

मृगमातङ्गशरभसारङ्गमहिषावृते ।
चमरी सृमरोद्दण्डकोलकूलैश्च शोभिते ।। १७ ।।

मयूरशुककारावपुंस्कोकिलविनादिते ।
सिंह्मर्क्षवृकशार्दूलवनगोखड्गशोभिते ।। १८ ।।

गणवक्त्रमहातूर्यदुन्दुभ्याधातनादिते ।
मृदङ्गशङ्खनिनदसुनादितदिगन्तरे ।। १९ ।।

वीणावेणुस्वनाकीर्णे महाकैलासपर्वते ।
परिधाकारसंलग्नपादमूलकसागरे ।। २० ।।

सुधासागरजोत्तुङ्गतरङ्गोत्थितशेखरे ।
वातपोतसमानीतैः पुष्परेणुसमन्वितैः ।। २१ ।।

तमालवनसंलग्नशीतवातमनोहरे ।
महानीपवनीजन्यतत्सुमोद्बुद्धमारुते ।। २२ ।।

शरत्कौमोदकीफुल्ल कुमुदामोदबन्धुरे ।
फुल्लहल्लकसंल्लासिवातवातायनैर्युते ।। २३ ।।

गलत्क्षौद्रमहाधारादयार्द्रद्रोणिभूतले ।
केतकीधूलिकापाली पाटलामोदवायुभिः ।। २४ ।।

उदग्रकुरवोद्दामपिप्पलीगन्धमेदुरे ।
महागोपुरमध्यस्थमणिसिह्मासने शिवौ ।। २५ ।।

चिक्रीडतुस्ततस्तस्मिन्महाकैलासपर्वते ।
कदाचिद्धीरफलकमञ्चमध्यस्थितः शिवः ।। २६ ।।

देव्यास्ते सुमनोद्दामभूषणो गिरिसानुषु ।
क्वचित्प्रासादमध्यस्थो विहरत्यम्बया शिवः ।। २७ ।।

कदाचित्सरसीमध्यसौधे मञ्चोत्तरे शिवः ।
क्वचित्सुधाफलोद्दाम वनेषु विहरेद्धरः ।। २८ ।।

कदाचिदान्दोलगतौ मुमुदाते शिवौ मुने ।
हीरसारमहासौधें वीणापाण्याम्बया सह ।। २९ ।।

तत्तन्त्रीवक्त्रसम्बद्धरागरक्तोऽम्बया युतः ।
तपनोद्दामकिरणसन्तप्ताङ्गोऽम्बया शिवः ।। ३० ।।

धारासारगृहे तुङ्गे विहरत्येव शङ्करः ।
अच्छादर्शतलाच्छिद्रगृहेषु विहरेदपि ।। ३१ ।।

चन्द्रचन्दनसंलिप्तौ शिवौ व्यहरतां वने ।
कदाचिदास्थानगतौ नन्दिभृङ्ग्यादिभिः सह ।। ३२ ।।

महाकैलासलिङ्गानि प्रासादस्थो निरीक्ष्य तौ ।
कैलासेशमहालिङ्गे करोत्यर्चनमम्बया ।। ३३ ।।

क्वचित्सभासु सन्ध्यायां नृत्यत्यानन्दनिर्भरः ।
षड्वक्त्रं गजवक्त्रं च निरीक्षति मुहुर्मुहुः ।। ३४ ।।

चि(सं)क्रीडतोस्तयोरेवं महाकैलासपर्वते ।
कस्तस्य वर्णयेदुक्त्या चित्रा लीला महेशितुः ।। ३५ ।।

त्वया यदुक्तं तद्देवी पृच्छति स्म महेश्वरम् ।
हर्षवर्षयुतं शम्भुं सुधासागरसौधके ।। ३६ ।।

शम्भुः सुधासागरमध्यगोऽम्बां
समभ्यवर्षत्करयन्त्रसेचनैः ।
सा चालिसङ्घैः स्वकराग्रसंस्थ-
धाराभिराच्छादयदीश्वरार्कम् ।। ३७

सितासितसुपाटलीपटलकुन्दमन्दारज
रजोद्धतमरन्दपभ्रमणशीतमन्दानिले ।
वसन्तसमयोल्लसद्द्विजदिनान्तसंन्मल्लिका-
लतागृहनिकुञ्जभूप्रथितमञ्चतल्पे शिवः ।। ३८ ।।

मञ्चे सिञ्चति पुष्पसारसलिलैर्देव्यास्त सन्मल्लिका-
सरभ्रममधुव्रतप्रकटमोदधारायुतम् ।
अनल्पकुसुमोच्चयप्रथयमानतल्पेऽम्बिका-
रिरंसयति कोकिलामधुरकाकलीनां रवैः ।। ३९ ।।

परिमलमिलदालीफुल्लमल्लीकवल्ली-
चलदनिलकुलायोड्डीनपत्राण्डजैश्च ।
मधुरवरसुजाजीमुल्लि धम्मिल्लभल्ली-
कृतसुमशरवल्लीलीलयामास शम्भुः ।।

मल्लीकुड्मलजं निचोलमचलाधीशाङ्गजाङ्गे हरः
पश्यन् तद्वदनं मुदा पुरहरः सीमन्त सीमान्तकम् ।
नैत्रैः स्वैरनिमेषकैः प्रतिदिनं स्वीचक्र ईशो हरः ।। ४१

तोषोन्मेषमिषेण सा त्रिभुवनाधीशं जुषत्तं हृदा
पुष्पाशेषविशेषशोषितगरं भूषाकृताहीश्वरम् ।
कालाशेषजगत्क्रियादिविषमव्यापारसारादरं
सा देवी विषयेषु सक्तहृदयं वाचाविशेषेण तु ।। ४२

शिव उवाच -

भो भर्ग सर्वजगसर्जक(?) पापवर्ग-
सम्भर्ज-कोरुभवतुर्जक भोगवर्ज ।

दुर्जीविजातजनुषां कलिचित्रकृत्यं
शम्भो त्रिणेत्र वद मे करुणा यदि स्यात् ।। ४३ ।।

स्कन्दः उवाच -

तद्देवीवचनेन चारुवदनाम्भोजो मुदा शङ्करः
ध्यानोद्बुद्ध समस्तकाल जगतां व्यापारमूचे हरः ।
पश्यंस्तद्वदनाम्बुजं गिरिवरे सैधोरुमञ्चास्थितो-
ऽमुञ्चत्स्वां करुणासरीभरदृशा सद्धर्षवाचं तदा ।।४४ ।।

धन्यां मान्यां मनोज्ञां त्रिभुवनजननीं शैलराजेन्द्रकन्यां
[1]सीमन्तिन्यां वरिष्ठां मम हृदयमहानन्दवन्यां च जन्याम्[2] ।
मन्ये चित्तेऽपि नान्यां तव सदृशमहारूपसम्पत्समृद्धां
स्वर्धुन्यां वा विशिष्टां भगवति भवतीं नान्थैतच्छृणु त्वम् ।।

।। इति श्रीशिवरहस्ये नवमांशे मुनिवाक्यं नाम चतुर्थोऽध्यायः ।।

।। पञ्चमोऽध्यायः ।।

शिव उवाच

शृणु पद्मामलोत्फुल्ललोचने पर्वतात्मजे ।
त्वमेव शक्तिः परमा कालचक्रप्रवर्तिका ।। १ ।।

त्वमेव परमासिद्धिः त्वं स्वाहा त्वं स्वधाशिवे ।
त्वमेव ब्रह्मणो देवी सर्गे शक्तिकरी समृता ।। २ ।।

---

1. श्रेष्ठां सीमन्तिनीषु   2. महानन्दसन्दोहदात्रीम् ।

गीयसे त्वं पुराणज्ञैः साक्षाद्देवी सरस्वती ।
सर्वशब्दमयी विश्वं पुनासि परमेश्वरि ।। ३ ।।

त्वं विष्णौ पद्मजाशक्तिः सर्वपालनकारिणी ।
त्वया समृद्धं यत्किञ्चित्तद्वृद्धिमधिगच्छति ।। ४ ।।

त्वमेव रुद्रे परमा शक्तिः संहारकारिणी।
त्वं प्रभासि तथा भानौ दहने दहनात्मिका ।। ५ ।।

पवने चलनीशक्तिस्त्वं कान्तिः सोममण्डले ।
इन्द्रे प्रभुत्वशक्तिस्त्वं यमे दण्डात्मिका ह्यसि ।। ६ ।।

धनाधिपे निधिमयी नैर्ऋते खड्गरूपिणी ।
वरुणे पाशशक्तिस्त्वं त्वं सर्वं मातृमण्डलम् ।। ७ ।।

त्वयैव शक्तिमानस्मि अस्मिन् भुवनमध्यमे (मण्डले) ।
अमूर्तोऽहं त्वया मूर्तिं गृहीत्वा क्रीडयाम्यहम् ।। ८ ।।

लोकमेनं महादेवस्तस्मान्मे शक्तिरुत्तरा ।
भुवि त्वं धारिणीशक्तिर्नदीषु स्यन्दरूपिणी ।। ९ ।।

एवं त्वन्मयमेवेदं जगच्छक्तिसमुद्भवम् ।
तस्मात्कालात्मिकाशक्तिः कालरूपं वदामि ते ।। १० ।।

शृणु त्वं सावधानेन नाख्येयं यस्य कस्यचित् ।
रहस्यमद्भुततरं नोक्तपूर्वं मयाम्बिके ।। ११ ।।

मद्धर्मवाहवृषभपादास्ते युगमूर्तयः ।
कृतत्रेता द्वापराख्यकलिकाला युगादयः ।। १२ ।।

पादसन्धिखुरा ये तु ते सर्वे युगसन्धयः ।
युगेषु धर्मवृषभः पादान् संहरति स्वयम् ।। १३ ।।

मदाज्ञावशतो देवि कालचक्रप्रवर्तकः ।
कृते चतुष्पाद्वृषभः कैलासेऽधिष्ठितः सदा ।। १४ ।।

वर्णाश्रमाङ्ग इष्टादि पूर्तधर्मोरुपादवान् ।
पूर्वपादौ वृषस्यास्य कृतं त्रेतेति विद्धि मे ।। १५ ।।

द्वापरश्च कलिश्चेति पश्चात्पादावुभावपि ।
कृते चतुष्पदा तिष्ठेद्वृषभो मेऽग्रतः सदा ।। १६ ।।

कैलासे तेन धर्मोऽपि सात्त्विकः सम्प्रजायते ।
देवतिर्यङ्मनुष्येषु नृपेषु भुविचाम्बिके ।। १७ ।।

तपस्विषु दमो दानं संविभागो यथारुचि ।
इज्याध्ययनसम्पत्तिः क्रोधमात्सर्यवर्जनम् ।। १८ ।।

ब्राह्मं कृतयुगं प्रोक्तं ब्राह्मण्यं तत्र वर्धितम् ।
त्रिपुण्ड्रधारणं पुण्यं अग्निरित्यादिमन्त्रतः ।। १९ ।।

भस्मनो धारणं गौरि तथा रुद्राक्षधारणम् ।
लिङ्गार्चनं रुद्रजपः पञ्चाक्षरजपस्तथा ।। २० ।।

शापोत्सर्गोऽजयक्रोधादृषीणां वै कृते युगे ।
मरीचिरङ्गिराश्चात्रिः मैत्रावरुण एव च ।। २१ ।।

काश्यपोऽथ भरद्वाजः संवर्तश्च बृहस्पतिः ।
एते कृतयुगे देवि वेत्तारो धर्मनिश्चये ।। २२ ।।

---

१. अत्रत्येषु बहुषु श्लोकेषु दृष्यमानाः शब्ददोषाः (अतिक्रान्तव्याकृति-नियमत्वादयः) नार्थज्ञानं निरुन्धन्ति इत्यतः तत्परिहरणाय उद्यमः आदृतः ।।

राजानः सोमसूर्ये च सम्भवाः पुण्यकीर्तयः ।
हरिश्चन्द्रो मरुत्तश्च मान्धाता सगरः पृथुः ।। २३ ।।

अनरण्यो नृगो बभ्रुरयुतायुः शिबिस्तथा ।
एषु शासत्सु पृथिवी सदासस्योरुमालिनी ।। २४ ।।

कालवर्षी च पर्जन्यो नद्यः स्यन्दन्ति नित्यशः ।
अश्वमेधपराः सर्वे दक्षिणा बलवत्तराः ।। २५ ।।

अक्षौहिणीनां पतयः क्षोणीशाः शिवभावनाः ।
भस्मरुद्राक्षसम्पन्ना लिङ्गार्चानिरताः सदा ।। २६ ।।

अनरण्ये महीपाले नारण्यानी ह्यभूश्च भूः ।
निर्दस्युराष्ट्रा राजानो यायजूकाः प्रियंवदाः ।। २७ ।।

दातारो रक्षितारस्ते जेतारः समरे रिपून् ।
गोरक्षरसवाणिज्यवश्या वैश्याः कृते युगे ।। २८ ।।

शूद्राः शिश्रूषवः सर्वे त्रिषु वर्णेषु नित्यशः ।
नरा नार्यो विशः शूद्राः सत्यनिष्ठाः कृते युगे ।। २९ ।।

न स्वैरिण्यो नानृतकाः सर्वे धर्मप्रभावनाः ।
मानवो हि कृते धर्मः श्रुतिप्रोक्तो विशिष्यते ।। ३० ।।

वर्णाश्रमास्तथा सर्वे स्वे स्वे कर्मण्यधिष्ठिताः ।
एवं कृतयुगे धर्मः पश्य देवि प्रवर्तते ।। ३१ ।।

दया दाक्षिण्यसंयुक्तस्त्र्यक्षपादानुवर्तनात् ।
एतत्ते सङ्ग्रहेणैव कृतधर्माः प्रकीर्तिताः ।। ३२ ।।

कृते सुकृतराशयो भुवि भवन्ति सर्वेष्वपि
न चानृजुकुकापथो भवति कश्चिदेवेह मे ।
पदाम्बुदसमर्चको भवति लोकमालोकय
श्रुतिप्रकटितं वृषो भवति तेषु चायुः परम् (?)।। ३३ ।।

शतायुरभवं सदा भवपादाम्बुजराधनात्
सुनिश्चितमिदं शिवे सुकृतमेतदालोक्यताम् ।
कदाचिद(पि च)महीयते न तु स वृद्धिमेतिद्रुतं
तपस्विजनवल्लभः परमदुर्लभोऽयं युगः ।। ३४ ।।

।। इति श्रीशिवरहस्ये नवमांशे मुनिवाक्यं नाम पञ्चमोऽध्यायः ।।

।। षष्ठोऽध्यायः ।।

ईश्वरः (उवाच)

त्रेतासु वृषभो मध्य त्रिपादग्नेः प्रतिष्ठितः ।
कैलासे संवसेद्देवि पादोनं ह्रसते ततः ।। १ ।।

इज्याप्रतिग्रहक्षात्र कृषिगोरक्षसेविताः ।
ब्राह्मणाः क्षत्रिया वैश्यास्तथा शूद्राश्च सङ्कराः ।। २ ।।

सात्विको रजसामिश्रो गुणस्तेषु प्रजायते ।
इज्यैव वर्धते लोकेऽहिंसयैवाम्बिके तदा ।। ३ ।।

वर्तयिष्यन्ति मुनयः श्रुत्युक्ताचरातत्पराः ।
भृगुश्च जमदग्निश्च वसिष्ठश्च पराशरः ।। ४ ।।

कात्यायनो जामदग्न्यो विश्वामित्रादयो द्विजाः ।
क्षत्रियाश्च द्विजाः सर्वे तत्र धर्मप्रवर्तकाः ।। ५ ।।

वर्णाश्रमेषु कथिताः तत्र संवर्तकोदिताः ।
तपः फलमयं तत्र इज्या स्वर्गार्थमेव हि ।। ६ ।।

तत्रापि भस्मनिरताः त्रिपुण्ड्राङ्काः द्विजाः सदा ।
रुद्राक्षधारिणः सर्वे रुद्रसूक्तजपादराः ।। ७ ।।

पञ्चाक्षरपराः सर्वे रुद्रलिङ्गार्चनप्रियाः ।
रुद्रक्षेत्रनिवासास्ते त्रेतायां भक्तितत्पराः ।। ८ ।।

सोमसूर्यान्ववाये च राजानो भूरिदक्षिणाः ।
ययातिर्नहुषो रन्तिदेवोऽथ (तृणबिन्दुकः) तृणबिन्दुकः ।।

भगीरथो दिलीपश्च रामो दाशरथिस्तथा ।
सोऽप्यगस्त्यान्मनुं प्राप्य भस्मरुद्राक्षभूषणः ।।
जपं[1] नाम सहस्रं मे रावणं विददार हि ।। ११ ।।

विजिगायासुरा[2]न्रामो [3]मेधेनायजदीश्वरम् ।
विरजाः[4] पापकर्मभ्य इभ्या लोकाः सदैव हि ।। १२ ।।

शूद्राः शुश्रूषवः सर्वे सर्ववर्णेषु नित्यशः ।
स्त्रियः पतिव्रताः सर्वाः वर्णिनः पर्णभोजनाः ।। १३ ।।

अपर्णापतिपादाब्जे तूर्णसम्पूर्णदृष्टयः ।
गृहस्थाः स्वस्थचित्तास्ते विश्वस्ता धर्मवृत्तयः ।।

---

1. जप्त्वा । 2. जिगाय राक्षसान्राः । 3. अश्वमेधेन ।
4. विरतैः पापकर्मभ्य एष्या लोकाः सदैव हि ।

तेषां गर्वापहाराय धर्मसंस्थापनाय च ।
मत्पादाब्जे तथा (सदा) भक्तिं विष्णवे तां ददाम्यहम् ।।

तया भक्त्या युतो विष्णुरवतारेषु मां यजन् ।
लब्धचक्रस्तदा दैत्यान्निहन्ता देवसत्तमैः ।। २६ ।।

एवं त्रेतायुगमुखे कृतो धर्मो मयाम्बिके ।
सात्त्विको रजसा मिश्रो मिश्रो धर्मः प्रवर्तते ।। २७ ।।

क्षात्रं त्रेतायुगं प्रोक्तं तत्र क्षत्रियवर्धनम् ।। २८ ।।

त्रेतास्वग्नित्रितयजनितः श्रौतधर्मो मखेज्या
वाणिज्ये च प्रभवति जनो यायजूकः सदैव ।
श्रीरुद्रार्चा श्रुतिजसुमहत्पापसन्तापहीनो
लोकः शोकैर्विहीनो भवति युगवरे पश्य देवीश्वरी त्वम् ।।

।। इति श्रीशिवरहस्ये नवमांशे मुनिवाक्यं नाम षष्ठोऽध्यायः ।।

वन्याः सन्यासिनोऽमीशे [1]तपसैव प्रवर्तिनः ।
रुद्राक्षभस्माभरणशरणाः शिवपूजने ।। १५ ।।

करुणाविष्टहृदया मरणेऽपि प्रतिक्षणम् ।
अयुतं तेषु चायुर्हि तपो धर्मोऽपि वर्धते ।। १६ ।।

स्वाध्यायशरणाः सर्वे शिवध्यानहताशुभाः ।
नद्यश्च नित्यं स्यन्दन्ते फलन्ति वनराजयः ।। १७ ।।

घटोध्न्यश्च तथा गाव सर्वे धर्मैकजीवनाः ।
शिवैकदेवाः सर्वेऽपि शिवार्चनपरायणाः ।। १८ ।।

देवा हविर्भुजः सर्वे सर्वदा शर्वपूजकाः ।
त्रिणेत्रपूज्यपादाब्जध्यायिनः सत्रजीविनः ।। १९ ।।

दैत्याः शर्वार्चनिरताः सर्वदा समरोद्धताः ।
कृते हिरण्यकशिपुर्हिरण्याक्षश्चवृत्रकः ।। २० ।।

एते वै दैत्यराजानो मयैव प्रेरिताः शिवे ।
गर्वनिर्वापणार्थाय सुराणां च पदे पदे ।। २१ ।।

त्रेतायुगे रावणश्च बलिः प्रह्लाद एव च ।
नमुचिश्चैव जम्भश्च नृपो दैत्यांशजास्तथा ।। २२ ।।

गर्वापरहणार्थाय सुराणामेव तेऽम्बिके ।
मया सृष्टा विशिष्टास्ते मम पूजापरा हि ते ।। २३ ।।

राजसास्तामसा ह्येते सुरेषु प्रभविष्णवः ।
यदा तैर्निजिता देवास्तदा मम सपर्यया ।। २४ ।।

---

1. तपस्येव

।। सप्तमोऽध्यायः ।।

ईश्वर उवाच -

द्वापरोक्तानिमान्धर्मान् शृणु त्वं नगकन्यके ।
पाश्चात्यपादः कैलासे वृषो धर्मःस्थितो भवेत् ।। १ ।।

राजसा गुणः(तः) सर्वे भवन्ति युगसम्भवाः ।
जीवन्ति च सहस्रं ते तद्गुणेनैव पार्वति ।। २ ।।

तेऽर्चयन्ति विरूपाक्षं रुद्राक्षाभरणा नराः ।
भस्मदिव्यत्रिपुण्ड्राङ्का रुद्राध्यायार्थपारगाः ।। ३ ।।

पञ्चाक्षरपराः सर्वे शिवलिङ्गार्चनप्रियाः ।
ब्राह्मणाः क्षत्रिया वैश्या शूद्रा नार्यश्च सङ्कराः ।। ४ ।।

शाङ्करा एव सर्वेऽपि द्वापरे तपसि स्थिताः ।
वर्णाश्रमाचाररता द्विजाः सौम्याः प्रभावतः ।। ५ ।।

गर्गः पराशरो धौम्य उपमन्युर्दधीचकः ।
कण्वश्च गौतमश्चैव दुर्वासा दत्त एव च ।। ६ ।।

सर्वे शर्वार्चका विप्रा भस्मरुद्राक्षभूषणाः ।
तरुणेन्दुकलामौलिलिङ्गार्चन परायणाः ।। ७ ।।

गृहस्था यतयश्चैव वर्णिनो वनजीवनाः ।
स्वाश्रमाचारनिपुणा पुण्याः सर्वेऽपि राजसाः ।। ८ ।।

तत्र धर्मः प्रवर्तेत शङ्खोल्लिखितचोदितः ।
राजानस्तत्र सुजना गयश्चैव उदावसुः ।। ९ ।।

कुरुः पूतः शतायुश्च पुरुजिद्भरतस्तथा ।
यादवो वासुदेवोऽथ रामोऽपि बलभद्रकः ।। १० ।।

दुर्योधनादयः सर्वे धार्तराष्ट्रा महौजसः ।
देवासुरसमुद्भूता द्वापरे विग्रहे[1] रताः ।। ११ ।।

अन्योन्यमुपहिंसन्तो रजसा तामसेन च ।
यथासम्भवधर्मेण वर्तन्ते द्वापरे नृपाः ।। १२ ।।

सर्वराष्ट्रेषु देशेषु विषयासक्तचेतसः ।
तेष्वहं तामसीं वृत्तिं ददामि प्रतिजन्मनि ।। १३ ।।

यायजूका वदान्यास्ते दातारो द्वापरे नृपाः ।
वैश्याः कृष्युपभोक्तारो गोवाणिज्यरसक्रियाः ।। १४ ।।

आढ्या मीढुष्टमार्चायां निरताः शूद्रजातयः ।
स्त्रियः सत्यस्तथा सर्वे शुश्रूषानिरताः सदा ।। १५ ।।

काले वर्षति पर्जन्य उर्वरा शर्वपूजया ।
रसयुक्ताऽभवत्तस्मिन्युगे वै संयुगे[2] रताः ।। १६ ।।

वियोगरहिताः सर्वे योगयुक्ताः सदैव हि ।
योगैर्देवान्यजन्त्येव त्यजन्ति कलहं नराः ।। १७ ।।

कुलजाश्च नराः सर्वे जायन्ते धर्मदृष्टयः ।
विसृष्टयः प्रजायन्ते शिपिविष्टपदाश्रयात् ।। १८ ।।

1. विग्रहे - कलहे ।
2. संयुगे - युद्धे । अन्योन्यसम्बन्धे च ।

इष्टापूर्तमहाधर्मो ह्यभिवृद्धो भविष्यति ।
तस्मिन्नृपाः शान्तनवा यादवाः पृथिवीभुजः ।। १९ ।।

पाण्डवा व्यासपौत्रास्ते अक्षैः सन्त्यज्य भूमिकाम्[1] ।
वने वन्येन जीवन्ति त्र्यक्षार्चामहिमावशात् ।। २० ।।

पुनस्ते पृथिवीं प्राप्य धार्तराष्ट्रैश्च विग्रहम्[2] ।
उग्रप्रसादात्कृत्वैव निग्रहं वीर्यवत्तराः ।। २१ ।।

बभुजुः पृथिवीं तेऽपि यायजूकाः प्रियंवदाः ।
अश्वमेधेन देवेशं साक्षान्मेघपतिं शिवम् ।। २२ ।।

यजन्ति शिवलिङ्गेऽपि वासुदेवेन चाम्बिके ।
उपमन्युप्रसादेन कृष्णो यदुकुलोद्भवः ।। २३ ।।

लेभे स परमां सिद्धिं मल्लिङ्गार्चाबलेन हि ।
विजिग्ये बलिजं बाणं दोःसहस्रैकजीवनम् ।। २४ ।।

तथान्यान्मुरकेश्यादीन्नरकं दैत्यनायकम् ।
मथुरामास्थितो देवि द्वारवत्यामपि स्थितः ।। २५ ।।

अश्वत्थामा द्रोणसुतो मम पूजाप्रभावतः ।
मया दत्तेन खण्डेन (खड्गेन)जिगायारीन्रणे तदा ।।

लेभे स परमां सिद्धिं लोकेऽद्यापि प्रदृश्यते ।
द्वापरान्तेऽपि नृपतिः पारीक्षिज्जनमेजयः ।। २७ ।।

अश्वमेधेन देवेशमियाज हि मखेन हि ।
पितरं तक्षकोद्भूतविषेणोद्वीक्ष्य तं नृपम् ।। २८ ।।

---

1. भूमिकां - भूमिं, राज्यम् । 2. युद्धम् ।

तक्षकः शक्रसाहाय्यान्मोचितो नृपसूनुना ।
द्वापरे धर्मनैपुण्यपुण्यपैण्यैकजीवनाः ।। २९ ।।

अरण्येषु विशेषेण तपसा शोषयन्ति च ।
ऋषयः कृषिवाणिज्यमृषावादपराङ्मुखाः ।। ३० ।।

सुमुखाश्च तथा लेखा द्वापरेऽपारदर्शिनः ।
सज्जमाना यथाजोषं[1] (ते) यजमाना मखेष्वपि ।। ३१ ।।

विषयेष्वपि कामाय वासनाकामवासनाः ।
भवन्ति द्वापरजना द्विपाद्धर्मोऽत्र तत्र हि ।। ३२ ।।

द्वापरे धर्मरूपात्मा महान्धर्मवृषोऽम्बिके ।
प्रभवत्येव सहसा कालचक्रप्रवर्तकः ।। ३३ ।।

युगसन्धिषु वर्षाणां सहस्रं तद्युगानुगम् ।
यौगिकं सम्प्रवर्तेत तत्तद्युगभवं गुणम् ।। ३४ ।।

दशलक्षं कृते सङ्ख्या त्रेतायां पञ्चलक्षकम् ।
द्वापरस्तु त्रिलक्षः स्यात् कलिः प्रोक्तो द्विलक्षकः ।। ३५ ।।

एवं युगानां परिवर्तमानैः
शतैश्च कल्पो भविताम्बिके तदा ।
कल्पैः शतैस्तत्र विधेस्तथायु-
स्तस्यायुषोऽन्ते हरिणो ह मानम् ।। ३६ ।।

---

1. To their satisfaction.

एवं हरेस्तत्प्रतिभैश्च कल्पै
रुद्रस्य चैवायुरितिस्मराम्बिके ।
एवं मनूनामथ भूतभव्य-
मानं ऋषीणामथ शक्रसङ्ख्या ।। ३७ ।।

प्रोक्ता पुराणेषु विशेषतोऽम्बिके
तस्मात्त्वया हं किल कालहीनः ।। ३८ ।।

निमेषोन्मेषो मे युगशतगतीनां प्रविलयो
हरिब्रह्मेशानां शतमखमनूनां दिविषदाम् ।
ऋषीणां सप्तानां भवति परिमाणं किल शिवे
मता कालस्येयं गतिरपि जगन्नश्वरमिदम् ।। ३९ ।।

।। इति श्रीशिवरहस्ये नवमांशे द्वापरधर्मकथनं नाम सप्तमोऽध्यायः ।।

।। अष्टमोऽध्यायः ।।

कलेः स्वरूपं वक्ष्यामि त्वं देवि शृणु हर्षदम् ।
यो धर्मरूपो वृषभः कैलासे त्वेकपाद्भवेत् ।। १ ।।

मुञ्जभोजौ भवेतां वै ततश्चोलाश्च षोडश ।
भस्मरुद्राक्षसम्पन्नाः शिवभक्ता महौजसः ।। २ ।।

शिवालयकराः सर्वे देशे राष्ट्रे च चोलके ।
सह्यजातीरनिलया राजानो द्राविडाधिपाः ।। ३ ।।

चेराः पञ्चशतं देवि राजानः पाण्ड्यवंशजाः ।
मलयध्वजसम्भूता यत्र जाता त्वमेव हि ।। ४ ।।

हालास्यनिलया देवी मीनाक्षी सुन्दरेश्वरः ।
अहमेव महालिङ्गे निवासामि कलौ शिवे ।। ५ ।।

भविष्यन्ति महीपालाश्चेरे चोल च पाण्ड्यके ।
शिवभक्ता नराः सर्वे तेषु शासत्सु शङ्करि ।। ६ ।।

सहस्रवत्सरे सर्वे शालिवाहनविक्रमौ ।
ततश्चोलाः कलौ पाण्ड्याः सहस्रद्वितयं शिवे ।। ७ ।।

भविष्यन्ति महीपालास्ततः शूद्राश्च शङ्कराः ।
आन्ध्राणां नृपषट्कं वै नृपाणां वै भविष्यति ।। ८ ।।

आर्यावर्ते विमुक्ते च कुरुक्षेत्रे विशेषतः ।
म्लेच्छा भूमिभुजः स्वैरं भविष्यन्त्यल्पमेधसः ।। ९ ।।

पञ्चाशतं वत्सराणां शूद्रामाण्डलिका नृपाः ।
दस्युप्राया भविष्यन्ति धर्मोच्छेदकराः कलौ ।। १० ।।

म्लेच्छाचारपराः सर्वे दरिद्राश्च द्विजातयः ।
भविष्यन्त्यल्पमतयो यतिस्तत्र भविष्यति ।। ११ ।।

शिवे मदंशसम्भूतः शङ्करः शाङ्करोत्तमः ।
चतुर्भिः सहशिष्यैश्च कलाववतरिष्यति ।। १२ ।।

तस्मैचोपनिषद्विद्या मया दत्ता महेश्वरि ।
भूमौ पाषण्डषण्डानां खण्डनं स करिष्यति ।। १३ ।।

कलावपि महादेवि हरदत्ताभिधो द्विजः ।
अशैवदण्डनार्थाय भविष्यति महीतले ।। १४ ।।

दीक्षितोऽपि भवेत्कश्चिन्मदंशो भूसुरोऽम्बिके ।
भूसुराचारनिरतः स वै छन्दोगवंशजः ।। १५ ।।

शैवशास्त्रं तथा भूमौ लुप्तं विस्तारयिष्यति ।
अन्येऽपि भक्त्या देवेशि देशे चोले च पाण्ड्यके ।। १६ ।।

भविष्यन्ति महाभक्ता मयि सर्वासु जातिषु ।
त्रिषष्टिपरिमाणास्ते प्रमाणा भक्तिहेतवे ।। १७ ।।

सुन्दरो ज्ञानसम्बन्धस्तथामाणिक्यवाचकः ।
तेषु मुख्यास्त्रयोऽपीमे तच्चरित्रं वदामि ते ।। १८ ।।

अगस्त्यो मम भक्तो हि तथान्ये ब्राह्मणर्षभाः ।
भवभक्ता भविष्यन्ति कलावपि तपोबलात् ।। १९ ।।

सह्यजातीरलिङ्गानां महिमात्यद्भुतं शिवे ।
वर्णयन्त्येव ते देवी [1]अगस्त्योक्तेन भाषया ।। २० ।।

[2]द्राविडेनैव देवेशि मयि (मम) तत्प्रीतिदायकम् ।। २१ ।।

राजानः किल दस्युवंशजनिताः पापास्तथा माण्डला
विप्रदोहपरायणाः शिवमहालिङ्गालयोच्छेदकाः ।
रुद्राक्षामलभस्मधारणमहालिङ्गार्चनावर्जिता
लोके केवलतामसाः प्रतिकलौ जायन्त एवाम्बिके ।। २२ ।।

तन्नैवेद्यविवर्जिताः प्रतिकलौ सद्विद्यया वर्जिता
दुष्टाः शिष्टसमा इवात्र सुमहाकष्टैकनिष्ठाः शिवे ।
सन्तुष्टाः शिवनिन्दया हरमहाश्रीलिङ्गसाम्यार्चया
ते चक्रोपलतप्तचक्रसुमहास्फालोर्ध्वपुण्ड्रा जडाः ।। २३ ।।

कर्मन्दिनोऽपि विरला हरपादपद्म-
सम्पूजका भसितफालततत्रिपुण्ड्राः ।
वेदान्तशान्तिगुरुपूजनसक्तचित्ता
मत्ता इव प्रतिगृहेषु च भिक्षितान्नाः ।। २४ ।।

ऊर्वी निर्वियतान्ताकलिमलजलाऽनिष्टनिष्ठानयुक्ता
शिष्टाचारैकनिष्ठक्षुभितनृपशतैर्म्लेच्छतुच्छप्रतिषठा ।
सत्ये निःसत्वता धीर्जनजनुरफलं षण्डपाषाण्डधर्मो
नो कश्चित्प्रभवेत शङ्करपदध्यानानुरक्तः कलौ ।। २५ ।।

हूणाः स्यूणकराश्च शोणितमुखा भ्रूणप्रभाभाविताः
गीर्वाणानपि जेतृशक्तिनिवहैः पाषाणपाणीगणाः ।

---

1. अगस्त्यमुनिभाषया 2. द्राविड्या देवि ते भक्त्या ।

घोणाधर्धरसाम्यवाद्यजमहानिःसाणविश्राणिनः
क्षोभायाब्धिषु सञ्चरन्ति हि कलौ नीलाजिनी[1]भूषणाः ॥ २६

नित्यानुष्ठानतुष्टो न भवति हि जनस्तुष्टिपुष्ट्या वियुक्तो
भ्रष्टः शिष्टविनिन्दकः कलियुगे ज्येष्ठार्चनावर्जितः ।
दारिद्र्यार्णवमध्यगस्त्वनुदिनं [2]द्रापी(पः) प्रभावर्जित
द्रव्याद्रवितमुद्रिताखिलतनुर्भ्रान्तोऽत्र सम्मुह्यति ॥ २७ ॥

कलिकुलकलनाकलाकुलौघ
प्रभवाकीलितकालकोलमूले ।
मृगबालधरं जनो भजेत्किं
जितकालं वरहस्तशूलजालम् ॥ २८ ॥

पापानुतापमतिभाक् सुकरो नरः किं
दुष्टोरुसूकरसभः स तु रासभोऽपि ।
भूभार एव कुनरः कलिकालजातो
मारारिपादकमलोदरदूरभृङ्गः ॥ २९ ॥

सन्तप्तक्रकचोपमानसुमहाचक्राङ्कमुद्राञ्चितो
नक्राकारकुवक्रफालतिलको भूयाज्जनो वै कलौ ।
तेनाऽऽक्रान्तजनेन दुर्जगदिदं शक्रेऽपि वित्रासकं
उत्क्रान्त्युत्तरगर्जनोघमगतौ तक्राम्बुवत्क्रोशकम् ॥ ३० ॥

॥ इति श्रीशिवरहस्ये नवमांशे कलिवर्णनं नामाष्टमोऽध्यायः ॥

---

1. अजिन अजिनी a sort of leather bag. 2. A fool an idiot.

।। नवमोऽध्यायः ।।

ईश्वर उवाच

पुनः कलिभवं देवि गुणं ते कथयाम्यहम् ।
नानादुराचाररताः अभक्ष्यान्नैकभक्षणाः ।। १ ।।

सुरासवरताः पापा भविष्यन्ति कलौ नराः ।
भस्मत्रिपुण्ड्रहीनाङ्गा रुद्राक्षाभरणोज्झिताः ।। २ ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
लिङ्गार्चाविमुखाः सर्वे सुमुखा विष्णुपूजने ।। ३ ।।

सालग्रामशिलासाम्यं शिवपूजां प्रकुर्वते ।
ऊर्ध्वपुण्ड्रधराः सर्वे मृदा फालोदरेऽङ्गके ।। ४ ।।

तप्तचक्राङ्किताः केचिद्व्रात्या व्रतविवर्जिताः ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। ५ ।।

वैष्णवा विष्णुपाषाण्डाः शिवोत्कर्षाऽसहिष्णवः ।
मदालयभ्रंशकरा मन्निन्दानिरताः सदा ।। ६ ।।

वर्णाश्रमपरिभ्रष्टा विष्ठाकृमिसमाः कलौ ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। ७ ।।

वेदाध्ययनहीनाश्च नेत्राग्निपरिवर्जिताः ।
दुष्टाः कष्टैकमतयः शिष्टवद्भ्रष्टधर्मिणः ।। ८ ।।

शिपिविष्टार्चनाहीना दुरदृष्टेन शङ्करि ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। ९ ।।

जाराश्चोरास्तथा घोरा दुष्पूराः स्वोदरम्भराः ।
धर्मध्वजाः द्विजाः सर्वे वृजिनेन विमोहिताः ।। १० ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
पञ्चाक्षरविहीनाश्च रुद्राध्यायजपोज्झिताः ।। ११ ।।

मत्क्षेत्रवासरहिता अन्यक्षेत्रैकवासिनः ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। १२ ।।

सोमवारे दिवा स्वेच्छाभोजनाच्छादने रताः ।
प्रदोषपूजा रहिताः सर्वदैव निशामुखे ।। १३ ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
कालाष्टम्यामिन्दुचूडपूजाध्यानपराङ्मुखाः ।। १४ ।।

भूतासु भूतनाथार्चाविहीनमनसो नराः ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। १५ ।।

मत्क्षेत्रमन्यक्षेत्रेण त्वविमुक्तं वदन्ति च ।
मन्नाममान्यनाम्नैव समं ते हि वदन्ति च ।। १६ ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
गोघ्ना ब्रह्महणो घोराः परस्वादाः शिवद्रुहः ।। १७ ।।

परापवादकुशलाः श्रुतिवृत्त्युपजीविनः ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। १८ ।।

राजानोऽर्थपराः सर्वे परान्नादा द्विजाः सदा ।
अरक्षितारो हर्तारः सङ्ग्रामविमुखाः सदा ।। १९ ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
वैश्या वेश्यापराः सर्वे तुलाचौर्येण जीविनः ।। २० ।।

गोरसानां क्रयपरा द्विजास्तण्डुलविक्रयाः ।
अफलाश्च महीपालाः फलाशा भ्रान्तिलालसाः ।। २१

परदारपराः सर्वे स्वदाररतिवर्जिताः ।
ग्राम्याहारविहाराश्च जगत्संहारकारकाः ।। २२ ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
वृक्षोच्छेदपराः सर्वे सरोवरविभेदकाः ।। २३ ।।

नदीकूपैकभेत्तारस्ते शिवालयभेदकाः ।
पापाः सन्तापबहुला बद्धाशा बहुयाचकाः ।। २४ ।।

दरिद्रा व्याधिता मूर्खा अप्रजा दुष्प्रजास्तथा ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। २५ ।।

अल्पायुषो नराः सर्वे स्त्रियो बालाबला द्विजाः ।
वर्धन्ति शूद्रा भूयिष्ठं श्रिया परमया युताः ।। २६ ।।

ब्राह्मणास्तान्धनपराः सेवन्ति निरपत्रपाः ।
स्वैरिण्यश्च स्त्रियः सर्वा विधवाश्चाप्यनेकशः ।। २७ ।।

यतयो मन्दमतयो भविष्यन्ति सहस्रशः ।
श्रमणाश्रमभूयिष्ठाः काषायालङ्कृताङ्गकाः ।। २८ ।।

भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।
शूद्रा धर्मप्रवक्तारो ब्राह्मणाः श्रवणे रताः ।। २९ ।।

त्यक्तपूर्णाश्रमाचारा निःसारास्ताः प्रजाः कलौ ।
भविष्यन्ति कलौ पापाः सततं निरपत्रपाः ।। ३० ।।

भण्डवैतण्डकुशलाः पाखण्डा गानतत्पराः ।
गणिकापरिहास्याश्च गणका गुणवर्जिताः ।। ३१ ।।

कुतर्काभ्यासकुशला कव्यहव्याशिनो द्विजाः ।
यन्त्रमन्त्रपराः सर्वे रसवादविचक्षणाः ।। ३२ ।।

वैद्याविद्यासु निपुणाः कुत्सिताश्च चिकित्सकाः ।
ज्योतिर्ज्ञानविदः सर्वे द्यूतदेवनिनो नराः ।। ३३ ।।

स्वैरिण्यः किलसञ्चरन्ति विधवा बालाबलाः केवलं
तीर्थोद्यानगिरिव्रजोत्सवमिषाद्यूनां मनोहारकाः ।
यूनश्चाप्यनुसञ्चरन्ति हि मिथस्तत्सङ्गनिष्ठाः कला-
[1]वट्टाशूलनिभाः शुभा जनपदाः केशैकशूक्ताः स्त्रियः[2] ।। ३४

---

1. Frandulent in selling food of boild rice.

2. Harlots. केशशूलाः स्त्रियश्चापि भविष्यन्ति युगक्षये (Mahabharata)

तीर्थान्यप्यतिङ्किलानि हि कलौ शैवालजालावृतान्
पश्य क्षेत्रगणं च लिङ्गरहितं चोच्छिद्य म्लेच्छधमाः ।
स्वस्यान्तर्गतकीकसानि तनुते कालस्य लीलागतेः
क्षुद्रा एव भवन्ति भोगभरिता विप्राः क्षुधार्तिं गताः ।। ३५ ।।

कलिजाः कुलजातिमानहीना
धनगर्वेण परिभ्रमन्ति नित्यम् ।
धनपोषणयोषितो(दू)रु सङ्गे
निरता एव भवन्ति केवलाघाः ।। ३६ ।।

यो धर्मश्रावकश्चेत्कलिकलुषनरान् (धियो)मर्मवक्ता स एव
नर्मोक्त्या सुखिता भवन्ति कुनरा ग्राम्यैकभोगस्पृहाः ।
धर्मं शर्ममयं दधन्ति(?)भवने चर्मावृतान्ताः प्रजाः
कर्माण्यप्रतिमानि दुष्कृतिपराण्यातन्वते केवलम् ।। ३७ ।।

नैवायुर्देशकालौ कलिकलुषनरानायसैस्तीक्ष्णशक्त्या
युक्त्या भुक्त्यानुसूक्त्या कलयति नियतं चान्तकोऽन्तायमर्त्यान् ।।
मर्त्या अप्यति सर्वशिल्पकुशलाः कौशल्यमात्रादरा
मारापारशराभिघातसुमहाधीरैकसाराः कलौ ।। ३८ ।।

म्लेच्छाचारसुचञ्चुराः कलिनरास्ते वानराः केवलं
नन्दन्त्येव सदैव हृष्टमनसस्ते पामराश्चाम्बिके ।
उच्छिष्टप्रतिभासभासितहृदा कुर्वन्ति सर्वाः क्रियाः
स्वल्पेनाद्य मदा भवन्ति च सदा सत्पात्रदानोज्झिताः ।। ३९

यवनाः सवनेषु विप्रवृन्दं
व्यसनान्यप्यसमीक्ष्य लुण्ठयन्ति ।
पिशुनाग्नि(न्नि)शितान् शुनामिव
द्रुतमीशे लशुनाशिनोऽग्रदन्तैः ।। ४० ।।

कलौ कलुषिताशया भुवि भवन्ति बालाबला
वितर्ककुशलायसानलविदग्धफालाशयाः ।
पतन्ति नरके खला मलजलाविले केवलं
शिलासु बहुलासु च क्वथिततैलदुःखाङ्गकाः ।। ४१ ।।

दृढं मृडविनिन्दया परिवृढोरुदण्डाहता
विमूढमतयः कलौ परिविशन्ति गाढं तमः ।
अनर्गल निरर्गलार्गलगलादिपादाङ्घ्रयो
लुठन्ति कमठार्भटीभटकठोरशस्त्राहताः ।। ४२ ।।

मृत्फाला भसितत्रिपुण्ड्ररहिता रुद्राक्षमालोज्झिताः
कद्रुद्रार्चनरुद्रजाप्यरहिताः पञ्चाक्षरेणोज्झिताः ।
कुर्वन्त्येव कलौ नराः कलुषया बुद्ध्यैव कर्माणि ते
भ्राम्यन्त्येव सदैव ते यमगृहे सन्तप्तचक्रोत्कृताः ।। ४३ ।।

भ्राष्टास्ते दुरदृष्टतः प्रतिकलौ विष्ठानुलिप्ताङ्गकाः
शिष्टाचारविवर्जिताष्टकरुणामूर्तेः पदार्चोज्झिताः ।
ते वै सङ्कर सूकरीखरखरीयोनीषु भूत्वा चिरं
दुष्टाः कुष्ठशरीरिणः प्रतिगृहं हिण्डन्ति कष्टोत्तराः ।। ४४ ।।

आधिव्याधि उपाधिभिर्विधिवशादाशासु हन्ता (बद्धा)शयाः
सेवन्ति(न्तो)प्रसभं कुभाण्डकनृपान्दुष्पूरविष्ठोदराः ।
ये वारांनिधिजाविलासलसितैरालस्यतस्त्यज्य वै
कैलासाचलवासिनं कलियुगे नाराधयन्ति क्षणम् ।। ४५ ।।

विश्वस्ताश्वासहीना स्वजनपरजने श्वानवृत्त्योषमाणा
योषा भूषापहाराः सततमृषवचस्तिष्यजाता मनुष्याः ।
माता पित्रोर्गुरोर्वा द्विजगविस्वजनापूर्णपोषादिहीना
आयुःशेषं क्षयन्तो विषविषयपरा मेषवन्माषवर्णाः ।। ४६ ।।

बालाबलासु बलवद्धन हारिणस्ते
नार्यो नरा भुवि भवन्ति कलिप्रतिष्ठाः ।
उद्वेजकाश्च नृषु गोषु चमूष काल
यापास्तदस्य वो सुवसुहारिणा एव (?) ।। ४७

दुरोदरदरीभराः परसुतल्पभोगादराः
सुरासवगरादरा भुवि भवन्ति नार्यो नराः ।
कलौ परमतस्कराः शिव(द)भास्करानर्चका
अहस्करविनिन्दकाः परमदुष्करास्ते नराः ।। ४८ ।।

।। इति श्रीशिवरहस्ये नवमांशे कलियुगगुणवर्णनं नाम नवमोऽध्यायः ।।

।। दशमोऽध्यायः ।।

ईश्वरः उवाच

पुनः कलियुगे घोरे वातवर्षोपसर्गकाः ।
भवन्ति च प्रजानां हि आधिव्याधिसमुद्भवाः ।। १ ।।

अकालमरणं देवि पुत्राणां पितुरग्रतः ।
उग्रानुग्रार्चकाः सर्वे दुर्गावैनायकार्चकाः ।। २ ।।

वराटिकाधराः शाकटिका वाद्यैकजीवनाः ।
चक्राङ्काश्च तथाऽपायाः सर्वे वै लिङ्गवक्षसः ।। ३ ।।

भविष्यन्ति कलौ देवि धर्मविक्रयिणो जनाः ।
दुष्टभक्ष्यप्रियाः सर्वे पलाण्डु पशुना(पिशिता)शनाः ।। ४ ।।

शूलपाषाण्डवेतण्डभण्डैः सह वसन्त्यपि ।
गणका गणिकावेश्याज्योतिर्वैद्यान्नजीविनः ।। ५ ।।

भविष्यन्ति कलौ देवि धर्मविक्रयिणो जनाः ।
भगोपजीवनाः स्त्रियः कामपराहताः ।। ६ ।।

अतिदण्डाश्च राजानो निर्दण्डाश्च महत्स्वपि ।
अपराधेऽप्यति स्वल्पे विप्रा उछाय (कृच्छ्रोप) जीवनः ।।

मठाधिपतयः सर्वे यतयो धनतस्कराः ।
भविष्यन्ति कलौ देवि धर्मविक्रयिणो नराः ।। ८ ।।

गां वाहयन्ति दुष्टास्ते हलेषु नियतं कलौ ।
शृण्वत्सु वृषळेष्वेव वेदानुच्चैर्वदन्ति च ।। ९ ।।

शिष्याः सर्वेऽपि गुरवो गुरवः शिष्यतां गताः ।
मातापित्रोरपोष्टारो भार्याबान्धवहर्षदाः ।। १० ।।

भविष्यन्ति कलौ देवि धर्मविक्रयिणो नराः ।
बालवत्सां तथा गां वै दुहन्ति क्षीरवाञ्छया ।। ११ ।।

श्राद्धे श्वशुरजामातृन् भोजयन्ति शिवेऽधमाः ।
अन्यधर्मान्नाशयन्ति स्वधर्मख्यापनाय हि ।। १२ ।।

समाजोत्सवके देवि देवानां पूजका नराः ।
शूद्रा धर्मं वदिष्यन्ति श्रमणा एव शाङ्कराः ।। १३ ।।

तीर्थान्यनुचरिष्यन्ति पाषाण्डास्तु कलौ शिवे ।
पञ्चयज्ञोज्झिताः सर्वे पञ्चपापोपजीविनः ।। १४ ।।

भविष्यन्ति कलौ देवी धर्मविक्रयिणो नराः ।
उन्मत्ता विकचामुण्डा विरूपाः पाणिवर्जिताः ।। १५ ।।

अन्धाश्च बधिराः स्तब्धा कुब्जाः पङ्गव एव हि ।
हीनाङ्गा अतिरिक्ताङ्गाः कृशाः स्थूलाः पिचण्डिलाः ।।

भविष्यन्ति कलौ देवि धर्मविक्रयिणो नराः ।
स्त्रियो बह्व्यः कलियुगे पुरुषाल्पेऽडका बहु ।। १९ ।।

गावो द्विजाश्च नश्यन्ति शूद्रहर्षप्रदो युगः ।
सरांसि चाप्रसन्नानि निष्फला वनराजयः ।। २० ।।

निःसारौषधिधान्यानि द्रव्यकार्श्यं सदा कलौ।
दरिद्रा बहवो देवि दातारो विरला भुवि ।। २१ ।।

अन्नतोयप्रदो यः स्यात्स महादानकृद्भवेत् ।
तिलतैलक्रयपराः फलानां च रसस्य च ।। २२ ।।

कम्बल क्रयणाः सर्वे द्विजा वार्धुषिका अपि ।
निरग्नयोऽथ विधुरा व्रात्याः पापपरायणाः ।। २३ ।।

दातारमवमन्यन्ते तथाऽधर्मपरायणाः ।
क्वचित्क्वचिद्भविष्यन्ति शैवाः परिमिताः कलौ ।। २४ ।।

अशैवास्तान्हनिष्यन्ति मद्यपा इव केवलम् ।
वृषलीपतयः सर्वे नरा नार्यश्च सङ्कराः ।। २५ ।।

शाङ्करः कोऽपि न भवेत्सर्वे देवार्चकाः कलौ ।
रुद्राक्षभस्मपुण्ड्राङ्कं दृष्ट्वाऽसूयापरा नराः ।। २६ ।।

ऊर्ध्वपुण्ड्रकराः सर्वे मृदा चन्दनतोऽपि च ।
वैष्णवाश्च तथा शाक्ता मद्यमांसाशनप्रियाः ।। २७ ।।

बहवस्ते भविष्यन्ति शाबराश्च कलौ नराः ।
कन्याशुल्काभिवृद्ध्यैव जीवन्त्येव कलौ नराः ।। २८ ।।

संवाहनकरा घोराः कीकटे कर्कटा इव ।
वसन्ति मधुमत्स्यादा द्विजा अपि कलौ शिवे ।। २९ ।।

एवं वर्णास्त्रयोऽपीमे सङ्कराः शूद्रभूयसः ।
वायसा इव तिष्ठन्ति कार्पासक्रयणा नराः ।। ३० ।।

डम्भाहङ्कारनिरताः क्रोधासूयापरायणाः ।
दया दाक्षिण्यरहिताः शौचाचारविवर्जिताः ।। ३१ ।।

सर्वे पशुसधर्माणो भविष्यन्ति शिवे कलौ ।
किं पुनर्बहुनोक्तेन सर्वधर्मोज्झिताः कलौ ।। ३२ ।।

नक्षत्रक्षात्रगोत्रा गणकगदगुणज्ञानिनो वैश्यवेश्या-
वश्याकर्षानुतर्षा गजहयखरगोपण्यपिण्याकभक्षाः ।
हीनाहीनेषु दीक्षाक्षपितधनधियो दीक्षितालुब्धचित्ताः
त्र्यक्षार्चाहीनचित्ता कलिमलजनुषो ह्यद्विजास्ते द्विजाश्च ।।

सीदत्कुसीदमखवेदपदार्थबोध-
वादाद्युदायुधकुतर्कसुकर्कशास्ते ।
नानामतानुगतिसप्रभवोरुगर्वाः
स्वर्गार्गलादिकुपथाः प्रभवन्ति तिष्ये[1] ।। ३४ ।।

स्वच्छन्दाश्छन्दवाक्योत्पथकथनधियश्छान्दसाश्छन्नपापाः
तुच्छास्वच्छा इवेच्छा ह्रदुदरभरणाश्छिन्नपुण्यैकपण्याः ।
पिंण्याकेऽप्यर्थयन्तो भुवि कलिजनराश्छत्रसञ्छन्नदेहा-
श्छायासत्रनिवासिनो द्विजगतौ छिन्धीतिवादेरताः ।। ३५ ।।

---

1. तिष्ये - कलौ युगे ।

कृत्याकृत्यविवर्जिताः कलिनराः श्रुत्यादिवार्तोज्झिता
व्रात्याः सत्यविवर्जिताः प्रतिगृहे वात्या इव भ्रामकाः ।
गर्हन्तः सततं धनव्रतपरं निःसृत्य गोहद्बहिः
मर्त्या हीनाश्च भृत्या भुवि कलिजननमलासक्तचित्ताः शिवे ते।।

कलिमित्रा निरपत्रपा नरा ये
असिपत्रेषु विदग्धसर्वगात्राः ।
गतपुत्रकलत्रमित्रखेदै-
रभिभूताश्च त्रिणेत्रभाववर्ज्याः ।। ३७ ।।

कलिजाः कुलजातिवर्णधर्मै
द्विजकर्मस्वपिनार्हतेऽर्हणाय ।
अकुलानकुला इवाकुला
न हि कर्मण्यपरा हि वर्णिनः ।। ३८ ।।

उन्मत्ता भुवने वसन्ति कलिजा वित्तार्थिनः केवलं
हृत्तापेन दिवानिशं स्मरशरव्यावृत्तचिता नराः ।
चिन्ताशोकशतैर्विदग्धमनसो विप्रावमानोद्यताः
क्षिप्रं ते नरकार्णवे प्रपतिता मज्जन्ति दुर्बीजजाः ।। ३९

भूपाः कूपनिवासिनो यमगृहे सम्बद्धयूपाजव-
त्पापाः कम्पितसर्वगात्रहृदयाः किम्पाक[1]तुल्याः कलौ ।
शापावेगसमान चारुकशया सम्पाततापार्दिता-
स्ते सर्वे निरपत्रपा मम महालिङ्गार्चनावर्जिताः ।। ४०

1. किम्पाक - stupid, ignorant.

रुद्रालङ्कृतवेदजपल्पमगजाकान्तोरुनिः श्वासकं
विश्वासाय न वै भवेत्कलियुगे दुस्तर्ककाव्ये रताः ।
सर्गे चापि विसर्गतः प्रवं शार्गाल[1]योनिं गता
गर्वेणैव सदेशि पापनिरतास्ते रासभा भूसुराः ।। ४१ ।।

मलाविलजलोदरीभर कुयोनितः सूकरी-
वियोनिभव जारजा भुविभवन्ति तिष्ये प्रजाः ।
द्विजा अपि निजं व्रतं खलु त्यजन्ति लिङ्गार्चनं
व्रजन्ति नरकं शिवे न भजते हि शम्भुं जनः ।। ४२ ।।

।। इति श्रीशिवरहस्ये नवमांशे कलिवर्णनं नाम दशमोऽध्यायः ।।

1. शार्गाल-सार्गाल शृगालसम्बद्धं - connected with a Jakal, rogue, an ill natured man.

।। एकादशोऽध्यायः ।।

श्रीदेव्युवाच -

हा हा शम्भो महादेव श्रुतो हि कलिविस्तरः ।
कृतत्रेताद्वापरेऽपि त्वयि भक्तिः सुदुर्लभा ।। १ ।।

अजाप्रायप्रजानां वै कुलजानां महेश्वर ।
द्विजानां बाहुजानां च स्त्रीशूद्राणां विशेषतः ।। २ ।।

कलिजानां विशेषेण निस्तारं विस्तराद्वद ।
इत्थं देव्या तदा पृष्टः स्मयमानः स्मरान्तकः ।। ३ ।।

प्राह देवीं तदा विप्र महाकैलाससौधगः ।

ईश्वर उवाच -

मा भैषिर्देवि भद्रं ते भिषग्वर्योऽस्म्यहं शिवे ।। ४ ।।

कलावपि भवेद्भक्तिः केषाञ्चित्पुण्यगौरवैः ।
ते भावैः पूजयन्त्येव भवोद्भवमतन्द्रिताः ।। ५ ।।

ते तरन्त्येव देवेशि कलावपि भवार्णवम् ।
देवाश्च मुनयश्चेमे मनुष्याः स्थावरा अपि ।। ६ ।।

कृतत्रेताद्वापरेषु तपः क्लिष्टाः सदाम्बिके ।
क्षणसिद्धौ कलौ जन्म वाञ्छन्त्येव हि नाद्भुतम् ।। ७ ।।

कलेर्गुणान्प्रवक्ष्यामि यदि स्यामयिभक्तिमान्[1] ।
सा भक्तिर्दुर्लभा देवि ब्रह्मादीनामपि ध्रुवम् ।। ८ ।।

---

1. यदि भक्तिर्मयीश्वरि ।।

प्रसादादेव सा भक्तिर्मम सर्वयुगेष्वपि ।
विशेषतः कलियुगे भवित्री क्वचिदेव हि ।। ९ ।।

जन्महन्त्री पुण्यदात्री प्रदात्री सर्वकर्मणाम् ।
फलं मोक्षं च भक्तिं च राज्यं पुत्रांस्त्रियो धनम् ।। १० ।।

पशवो धान्यनिचयमायुरारोग्यमेव च ।
कलेर्गुणान्प्रवक्ष्यामि शृणु त्वं सावधानतः ।। ११ ।।

शिष्टानिष्टकरेऽपि सम्प्रति कलेरेको विशिष्टो गुणः ।
कृत्याकृत्यगुणागुणेषु सुमहावृद्धिर्भवित्री कलौ ।। १२ ।।

नैवान्येषु युगेषु तत्त्रिगुणितं ध्यानार्चनावाजपो ।
भूयात्सत्यमिदं विशिष्ट इति तं जानाम्यहं तं युगम् ।। १२

एकं नन्दामि निन्दाशतमपि कुधियां विप्रवृन्देषु मन्दा-
ज्ञानानन्दमहो ददाति सुकलिर्नाम्नैव मे सर्वदा ।
किं वक्ष्याम्यगकन्यके कलिभवो यो वा क्षणार्धं मुहु-
र्मन्नामामृतपाखिनीन(पान पीन)मनस(हृदये)स मुक्तिकान्तपतिः ।।

कलिकलशगुणो यः साधुरेवायमीशे
क्षणमपि मम पूजाध्याननामैक निष्ठः ।
स हि कृतयुगत्रेताद्वापरे वा सहस्रा-
ण्ययुततपसमृद्ध्या तत्फलं नो लभेत ।। १४ ।।

क्वचित्कलिभवो नरो भुवि भवेत भाग्योदयैः
शिवार्चनपरायणः प्रथितभस्मसन्धारणः ।
स एव शरणाय वै कलिजलेषु सन्तारणः
शिवे स सुखकारणो बहुलपापसंहारणः ।। १५ ।।

सत्यं सत्यं भवानि क्षणमपि करुणाराशिवाराशिकन्या-
पतिनयनपदाब्जध्यानधारानुरक्तः ।
कलिमलकुलशैलाकारपापेषु सक्तो-
ऽप्यथ यदि शिवभक्तः सत्यमेवेह मुक्तः ।। १६ ।।

अलं कलियुगेऽम्बिके सकलतीर्थसत्कल्पका
वनैर्मखमुखक्रियासफलदान विश्राणनैः ।
अलं विविधभूसुराश्रमविचारसंवर्तनै-
रलं च सुसुखं क्रियाव्रतभवादिकार्येऽपि किम् ।। १७ ।।

नालं किं शशिशेखराम्बुजपदध्यानैकमोदं मनो
मल्लिङ्गार्चन यापितोत्तमदिनं नामैव नालं किमु ।
कः कालान्तकपूजनोत्सवमतिं क्वायं स्पृशेद्वा कलिः
संसाराम्बुधितारकारणमुमे भक्तिः परा मे कलौ ।। १८ ।।

शिवे सुकृतसाधनं कलियुगेषु लिङ्गार्चनं
वदन्ति निगमाः सदा सुगममार्गसन्दर्शनम् ।
अघौघबलतर्जनं कलिमलादिसन्तर्जनं
भवेत सुखचोदनं अ(नि)खिलदुःखसन्दीपनम् ।। १९ ।।

कलावपि तपोबलैरमितपुण्यजालोदयै-
र्भवन्ति भुवि ते नरा हरमहेशपादादराः ।
त एव खलु विस्तरं भवमहाब्धिजं दुस्तरं
तरन्ति विषयोर्मिमज्जननाशदुःखं[1] महत् ।। २० ।।

---

1. जननमरणरूपदुःखम् ।

सुरा अपि मुनीश्वरा कृतयुगादिषु ह्युद्यता-
स्तपः परमदुष्करं चिरफलं च कालेन तत् ।
अयं कलिरहो शिवे क्षणिकचित्तसंवेशना-
त्पदाम्बुजयुगे मम प्रसभमुक्तिलाभप्रदः ।। २१ ।।

कलावपि सुरा नरा जननताशमव्याहतं
विनिन्द्यमभितोऽम्बिके ह्यभिवदन्ति वाञ्छन्त्यपि ।
कदा खलु भवेद्धि नो जननमेव तिष्ये सदा
सदाशिवपदार्चने तदिह जन्मतः सत्फलम् ।। २२ ।।

यः कश्चित्प्रभवेत वै कलियुगे मल्लिङ्गपूजादरो
भस्मद्योतितपुण्ड्रफालतिलको रुद्राक्षकोटीरकः ।
श्रीरुद्रप्रवणोऽपि देवि सुमहापञ्चाक्षरावृत्तिभाक्
एवं यो नियतं वसेत स मुनिंस्तस्यैव मुक्तिः स्थिरा ।। २३

धीरस्तिष्यैकपुष्यत्कुपथजनिजरारोगनाशैकनश्य-
ल्लोके पुत्रकलत्रमित्रजठरीत्युष्यात्किलैवं शिवे ।
तत्रैवं यदि चन्द्रचूडचरणध्यानेक्षणं वा मनः
कृत्वा मृत्युकृतां तथा कलिकृतामर्तिं न विन्देन्नरः ।। २४ ।।

कृते त्रैतायां वै यदि खलु तथा द्वापर भवा
सहस्रं वा तत्स्यात्तनुकषणमात्रात्पलकणम् ।
शिवे लिङ्गार्चायां तदिह दिनके वै कलियुगे
क्षणं त्र्यक्षध्यानाद्भवति स मुक्तेः प्रियतमः ।। २५ ।।

सिकत्यं मां देवं नदि(दी)भव सिकत्यासु च यजन्
रजस्ये मृल्लिङ्गे क्षणमपि च स क्षीणकुपथः ।

उमे धन्यो मन्यो भवति कलिजन्येऽपि तमसि
अहो मन्ये मुख्यं स हि परममान्यः प्रियतमः ।। २६ ।।

त्रियायुषमनुप्रभाभसितभूतपूताङ्गको
विशोषिकलुषोच्चयो भवति भाग्यपूर्णः कलौ ।
अशेषसुरसंसदं स खलु यति पूषप्रभा-
विमानवरमास्थितः स्थिर[1]चराद्धि पापापहः ।। २७ ।।

मुदैति मल्लिङ्गसमर्चनेन
कलौ नरा निष्कृतिदुष्कृतानि ।
तान्येव पुण्यानि भवन्ति सद्यो
भवोद्भवार्चाबलतो भवानि ।। २८ ।।

आशीविषोमविषविषयानुधाव-
च्चित्तेष्वशेषहृदयोत्थितकालतिष्ये ।
भूषाविशेषकृतशेषमहोरुहार-
पूषाक्षमीषदपि चिन्तयते स धन्यः ।।

।। इति श्रीशिवरहस्ये नवमांशे कलियुग(गुण)वर्णनं नाम
एकादशोऽध्यायः ।।

---

1. स्थावरजङ्गमरूपात्प्रपञ्चात् लोकात् ।

।। द्वादशोऽध्यायः ।।

स्कन्द उवाच

साश्चर्यं सा तदा श्रुत्वा गुणान्कलियुगस्य वै ।
प्रणम्य देवी विनयात्कालकालं कृपाकरम् ।। १ ।।

कैलासहीरसौधस्थं प्राञ्जलिः प्राह शङ्करम् ।
देव देव महादेव दगत्स्थित्य(सृष्ट्यः)न्तपालक ।। २ ।।

स्वमूर्तिभिर्ब्रह्मविष्णुरुद्रेन्द्रैः शशिशेखर ।
सोमधामकलामौले गङ्गाधर महेश्वर ।। ३ ।।

पृच्छामि त्वां महादेव किञ्चित्प्रश्नं मनोहरम् ।
वक्तुमर्हसि भूतेश पशुपाशविनाशक ।। ४ ।।

कल्पान्ते वा महादेव कथं प्रलयकारणम् ।
किमाहारा नराश्चामी किमाचारविहारकाः ।। ५ ।।

भवन्ति वै युगान्ते ते वराकाः शोकमानसाः ।
तन्मे वद महादेव विस्तरेणैव शङ्कर ।। ६ ।।

सूतः उवाच -

इति पृष्टो महादेव जगाद जगतां पतिः ।
विश्वाधिकः प्रसन्नास्यो महेशो भक्तवत्सलः ।। ७ ।।

उवाच च कलेरन्ते प्रजानां वर्तनं मुने ।
प्रलये लक्षणं चैव कल्केः प्रादुर्भवं मुने ।। ८ ।।

तत्तेऽहं सम्प्रवक्ष्यामि यथा देव्यै महेश्वरः ।
प्रोक्तवानद्‌भुततरं शृणु त्वं सावधानतः ।। ९ ।।

सहैभिर्मुनिभिर्मुख्यैः गणैश्च सुरसत्तमैः ।
शिवप्रोक्तं समासेन कल्पान्ते प्रलयं तथा ।। १० ।।

शिव उवाच -

लीलां लोकेऽनुलोके कलिभवसुमहापाप्मनां शैलकन्ये
मल्लिङ्‌गालयभेदकाः प्रतिकलौ विप्रस्वहारादराः ।
तद्दारान्कुसुमायुधोत्तमशरासारैश्च भिन्नाङ्‌गकान्
तास्तेषु प्रसभं रमन्ति नरके तानेव सम्पातये ।। ११ ।।

प्रतिकलि नरनार्यो जारजा घोररूपा
कामारातिपदाब्जभक्तिरहिताः सन्तप्तचक्राङ्ककाः ।
मृत्काला भसितत्रिपुण्ड्ररहिता रुद्राक्षमालोज्झिता
लिङ्‌गार्चासु पराङ्‌मुखाः किल शिवे कल्पान्तिमे ताः प्रजाः।।

कल्पान्तरे कुनृपतिप्रभवोरुपीडा-
ससंक्षुब्धलोकमखिलं धनधान्यहीनम् ।
दारान् कुमारमपहाय गृहादिकं ते
भ्रान्ता भ्रमन्ति सकलासु दिशासु गौरि ।। १३ ।।

क्षुद्राः क्षौद्ररसालताललिकुचाहारा हरद्रोहिण-
स्ते कालानललापतप्तहृदयाः पापैः शुचा न्याकुलाः ।
कालस्योरुगतागतिप्रशिथिलव्यालोपमानानना
भेकाभोग इवाविशन्ति नितरां कल्पान्तिमे ताः प्रजाः ।।

मद्भस्माङ्गानुषङ्ग स्थितिरतिविमुखा लिङ्गसङ्गोज्झिताङ्गा
रुद्राक्षाधृतिरीशनामकलने शङ्कीलितास्याः प्रजाः ।
मत्पञ्चाक्षररुद्रसूक्तकलने मत्क्षेत्रवासारसाः
भूभाराः कलिकालदुर्जनजना वर्तन्ति पापालयाः ।। १५ ।।

मदालयपरिभ्रमद्रविणदीपतैलांपहा
मदुत्सवविरोधिनो मम सुभक्त निन्दापराः ।
पतन्ति शलभामायिता अनलदीप्ततैलेऽम्बिके
कलौ कलुषबुद्ध्यो नरकवासकोलाहलाः ।। १६ ।।

काषायाश्रयिणः श्रमेषु निरता विप्रद्रुहो वाक्छठाः
लिङ्गाङ्काश्च कुचक्रतप्तवपुषः श्रौतद्विषस्ते कलौ ।
पापास्ते श्रमणा भवन्ति बहवः श्रुत्युक्तमन्त्रादरा (?)
स्ते दूरात्परिहारकाश्च नरका घोरा हरद्रोहिणः ।। १७ ।।

नित्यं याचकपाचकान्ननिरताः सङ्कोचवार्तोज्झिता
निर्मुच्याखिलपुण्यापापजनितं चिञ्चारसान्नादराः ।
तिष्ये पुष्पपरिभ्रममधुकरभ्रान्त्येव ते भिक्षवः
कक्षासक्तदुरन्नपेटक धरा वेदान्तवार्तोज्झिताः ।। १८ ।।

वर्णी स्वर्णानुरक्तो भवति यतिवरो वन्यवासी च ग्राम्यो
नो कश्चिन्मम पूजनोद्यतमतिः कामातिमात्रादरः ।
अक्षेषूद्यतचित्तवृत्तिरसकृत् द्यूते च पाने तथा
स्त्रैणा निर्घृणचेतसः कलिभवा वर्तन्ति ते सङ्घशः ।। १९

स्वस्थो यः स गृहस्थ एव गृहिणीपाकादरो यो वटुः
शिश्रूषुः स पटुः कुटीरकपटव्यापरामात्रोत्सवः ।

भूम्युत्कर्षसुकर्षणश्रमपराः श्रान्ताश्रमोक्तक्रियाः
क्रान्ता एव कलौ भवन्ति बहवो निर्द्रव्यभोगोत्सवाः ।। २०

शक्रेऽप्याक्रोशयुक्ता भवि कलिजनराः शुक्रवर्णाश्च तक्रं
विक्रेतारः क्रियाणा (?) गुडलंगुडकरा नक्रवृत्या क्रमन्ति ।
नैवानुक्रोशयुक्ता भरवरवहना भूसुरा रासभांशाः
हालेया[1] बालवृत्त्या प्रतिकलिजनिता [2]भक्तभुक्त्येकभावाः ।।

उन्निद्रारुणपद्मसद्मजनितानन्देन ते निर्वृता
भूयोद्रव्योपघातैर्द्विजसुरनिवहं मर्दयन्त्येव चोराः ।
निर्द्रव्या निशि ते मृगा इव महाव्याधोरुबाणाहताः
प्राणानप्यसमीक्ष्य हन्त कुधियो धावन्त्यजासाङ्घवत् ।। २२

हाहाघोषानुभूषा मखमुखरहिता द्रोहिणो घोररूपा
नानाकारविकारकेशजटिलाभि(भी)सारभूता नराः ।
दुर्दान्तद्रहिणेन ता हतधियो दुःखात्क्षुधार्तिं गता
कालापार विलासकीलितकलावन्ते प्रपश्याम्बिके ।। २३ ।।

निर्मर्यादैरहीने सततकलुषितास्वान्तरायासवृद्धा
बुद्ध्याऽभिध्याय सौख्यं कलिकुलिशहता निर्दयं मर्दयन्ति ।
रुद्राक्षामलभूतिदेहमसकृकद्रुद्रपूजापरं
. श्रीरुद्रार्थविचारकं जडधियः पञ्चाक्षरे सादरम् ।। २४ ।।

प्रारब्धारब्धलब्धैरुपनतजनुभिः कर्मभिः श्राम्यमाणा
भ्रान्ता विश्रान्तिहीनाः श्रमविविधवृषैर्दुःखसौख्यैकयुक्ताः ।

---

1. क्षेत्रेषु सस्यवृद्ध्यैव हलि(हल)कर्मपराः ।
2. पक्वान्नभोजनैकमनसः ।।

नानादेहेष्ववस्था त्रितयतनुभृतो भूभरास्ते व्यवस्था
स्वस्था इत्येव तेषां मतिरपि गिरिजे ते कलौ वर्तयन्ति ।।

अङ्गे वङ्ग कलिङ्गतुङ्गजभहाराष्टेषु सौराष्ट्रके
वङ्गाङ्गादिविदर्भनार्मदमहाकाले तथा कोङ्कणे ।
भङ्गारादिषु चीनसालसुमहागङ्गाप्रयागादिषु
म्लेच्छा एव वसन्ति सन्ततकुरुक्षेत्रे तथा पुष्करे ।। २६ ।।

आर्यावर्तानुवृत्तिः क्वचिदपि न भवेत् आर्यकाणां कलौ वै
काञ्चीकोसलचेरचोलजमहापाण्ड्ये द्विजानां स्थितिः ।
सह्याद्रिप्रभवोरुतीरजमहालिङ्गोत्तमाङ्गे क्षणं
क्षीणप्राय असद्मभूतकुकलौ स्थानं वरं वै सताम् ।। २७ ।।

पर्णादा अपि संविशन्ति मुनयः श्रीताम्रपर्णीतटं ।
वर्णाद्याश्रमतत्पराः शिवमुमेऽर्पापतिं संश्रिताः ।। २८ ।।

मत्पादार्चाविमुखहृदयो भाररूपो भवोऽसौ
तिष्ये पुण्येऽपि मध्यार्जुनभुवि सरिदिस्नानहीनोऽतिदीनः ।
डिम्भः कुम्भी(भो)शलिङ्गेक्षणनतिरहितो मोघितायुर्महाघे
माघे माध्यां मघर्क्षे शिवसरसि महास्नानहीनोऽतिदीनः ।।

तिष्ये पुष्येऽनुघुष्यद्वृजिनयुतजना स्वागतं सह्यजायां
स्नात्वा नत्वा महेशं सकलजनिजरानाशपाशैकनाशम् ।।

संसारार्णवमध्यतो हृतजनान्दैक मोदप्रदं
श्रीमध्यार्जुनवृक्षमूलनिवसल्लिङ्गं शिवे मुक्तिदम् ।। ३० ।।

कलौ माघे गङ्गायमुनवरसङ्गाऽऽप्लुतजनान्
प्रयागे वा योगैर्गमयति गतिं तेषु स शिवः ।

वलौ गङ्गासङ्गाज्जनिमृतिजभङ्गोऽपि हि भवेत्
महालिङ्गासङ्गान्नृषु परममुक्तिर्गिरिभवे ।। ३१ ।।

भावानां भवतारणाय गिरिजे मन्त्रं च पञ्चाक्षरं
तारेणोपदिशामि तारकमुमे सायुज्यमुक्तिप्रदम् ।
तस्मात्क्षेत्रवरं नमुक्तमगजे हारेषु मुक्तिप्रदं
कैलासोपममेतदद्य गिरिजे पुण्याविमुक्तं मया ।। ३२ ।।

तन्नैमिशं सेव्यमुमे कृते तत्
त्त्रेतासु तत्पुष्करमेव शस्तम् ।
तद् तद्द्वापरस्थैः कुरुजाङ्गलं महत्-
गङ्गैव सेव्या कलिजैर्विमुक्तये ।। ३३ ।।

असह्यपापैर्यदि निष्कृतीच्छुः
स सह्यजायां किल तौलिभास्करे ।
गोदां मुदा स्नाति च केसरिस्थे
बृहस्पतौ पापगणैर्विमुक्ताः ।
यो दक्षिणाम्योनिधिचापकोटि-
कोणे विगाह्यैव विमुक्तपापः ।। ३४ ।।

स्कन्द उवाच -

इत्थं शङ्करवाग्विलासमधुरोदारं वचः साम्बिका
श्रुत्वा हृष्ट तनूरुहाश्रुजमहाभक्त्याऽऽलुलोके हरम् ।
कैलासामलमौलिपालिसुमहारत्नोरुसौधस्थिता
पाटीराङ्कितवक्षसं त्रिजगतामध्यक्षमेवेश्वरम् ।। ३५ ।।

।। इति श्रीशिवरहस्ये नवमांशे द्वादशोऽध्यायः ।।

।। त्रयोदशोऽध्यायः ।।

श्रीदेव्युवाच -

देवदेवारविन्दाक्षसम्पूजितपदद्वय ।
विश्वेश प्रमथाधीश मन्मथान्तक शङ्कर ।। १ ।।

कल्पान्ते प्रलयं शम्भो विस्तराद्वक्तुमर्हसि ।
ब्राह्मोऽथ प्रलयः शम्भो कथं वातगतौ शिव ।। २ ।।

कालस्यास्य गतिः शम्भो तस्मिन् काले विशेषतः ।
प्रणताहं त्वत्पदाब्जे प्रणयाद्वक्तुर्महसि ।। ३ ।।

कुमारः (उवाच) -

इति देव्या तदा पृष्टः शिपिविष्टोऽष्टमूर्तिमान् ।
किञ्चिद् ध्यात्वा महादेवः प्रहसन्वाक्यमब्रवीत् ।। ४ ।।

ईश्वरः उवाच -

शृणु देवि प्रवक्ष्यामि महाप्रलयकारणम् ।
ब्रह्मणः परमं चायुः शतार्धमिति कथ्यते ।। ५ ।।

कल्पसङ्ख्यादिनं चैकं ब्रह्मणः कथ्यते शिवे ।
चतुर्युगसहस्राणां परिवर्तो हि कल्पकः ।। ६ ।।

ब्रह्मणोह्यायुषोऽन्ते च महाप्रलय उच्यते ।
विष्णोरेकमहः प्रोक्तं तस्यान्ते रौद्रकं दिनम् ।। ७ ।।

तस्यान्त ईश्वरस्याहस्तस्यान्ते च सदाशिवः ।
सर्वे सृष्टिस्थितिपरा तिरोधाना अनुग्रहाः[1] ।। ८ ।।

---

1. सर्वे सृष्टिस्तिथिलयतितिरोधानानुग्राहकाः ।

मन्मूर्तय इमे देवि मय्येव विलयं गताः ।
तत्पूर्षाघोर सद्यादि वामदेवेशवक्त्रजाः ।। ९ ।।

मूर्तयोऽमी ब्रह्मविष्णुरुद्रेश्वरसंदाशिवाः ।
भविष्यन्ति महादेवि मन्मूर्तय इमे सदा ।। १० ।।

कालातीतोऽहमीशानि अमूर्तो मूर्तिमांस्त्वया ।
त्रिणेत्रो नीलकण्ठश्च त्वया कैलासमौलिगः ।। ११ ।।

विहरामि गणैः सार्धं अलिङ्गो लिङ्गसंस्थितः ।
असङ्गः पुरुषश्चाहं सर्वभूतगुहाशयः ।। १२ ।।

सर्ववेदान्तसारार्थप्रतिपाद्योऽहमीश्वरि ।
भूमाऽऽनन्दघनश्चाहं ऋतं सत्यं महेश्वरि ।। १३ ।।

ब्रह्मकेवलमेवाहं सच्च चिद्धनमेव हि ।
नित्यानन्दोऽहममलः सर्वदाऽद्वैत एव हि ।। १४ ।।

मत्तो नेहास्ति यत्किञ्चित् ईशावास्यमिदं मया ।
रसोऽहं परमानन्दो योगिध्येयोऽहमीश्वरि ।। १५ ।।

मां न जानन्ति सर्वेऽपि सर्वभूतेषु संस्थितम् ।
योग सङ्ख्य विमुह्यति अन्येषां तत्र काकथा[1] ।। १६ ।।

यतो वाचो निवर्तन्ते अप्राप्यमनसा सह ।
सर्वध्यानार्थमेवेह नीरूपो रूपभागहम् ।। १७ ।।

मद्रूपचिन्तनान्मर्त्यो मुक्तिभाग्भवते जनः ।
मल्लिङ्गपूजनं देवि निर्गुणं परिकीर्तितम् ।। १८ ।।

---

1. योगि साङ्ख्या विमुह्यन्ति अन्येषां तत्र का कथा ।।

सर्वेषामेव देवानां मूर्तौ पूजा प्रवर्तते ।
सकला मे परा मूर्तिर्नीलकण्ठा त्रियम्बका ।। १९ ।।

उमासहाया विश्वेशि लिङ्गं मे निर्गुणं शिवे ।
मद्ध्यानसाधनं प्रोक्तं भस्मरुद्राक्षधारणम् ।। २० ।।

पञ्चाक्षरजपश्चैव रुद्रलिङ्गार्चनं तथा ।
मत्क्षेत्रवासो नाम्नां मे ह्यनुवृत्तिः सदैव हि ।। २१ ।।

अविमुक्ते च मरणं निवासो भक्तपूजनम् ।
प्रदोषे सोमवारे च निशि पूजा प्रवर्तनम् ।। २२ ।।

कल्पान्ते कुलिशायुधेन हरिणा विद्रावितार्ति गता-
स्तुच्छाः शक्तिगणा निरुच्छ्वसतुषच्छाग्नि संछर्दिनः ।
छागप्रायमुखाश्च देहनिकलैश्छिन्ताः प्रजास्तस्तदा
. . . . ।। २३ ।।

उत्फुल्लारुणपङ्कजोपममहानीलीतमालप्रभा-
कापोतारुणरक्तकाभ्रनिचयैर्व्याप्तं च खं तत्र हि ।
तस्मिन्नस्तमितप्रपञ्चमिहिका ज्योतिर्गणेषूद्यतः
रवद्योतप्रभपूष्णि सोमकलया एकश्चराम्यम्बिके ।। २४

वाताः शर्करकर्षणा नदनदीनाथोर्मिसंवाहिनो
वात्येवाशुभशंसिनः प्रतिकलेरन्ते च कल्पान्तिमे ।
तत्पश्चाद्वरुणेन चोदितमहामेघव्रजानां शता (गणा)
वर्षन्त्युद्यतविद्युतो गिरिसमाः सूर्ये तपत्यम्भसि[1] ।। २५ ।।

---

1. सूर्यास्तपन्त्यम्भसि ।

दिग्दाहाः प्रभवन्ति सन्ततमुमे कल्पान्तिमे भूगजा
भूमिं मौलिगतां च पापजमहाकम्पायितां (दिङ्मुखे) ।
कुर्वन्त्येव महाब्धयो गिरिगणं वातावधूतोर्मयो
मृद्नन्त्येव तदाम्बिके मम महाकैलासवासं विना ।। २६

तन्मेघप्रभवातुलोद्यतमहाविद्युत्प्रपातार्भटी-
घोरारावविदग्धसर्वजगती नृत्यामि मोदाधिकः ।
शुण्डादण्डोरु काण्डोपमगिरिशिखरास्फालमेघोत्थधारा-
पारावारानुघोरारुण तरुण जटा जालमौलौ वहामि ।। २७

तद्वर्षोत्कर्षतर्षः श्रुतिवरवचसा मेध्यवर्ष्योऽस्मि विद्यु
द्भव इति गदितोऽम्बे(?) वेदधामोरुगीतः ।
तत्राब्धिर्जानुदघ्नो भवति च सुमहल्लोलकल्लोलजालः ।। २८ ।।

अमोघमेघोत्थितवातजात
भूपङ्कपङ्किलसमुद्रधराधरोर्वी ।
निर्दग्धदुग्धवसुधारस शोषपूषभूषाविन हरिः
सुरासुरगणा नोवदिशोषणकालमूले ।। २९ ।।

तरणिकिरणजालदग्धशैल
रुणभस्माद्रिचयोर्मिमान् सदा ।
न पुरं न नरा मृगाण्डजा
कलिकालान्तिमकालतो भवानि ।। ३० ।।

वेलोद्वृत्तातुलोर्मिप्रतिवहविहिता संवहाघोरवाता-
ज्जाता विस्तीर्णपृथ्वीनिहित गिरिचयादोधुवन्ते बलेन ।
तेनैवोत्थितशब्दजालजमहाकल्लोललोलाब्धय
आसत्यावधिवीचयोऽमरतलांस्ते नाशयन्तो द्रुतम् ।। ३१

तन्मध्यसंस्थबडवानलवाडवोत्थ-
शाखाविधूतगतिधूमतति प्रदग्धाः ।
ते सागरारुण महाद्रिचयोरुभस्म-
पङ्काचिता भुविभवन्ति सुरासुरैश्च ।। ३२ ।।

काले तस्मिश्चरामि क्षुभितमहितले शैलराष्ट्रादिहीने
शूलप्रोतकपालकङ्कणमहाशेषाङ्गकः शङ्करि ।
तद्ब्रह्मान्तिमकालमूलजमहाकल्लोलकोलाहले
काले नीलतमालसन्निभगलो नित्यं वसाम्यम्बिके ।। ३३

नक्षत्रसोमनयमा(पवना)र्कदिशाधिपा वा
नो वान्तरिक्षकमही जगति प्रणष्टा
न ब्रह्मास्तीर्णलोके क्षुभितकलुषिते शूलमूले विमुक्तं
प्रोत्यं कृत्य वसामि सोमशकलालङ्कारमौलिस्तदा ।।

तद्बाह्यदेहदहनोत्तमभस्मभूषः
पूषाविशेष सुमहोरुशरीरकान्त्या ।
विष्णुं प्लवन्तमनिलाहतिबाललील-
लोलं ग्रसामि भुवनेश्वरि तत्र वार्धौ ।। ३५ ।।

गायन्नुच्चैश्च सामान्यतुलितघनदैरुच्चघोषोऽस्मियाव-
द्ब्राह्माहं निवसंश्च नृत्यपरमः स्कन्धात्तशूलः शिवे ।।

।। इति श्रीशिवरहस्ये नवमांशे प्रलयकथनं नाम त्रयोदशोऽध्यायः ।।

---

1. अत्र प्रलयवर्णनपराणि पद्यानि शोधनार्हाणि ।

।। चतुर्दशोऽध्यायः ।।

देव्युवाच -

एकार्णवं कलेरन्ते ब्रह्मणः प्रलये शिव ।
दग्धब्रह्माङ्गसम्भूतभस्मना समलङ्कृतः ।। १ ।।

निगीर्णो बालरूपोऽसौ त्वया विष्णुः सदाशिव ।
प्रतिसर्गं प्रसूतानां ब्रह्मविष्णुहरात्मनाम् ।। २ ।।

उद्भवं च महादेव वक्तुमर्हसि शङ्कर ।
किमन्ये ब्रह्मविष्ण्वीशाः पौर्विका वा त एव हि ।। ३ ।।

वद मे संशयं देव कालकाल जगद्गुरो ।

स्कन्दः

इति देव्या महादेवः पृष्टस्तामभ्युवाच ह ।। ४ ।।

तत्तेऽद्याहं प्रवक्ष्यामि शिवप्रोक्तं सनातनम् ।
शृणु त्वं सावधानेन रहस्यं सर्वपापभित् ।। ५ ।।

ईश्वरः (उवाच) -

शृणु देवि रहस्यं ते प्रवक्ष्यामि समासतः ।
गोपनीयं प्रयत्नेन नाख्येयं यस्य कस्य चित् ।। ६ ।।

ब्रह्मणः प्रलये सर्वे तत्सृष्टाः सर्व एव हि ।
ये प्रजापतयो देवा मानवो मुनिमानवाः ।। ७ ।।

सुरासुरास्तथा शक्रो दिक्पाला यक्षपूरुषाः ।
किन्नरा नागगन्धर्वास्तथैवाप्सरसां गणाः ।। ८ ।।

सुपर्णाः सागरा द्वीपा नदीनदवनान्युमे ।
गिरयः पुरराष्ट्राणि लोकाश्चैव चतुर्दश ।। ९ ।।

सर्वे ब्रह्मोदरे देवि लीनाः सम्प्रति शङ्करि ।
कृत्वा पितामहः सर्गं स्वोदरस्थं चराचरम् ।। १० ।।

स पिधायेन्द्रियग्रामं कल्पमेकं वसंस्तदा ।
न दिवा न तमो रात्रिः नैव भूतं किमप्युमे ।। ११ ।।

स्वमूर्ध्नियोगमास्थाय मम योगं पुनरस्त्यजन् ।
युञ्जन्नात्मानमेवेशि मय्येव परमात्मनि ।। १२ ।।

तदन्तिमे महायोग सञ्जातानलसात्तनुम् ।
कृत्वा दग्धो भवेद्ब्रह्मातद्ब्रह्मभस्मचोत्तमम् ।। १३ ।।

अवकुण्ठ्याहमीशानि नृत्याम्यानन्दनिर्भरः ।
मद्रोमजालमूलेषु तद्ब्राह्माङ्गसमुद्भवम् ।। १४ ।।

भस्मैव सङ्गतं यावत् तावत्ते विधयोऽम्बिके ।
भवन्ति प्रतिकल्पादौ स्वोदरस्थैश्चराचरैः ।। १५ ।।

प्रतिकल्पं वेदजालं सरहस्यं षडङ्गकम् ।
विधये साधकायाहं सृष्ट्वादौ परमेश्वरि ।। १६ ।।

यथापूर्वं नियोगाय तस्मा उपदिशाम्यहम् ।
मयोपदिष्टः सोऽप्येवं विनियुङ्क्ते चराचरम् ।। १७ ।।

लोकाँल्लोक्यांश्च स तदा यथा पूर्वं प्रजापतिः ।
भूता भाव्याश्च मनवः ऋषयश्च पुरन्दराः ।। १८ ।।

प्रजाः प्रजानां पतयो नदीनदपुरं वनम् ।
गिरयः सागरा घोरा भूतानामर्थधर्मकम् ।। १९ ।।

आश्रमाणां च वर्णानां धर्माधर्मं च कृत्स्नशः ।
देवासुरविसृष्टिं च नृपाणां च परम्पराः ।। २० ।।

यान्येव प्राक्तनयुगे तान्येवागामिकेऽपि च ।
भवन्ति मन्नियोगेन धातुर्बुद्धिप्रदानतः ।। २१ ।।

सोऽपि सृष्ट्यभिवृद्ध्यर्थं रुद्रं ध्यायन्ति तत्र हि ।
तन्मौलिपद्मं निर्भिद्य रुद्रः कालाग्निसम्भवः ।। २२ ।।

नानर्तिचाग्रतस्तस्य शूलहस्तो दिगम्बरः ।
जटालमौलिजालेन्दुर्महाभूताहिभूषणः ।। २३ ।।

भस्मदिव्य त्रिपुण्ड्राङ्कः करटित्वक्कृताम्बरः ।
तं दृष्ट्वा चाग्रतो रुद्रं नृत्यन्तं शूलपाणिनम् ।। २४ ।।

उत्थायाभिप्रसृत्यैनं प्रणम्याथ मदम्शजम् ।
मन्वानस्तं च तुष्टाव सृष्टिविस्तरकारणे ।। २५ ।।

ब्रह्मोवाच -

भो भो कालाग्निरुद्र त्रिणयन जगतो हेतवे सेवये त्वां
विश्वेशाज्ञानियुक्तः सकलजगमहासृष्टिसाहाय्यभारम् ।
योक्ष्ये युङ्क्ष्व त्वयाहं सृज जनमपि तत्ते कटाक्षाग्रजाग्र-
द्भूमावेवाद्य शूलोद्यतकर भगवन्नेवमेवेति मन्ये ।। २६ ।।

इत्युक्तो वेधसायं ममनयनभवः कालरुद्रोरुघोषं
कृत्वाऽऽकम्प्य च रोदसी स ससृजे रुद्राननेकाञ्छिवे ।
नानावेषमहोरुहेषणमहाबणासिपाशोद्यतान्
उद्धता(उच्चण्डा)म्बुदनिःस्वना गिरिभवे दृष्ट्वैव विभ्यद्विधिः ।।

तं नत्वा पुनराह साहसमहो रुद्र त्वया यत्कृतं
मा स्राक्षीः पुनरेव मे सुमहारुद्रां स्त्रिणेत्रप्रियान् ।
एभिर्व्याप्तमिदं चराचरजगज्जातं च जन्मार्तिभत्-
त्वं चाप्यद्य सृजस्व जन्तुनिवहं मैवं विधास्ते प्रजाः ।।

इत्युक्तो वेधसाऽयं वरमखिलमहारुद्रसंस्थासु तस्मा-
द्भूम्यन्ते दिवि रोदसी त्रिभुवने तान्वै नियुज्यादरात् ।
नाहं मृत्युवशन् सृजेऽहममखिलान्त्सर्गो न मे तादृशः
त्वं कौलालककर्मणाजनिमृति प्रायां प्रजां वै सृज ।। २९ ।।

इत्युक्तो निरगात्त्च तत्र भवनारत्थाणुस्ततोऽसौ भव-
स्तत्रैवातिससर्ज चाब्जभवनः सृष्टिं स्वकीयां सृजः (?) ।
एवं रुद्र समुद्भवा विधिभवा सृष्टिप्रतिष्ठाऽकथि
एवं कल्पपरम्परां हरिहरब्रह्मादयश्चाम्बिके ।। ३० ।।

अन्योन्यं गुरवो भवन्ति जगतां सर्गादिसंस्थापरा
नाशायान्तिमकेलयेऽधि सुमहारुद्रो भवेदम्बिके ।
तद्ब्रह्मोद्भवभस्मसङ्गतमहावामाङ्गतस्तं पुन-
र्मद्गर्भस्थितविष्णुमेव सुमहारुद्रं च मत्कालतः ।। ३१ ।।

तानेवाशु विसृज्य वेदमखिलं दत्वैव तद्ब्रह्मणे
तत्कालोत्तमसम्भवं च सुमहारुद्रं करोम्यम्बिके ।
स्वच्छन्दः पुनरेव सर्वजगतीसम्पूरणे केवलं
मत्कालानलकीलदग्धमनवीजालं सृजाम्यम्बिके ।। ३२ ।।

ब्रह्माहरिर्हरसुरास्त्रिजगत्प्रतिष्ठा-
सृष्टचन्तपालनविसर्गकरा भवन्ति ।
पूर्वं यथैव मम चित्तवशानुगास्ते
एवं तवाद्य कथिता नियतिश्च गौरी ।। ३३ ।।

।। इति श्रीशिवरहस्ये नवमांशे ब्रह्मसृष्टौ नाम चतुर्दशोऽध्यायः ।।

।। पञ्चदशोऽध्यायः ।।

देवी (उवाच)

दामोदरस्तवोदार उदारोदरसंस्थितः ।
अवात्सीत्स कियन्तं वै कालं कालविनाशनः ।। १ ।।

तन्मह्यं कौतुकवतीं वाचमामोचयाधुना ।

स्कन्दः (उवाच)-

इत्थं देव्या तदा पृष्टो महादेवोऽभ्युवाच ताम् ।। २

ईश्वर उवाच

शृणु मे कौतुकं देवि कमलामललोचने ।
विष्णुर्बभ्राम तत्रैव कल्पं मदुदरस्थितः ।। ३ ।।

सागरान्त्सरितः शैलान् द्वीपान् वनपुराणि च ।
देवादीनसुरांश्चैव भूत(तं)भव्य(यं)मनूंस्तदा(था) ।। ४ ।।

सशक्रशुक्रादिग्रहान्त्सोमसूर्यांश्च ऋक्षकान् ।
गन्धर्वाप्सरसः सिद्धान्त्साध्यान्वस्वश्विनौ(नः) तथा ।। ५ ।।

स्वसमानान्स्तथा विष्णुब्रह्मरुद्रमुनींस्तदा(था)
वेदाश्चत्वार एवैते[1] वेदाङ्गाञ्छास्त्रजालकम् ।। ६ ।।

---

1. वेदांश्चतुर एवैतान् ।

सर्वं भूतं च भव्यं च कालचक्रर्तुपक्षकाः(न्)
अहर्निशं वर्षजालं युगाश्च(गांश्च)त्वा(तु)र एव हि ॥ ७ ॥

सर्वं चराचरं दृष्ट्वा विस्मयोत्फुल्ललोचनः
हरिस्तुष्टाव मां देवि स्तवं मदुदरे स्थितः ॥ ८ ॥

प्रणम्य प्राञ्चलिः प्रह्वो धृतरुद्राक्षभूतियुक् ।
सम्यगाकर्णयापर्णे मम विष्णुकृतां स्तुतिम् ॥ ९ ॥

तया स्तुत्या सुप्रसन्नस्तमपानादमोचयम् ।
अधरेन्द्रिय जातत्वादधोक्षज इति स्मृतः ॥ १० ॥

विष्णुरुवाच -

उग्रोऽनुग्रोऽसि शम्भो पुरहर भगवन्नकारे कपर्दिन्
भूतेशामरपाल शङ्करमहाग्रासोऽसि वेदेरितः ।
मां पाहीश्वर सामिसोमशकलालङ्कारमौले हर
स्वामिन्देव दयानिधे करुणया त्वं सर्वसर्वेश्वर ॥ ११ ॥

हे मन्मथान्तक महेश्वर देवदेव
श्रीवामदेव जितकाम उमासहाय ।
व्योमादिभूम श्रुतिसीम सुखादिधाम
सामैस्स्तुवाम हर सोम ललाम पाहि ॥ १२ ॥

भो भर्ग त्रिजगच्छरण्य करुणातारुण्यवारांनिधे
हे कालान्तक देवदानवसुहृद्यक्षादिसंसेवित ।

वीक्षाशिक्षितमन्मथान्तक महादक्षादिदीक्षापह
उक्षाध्यक्षभगाक्षिनाशक महादेवाद्य संवीक्षय ।। १३ ।।

जटाजूटाभूषा तव सुरसरित्पूरमसकृत्[1]
महाघोटीधाटी श्रुतिवचन कोटीरक विभो ।
वधूटी शैलाज्ज(शैलस्य)तरुणशशिचूडाल भगवन्
अनाथं मां शम्भो सुखयतु सनाथा तव कृपा ।। १४ ।।

वेदाश्वसारथिविधे रविचन्द्रचक्र
क्ष्मास्यन्दन क्षितिधरात्तशरासनज्य ।
सोमग्नि विष्णुशरकृत्तपुरादिकस्त्वं
जेता रथेष्वधिपतिस्सुरसैन्यपालः ।। १५ ।।

वश्यान्पश्यामि शम्भो तव वर करुणापार पूरैकराशान्
वाराशीनमरासुरद्विजवरांल्लोकांश्च लोक्यानपि ।
मां निस्तारय विस्तरोरुजठरी कान्तारतरस्त्वं विभो
बिभ्यन्तं करुणारुणद्धि यदि ते चित्ते न हृत्तो हर ।। १६ ।।

अरीरचदिमं स्तवं मुरहरोऽब्जनेत्रोऽम्बिके
व्यरीरमदथोत्थितो मम सुभक्तिपूरादरः ।
भरीभरदथाञ्जसा मम पदाब्दपूजोत्सवै-
रबीभरदिदं जगन्मम वरोदरान्निः सृतः ।। १७ ।।

विष्णुर्जिष्णुर्भविष्णुर्मदुदरपिठरीपीठसंस्थोरुलोकान्
संवीक्ष्यैव सुरासुरव्रजहरिब्रह्मेन्द्र नारायणान् ।

---

1. जटाजूटाभूषायित सुरसरित्पूर असकृत्

द्वीपाब्धिप्रवरान्नदीर्गिरिवनं किं वेत्युमे विस्मय-
न्नपीपठदिमं स्तवं श्रुतमघौघनाशाय हि ।। १८ ।।

प्राणंसीद्विधिरप्युमे हरिमथो दृष्ट्वोदरन्निःसृतं
चास्तौषीन्मम पादपङ्कजलसद्भृङ्गासङ्गोपमः ।
[1]प्रहैःस्वैर्वदनच्युतोरुसरसानन्दोत्थसत्कन्दली
वाचा मां सुरसायनोत्तरझरीपूरेण पश्याम्बिके ।। १९ ।।

ब्रह्मोवाच -

यक्षाधीशसखं वलक्षभसितानङ्गाङ्गमुक्षस्थितं[2]
पक्षीन्द्रप्रियवाहपूजितमुमावक्षोजशैलप्रियम् ।
भिक्षापूर्णकपालपाणि सुरतापक्षस्थितं त्वां भजे
त्र्यक्षं दक्षसुशिक्षकं पुरहरं चक्षुःश्रवाकल्पकम् ।। २० ।।

मातङ्गत्वगलङ्कृताङ्गमविजाकान्तं[3] कुरङ्गाङ्गधृ-
ग्घारीभूतभुजङ्गराजविलसद्गङ्गाकपर्दोज्ज्वलम् ।
लीलाङ्गीकृतलिङ्गसङ्गतमहाफाले पतङ्गस्फुर-
ज्ज्वालालोलवराङ्गभङ्गसुमहद्विध्यध्युत्तमाङ्गं भजे ।। २१

हरपुरहर घोरकाकोदरहाराव भवोद्भवां तथार्तिम् ।
परिहरकराद्यशङ्कर त्रिजगद्बन्धविराम देव पाहि ।। २२

---

1. प्रह्वस्वात्ममुखच्युतोरुसरसानन्दोत्थसत्कन्दली
2. भसिताङ्गं सन्महोक्षस्थितं 3. अवि-Mountain, अविज्ञा-Parvathi

भव तव विभवावलोकभावा
भवनाशाय किल प्रबुद्धभावाः ।
प्रभवाय विसृष्टि संस्थितौ
मम किञ्चित्त्वयि भाव मा दधस्व (?) ।।

शम्भो बालेन्दुचूड द्युतिविदिततदिशास्तोमसीमानुधाम
प्रेमा ते महिमावलोकन विधौ क्वाहं हरिर्वाहरः ।
विश्वाधीश्वरवेदजालसुमहानिःश्वासविश्वासिनं
तदातुं प्रभवेद्भवान् प्रभुरहो किं वच्मि तत्तेऽग्रतः ।। २४ ।।

ईश्वरः (उवाच)

तद्ब्राह्मस्तुतितोषितोऽहमगजे तं चाब्रवं लोकयन्
तस्मै वाचमिमामवादिषमयं तां वै शृणुष्वाम्बिके ।
तेनैवाशु विनिर्गतौ विधिहरी लोकं च स्रष्टुं तदा
पातुं मामभितः प्रणम्य ससृजे ब्रह्मा हरिः पात्यपि ।। २५

अगाधबोधवेदजालमेवते
निसृष्टमष्टमूर्तिना मया ।
ततो विसृष्टिरद्य ते भवे भवाय
पूरणी भवोद्भवार्चनात्तव ।। २६ ।।

एवं ते कथिता युगोद्भवमहाधर्मं गुणं चागुणं
श्रुत्वा हृष्टतरा भवाशु गिरिजे कैलासमौलिप्रिये ।
सारं ते प्रवदाम्यहं पुनरपि तं तूर्णमाकर्णय
निस्तीर्णा हि त एव भारभुवने मत्पादपूजादराः ।। २७ ।।

कृतत्रेतातान्ता अनशनतपोभिश्चिरतरं
मखादौ दीक्षायामुपसदि शिवे द्वापरयुगे ।
कलौ क्षीणे धर्मे प्रभवति क्षणार्धेऽक्षतधियां
शिवार्चयां पुण्यं मम भवति नामैक विपुलम् ।। २८ ।।

नामैकं मम तारणं कलियुगे गङ्गेव पापापहं
किं दानैर्मखजालवेदपठनैस्तीर्थाटनेनापि किम् ।
मल्लिङ्गं यदि दृष्टिसङ्गतमुमे भाग्यानि सूते कलौ
तेनापारतपः क्रियादि चरणं सायं प्रदोषे भवेत् ।। २९ ।।

मल्लिङ्गालयतुङ्गगोपुरमहाशृङ्गाग्रसंवीक्षणै-
स्तत्कुम्भस्पृशिवातपोतकवरैः पुण्यै रथाकर्षणैः ।
चण्डालाःश्वपचाश्च पुल्कस नराः सङ्कीर्णजात्युद्भवाः
ते वै शङ्करि स्थावरा अपि चरा मल्लोकवासाः कलौ ।।

मदुत्सवविलोकिनां सुकृतपुञ्जमेतत्कलौ
भवेत विभवाधिकः प्रभवते च नीचो जनः ।
अनन्तमहिमास्पदं भुवि कलौ हि लिङ्गार्चनं
करोत्यपि च पश्यति सममुमे तयोर्वै फलम् ।। ३१ ।।

कान्तारे निवसन्ति शान्तमनसा स्वान्तर्हृदब्जस्थितं
तं कालान्तकभन्तकान्तकमुमाकान्तं समर्च्यादरात् ।
कोलप्रायमहाखलोत्तरकलौ तत्कीलजालानल-
ज्वालादाह विवर्जितार्जवयुतास्तिष्ठन्ति लोकोत्तराः ।। ३२ ।।

स्कन्दः (उवाच) -

एवं सा शैलकन्या श्रुतिवरशिखरोत्तंस सद्वक्त्रधारां
संश्रुत्य प्रमथाधिराजमगजा वाचं बभाषे पुनः ।
भाव्यानां कलिकालजातजनुषां भक्तिप्रभाविस्तरं
श्रेतुं भव्यचरित्रमद्‌भुततरं दैव्यै च देवोदितम् ।। ३३ ।।

देव्युवाच -

के भाव्या भव्यरूपास्त्वयि शिव भजनाद्‌भावपूताश्चभावा-
स्तेषां किं चरितं भवैकतरणं मह्यं वदैतत्प्रभो ।
त्वद्‌भावानुगता भवोद्‌भव भवाम्भोधेः श्रुतं तारकं
भूमानन्दघनं प्रसीद भगवन् त्वद्‌भावयुक्तास्म्यहम् ।। ३४ ।।

योषाप्रमोषरहितः सुकृती कृती स
भाषासु वा परशिवं स्तुवते विशेषात् ।
संशोधिताघनिचयास्तव भक्तिभावै-
रुद्धोषितत्रिभुवनेषु विशेषजाताः ।। ३५ ।।

।। इति श्रीशिवरहस्ये नवमांशे शिवगौरीसंवादे विष्णुब्रह्मकृतस्तुतिर्नाम पञ्चदशोऽध्यायः ।।

।। षोडशोऽध्यायः ।।

स्कन्द उवाच

तदा गिरिजया पृष्टस्त्रिकालज्ञस्त्रिलोचनः ।
भविष्यच्छिवभक्तानां भक्तिं सं दी(वी)क्ष्य विस्मयन् ।। १ ।।

मौलिमान्दोलयन्देवो बभाषे वचनं मुने ।
श्रृणु त्वमेभिर्गणपैर्मुनीशैश्च सुरैस्तथा ।। २ ।।

प्रभावं शिवभक्तानां भविष्याणां कलावपि[1] ।

ईश्वरः (उवाच)

श्रृणु देवि भविष्याणां भक्तानां चरितं कलौ ।। ३ ।।

वदामि सङ्ग्रहेणैव श्रवणाद्भक्तिवर्धनम् ।
गोपनीयं प्रयत्नेन नाख्येयं यस्य कस्यचित् ।। ४ ।।

पापघ्नं पुण्यमायुष्यं श्रोतृणां मङ्गलावहम् ।
पापकर्मैकनिरतान्विरतान्त्सर्वकर्मसु ।। ५ ।।

वर्णाश्रपरिभ्रष्टानधर्मप्रवणाञ्जनान् ।
कल्यब्धौ मज्जमानांस्तान्दृष्ट्वाऽनुक्रो[2]शतोऽम्बिके ।। ६ ।।

मदंशजातं देवेशि कलावपि तपोधनम् ।
केरलेषु तदा विप्रं जनयामि महेश्वरि ।। ७ ।।

तस्यैव चरितं तेऽद्य वक्ष्यामि श्रृणु शैलजे ।
कल्पादिमे महादेवि सहस्रद्वितयात्परम् ।। ८ ।।

---

1. कलावपि भविष्यताम् ।। 2. दयया ।

सारस्वतास्तथा गौडा मिश्रकर्णाजिना द्विजाः ।
आम्रमीनाशना देवि आर्यावर्तानुवासिनः ।। ९ ।।

औत्तरा विन्ध्यनिलया भविष्यन्ति महीतले ।
शब्दादि ज्ञानकुशलास्तर्ककर्कशबुद्ध्यः ।। १० ।।

जैना बौद्धा बुद्धियुक्ता मीमांसानिरताः कलौ ।
वेदबोधदवाक्यानामन्यथैव प्ररोचकाः ।। ११ ।।

प्रत्यक्षवादकुशलाः शल्यभूताः कलौ शिवे ।
मिश्राः शास्त्रमहाशस्त्रैरद्वैतोच्छन्दिनोऽम्बिके ।। १२ ।।

कर्मैव परमं श्रेयो नैवेशः फलदायकः ।
इति युक्तिपरामृष्टवाक्यैरुद्बोधयन्ति च ।। १३ ।।

तेन घोराः कुलाचाराः [1]कर्मसाराभवंस्तथा ।
तेषामुद्घाटनार्थाय सृजामीशे मदंशतः ।। १४ ।।

केरले शललग्रामे विप्रपत्न्यां मदंशतः ।
भविष्यति महादेवि शङ्कराख्यो द्विजोत्तमः ।। १५ ।।

उपनीतस्तदा मात्रा वेदान्त्साङ्गान्ग्रहीष्यति ।
अब्दावधि ततः षष्ठे विहृत्य स सुतर्कजाम् ।। १६ ।।

मतिं मीमांसमानोऽसौ कृत्वा शास्त्रेषु निश्चयम् ।
वादिमत्तद्विपवरान् शङ्करोत्तमकेसरी ।। १७ ।।

---

1. कर्मसारस्तथा जनाः ।। जनास्तथेति वा ।। भाविकालिकवृत्तप्रसङ्गे भूतार्थभ्रमकारिवचनमत्र अभवन् इति न युज्यत इति श्लोके पदान्तरनिवेशः कृतः ।।

भिनत्येव (भिनत्स्यति) महाबुद्धान्त्सिद्धविद्यानपि द्रुतम् ।
जैनान्विजिग्ये(विजित्य)तरसा तथान्यान्कुमतानुगान् ।। १८

तदामातरमामन्त्र्य परिव्राट् स भविष्यति ।
परिव्राजकवेषेण मिश्रानाश्रमदूषकान् ।। १९ ।।

दण्डहरतस्तथा कुण्डी काषायवसनोऽमलः ।
भस्मदिव्यत्रिपुण्ड्राङ्को रुद्राक्षाभरणोज्ज्वलः ।। २० ।।

ताररुद्रार्थपारीणो(णः) शिवलिङ्गार्चनप्रियः ।
स्वशिष्यैस्तादृशैर्घुष्यन्भाष्यवाक्यानि सोऽम्बिके ।। २१ ।।

मद्दत्तविद्यया भिक्षुर्विराजति[1] शशाङ्कवत् ।
सोऽद्वैतोच्छेदकान्पापानुच्छात्साद्य(च्छि)ऽऽक्षिप्य तर्कतः ।।

स्वमतानुगतान्देवि करोत्येव[2] निरर्गलम् ।
तथापि प्रत्ययं तेषां नैवासीच्छ्रुतिदर्शनः[3] ।। २३ ।।

मिश्राः शास्त्रार्थकुशलास्तर्ककर्कशबुद्धयः ।
तेषामुद्बोधनार्थाय तिष्ये[4] भाष्यं करिष्यति ।। २४ ।।

भाष्यघुष्यन्महावाक्यैस्तिष्यजातान्हनिष्यति ।
व्यासोपदिष्टः सूत्राणां द्वैतवाक्यात्मनां शिवे ।। २५ ।।

अद्वैतमेव सूत्रार्थं प्रामाण्येन करिष्यति ।
अविमुक्ते समासीनं व्यासवाक्यैर्विजित्य च ।। २६ ।।

---

1. विभास्यति शशाङ्कवत् । अथवा लृडर्थे लट् प्रयोग इति वा ।।
2. करिष्यति । 3. न भवेच्छ्रुति दर्शनैः । 4. कलौ ।

शङ्करं स्तौति[1] हृष्टात्मा शङ्कराख्योऽथ मस्करी ।। २७

शङ्करः -

सत्यं सत्यं नेहनानास्ति किञ्चि-
दीशावास्यं ब्रह्म सत्यं जगद्धि ।
ब्रह्मैवेदं ब्रह्म पश्चात्पुरस्तता-
देको रुद्रो न द्वितीयोऽवतस्थे ।। २८ ।।

एको देवः सर्वभूतेषु गूढो-
नानाकारो भासि भानैस्त्वमात्मा ।
पूर्णापूर्णो नामरूपैर्विहीनो
विश्वातीतो विश्वनाथो महेशः ।। २९ ।।

भूतं भव्यवर्तमानं[2] त्वयीशे सामान्यं वै देशकालादिहीनः ।
नो ते मूर्तिर्वेदवेद्यस्त्वसङ्गो सङ्गीव त्त्वं लिङ्गसंस्थो विभासि।।

त्वद्भासा वै सोमसूर्यानिलेन्द्रा
भीषोदेत्येष सूर्यश्च देवाः ।
त्वं वेदादौ स्वर एको महेशो
वेदान्तानां सारवाक्यार्थवेद्यः ।। ३१ ।।

वैद्योऽभेद्यः सर्वभूताद्यवेद्य
भिद्ये(त)दृष्ट्या तव हृत्तमोऽद्य ।

---

1. शङ्करं स्तोष्यते हृष्टः इति, संहृष्टः शङ्करं स्तोता (लुट्) इति वा सङ्गतो भवेदिति भाति ।।

2. भूतैर्भव्यैर्वर्तमान ।

ओङ्कारार्थः पुरुषस्त्वं ऋतं च
सत्यज्ञानानन्दभूमासि सीमा ।। ३२ ।।

बद्धो मुक्तो नासि सङ्गिष्वसङ्गी
प्राणप्राणो मनसस्त्वं मनश्च ।
त्वत्तो वाचो भनसा सन्निवृत्ता-
स्तत्वानन्दज्ञानिनो बुद्धभावाः ।। ३३ ।।

त्वत्तो ज्ञा(जा)तं भूतजालं महेश
त्वया जीवत्येतदेवं विचित्रम् ।
त्वय्येवान्ते संविशत्येव विश्वं
त्वां वै को वा स्तुवते(?) स्तव्यमीश ।। ३४ ।।

किञ्चिद्ज्ञत्वात्सर्वभास्येव बुद्ध्या
त्वामात्मानं वेद्मिदेवं महेशम् ।। ३५ ।।

इति शङ्करवाक्येन विश्वेशाख्यादहं तदा ।
प्रादुर्बभूव लिङ्गात्स्वादलिङ्गोऽपि महेश्वरि ।। ३६ ।।

त्रिपुण्ड्रविलसत्फालश्चन्द्रार्धकृतशेखरः ।
नागादिनोत्तरासङ्गो नीलकण्ठस्त्रिलोचनः ।। ३७ ।।

वरकाकोदरानद्धराजद्धारस्त्वयाम्बया ।
तमब्रवं महादेवि प्रणतं यतिनां वरम् ।। ३८ ।।

शिष्यैश्चतुर्भिश्च युतं भस्मरुद्राक्षभूषणम् ।

ईश्वरः उवाच -

मदंशजस्त्वं जातोऽसि भुवि चाद्वैतसिद्धये ।। ३९ ।।

पापमिश्राश्रिते मार्गे जैनदुर्बुद्धिबौद्धकैः ।
भिन्ने वैदिक संसिद्धे अद्वैते द्वैत वाक्यतः ।। ४० ।।

तद्‌भेदगिरिवज्रस्त्वं सञ्जातोऽसि मदंशतः ।
द्वात्रिंशत्परमायुस्ते शीघ्रं कैलासमावस ।। ४१ ।।

एतत्प्रतिगृहाण त्वं पञ्चलिङ्गं सुपूजय ।
भस्मरुद्राक्षसम्पन्नः पञ्चाक्षरपरायणः ।। ४२ ।।

शतरुद्रावर्तनैश्च तारेण भसितेन च ।
बिल्वपत्रैश्च कुसुमैर्नैवेद्यैर्विविधैरपि ।। ४३ ।।

त्रिवारं सावधानेन गच्छ सर्वजयाय च ।। ४४ ।।

त्वदर्थे कैलासाचलवरसुपाली गतमहा-
समुद्यच्चन्द्राभस्फटिकधवलं लिङ्गकुलकम् ।
समानीतं सोमोद्यतविमलमौल्यर्चय परं
कलौ लिङ्गार्चायां भवति हि विमुक्तिः परतरा ।। ४५ ।।

स शङ्करो मां प्रणनाम मस्करी
मयस्करं तस्करवर्यमार्ये ।
सङ्गृह्य लिङ्गानि जगाम वेगवान्
(जेतुं)सद्यः सुबुद्धार्हतमिश्रजैनान् ।। ४६ ।।

तद्योगभोगवरमुक्तिसुमोक्षयोग-
लिङ्गार्चनात्प्राप्तजयः स्वकाश्रमम् ।
तान्वै विजित्य तरसाऽक्षतशास्त्रवादै-
र्मिश्रान् स काञ्च्यामथ सिद्धिमाप ।। ४७ ।।

।। इति श्रीशिवरहस्ये नवमांशे शङ्करप्रादुर्भावो नाम षोडशोऽध्यायः ।।

।। सप्तदशोऽध्यायः ।।

ईश्वर उवाच -

पुनः कलौ सहस्राणां त्रितयानन्तरं शिवे ।
भासुरो भासुराचारो भवेद्भवपदार्चकः ।। १ ।।

भस्मरुद्राक्षसम्पन्नः शैवः शिवपदार्चकः ।
तस्याङ्गसङ्गतः'शैवो भविष्यति कलावपि ।। २ ।।

मम भक्त्यन्तरासङ्ग पापसङ्धैकभङ्गकः ।
चोळेऽथ भविता देशे सह्यजातीरशोभनः ।। ३ ।।

लिङ्गसङ्गैकसुभग शिवक्षेत्रवराश्रये ।
तत्तीरे चम्पकाशोकनारिकेळोरुपानसैः ।। ४ ।।

लिकुचैर्वरमोचाम्रतमालद्रुमशोभिते ।
नानाशिवालयोत्तुङ्ग गोपुराग्रविराजिते ।। ५ ।।

बिल्वमन्दारपुन्नागकोविदारामलक्यकैः ।
शोभिते सह्यजातीरे विनिन्दितत्रिविष्टपे ।। ६ ।।

काश्मीररससर्वस्वसारभूतोत्तमोत्तमम् ।
श्रीकण्ठादिमहालिङ्गसेवितं तीरयोर्द्वयोः ।। ७ ।।

जम्बुकेशं मातृभूततृणरत्नेश्वरालयैः ।
ऐरावते पुष्पवने घृतेशं च शमीवनम् ।। ८ ।।

जप्येशं श्रीप्रयाणं च क्षीरिणीविपिनं शिवे ।
श्रीसुन्दरं पुरं दिव्यदक्षिणावर्तमेव ।। ९ ।।

कुम्भघोणं स्वामिशैलं दुर्गेशं धनुकेश्वरम् ।
मध्यार्जुनं तथा पुण्यं नागेशं गोवटेश्वरम् ।। १० ।।

कोटीशं मङ्गलेशं च तथाम्रं च द्रुतीश्वरम् ।
तथैव कंस नगरं श्रीवाञ्छ्यं तेजिनीवनम् ।। ११ ।।

श्वेतारण्यं मयूरेशं श्रीकालहरणं तथा ।
छायावनं तथा देवि वेदारण्यं सदाम्बिके ।। १२ ।।

कमलालयमीशानि लिङ्गालयमनुत्तमम् ।
अन्यानि दिव्यलिङ्गानि तस्मिन् चोले महेश्वरि ।। १३ ।।

विचोलभूतः पृथ्व्यास्ते देशोऽयं भारतेऽम्बिके ।
तस्मिन्सह्योद्भवातीरे ग्रामसाहस्रशोभिते ।। १५ ।।

द्विजाग्रहारसम्पन्ने नानासस्यविराजिते ।
वेदवादरतैर्विप्रैः शास्त्राध्ययनकोविदैः ।। १५ ।।

मखिभिः सुखसंवादैः सेविते जनसंयुते ।
भस्मरुद्राक्षलिङ्गार्चा निरतैरुपशोभिते ।। १६ ।।

मठोपकरणैर्दिव्यैर्यत्यावसथकल्पितैः ।
यतिभिर्विरतैश्चैव शिवयोग्युपसेविते ।। १७ ।।

तत्तच्छिवालयोद्भूतदिव्यतूर्यविनादिते ।
नरनारीगणाकीर्ण ब्रह्मविट्छूद्रसङ्करैः ।। १८ ।।

विपणापणवीथीभिः शोभिते [1]वणिजैरपि ।
फलपुष्पावनमित वनराजिविराजिते ।। १९ ।।

---

1. वणिग्भिश्चापि शोभिते ।

राजीवहल्लकोल्लासिसरोवराजिते ।
छायावृक्षाक्षतच्छायामण्टपैश्च विराजिते ।। २० ।।

पानीयशालाविरतपानीयहृषिते[1] जने ।
दिव्यान्नसत्रसङ्घुष्टद्विजसङ्घेन शोभिते ।। २१ ।।

महेश्वररथोद्योगकर्षज्जनविराजिते ।
क्वणत्कङ्कणनिःस्वान शोशुभ्यद्गणिकावृते ।। २२ ।।

नक्तं दीपावलीजालैरुद्यल्लिङ्गालयैर्वृते ।
महादेवमहोद्योग आभिषेचनिकोद्यतैः ।। २३ ।।

पुरुषैः श्रमणैश्चैव नानासंभार पाणिभिः ।
नारिकेलेक्षुसाराम्रपानसैर्लिकुचैरुमे ।। २४ ।।

मोचापञ्चामृतक्षीरघृत[2]क्षौद्रसुशर्कराः ।
तिलतैलदधीभिश्च गन्धपुष्पाक्षतादिभिः ।। २५ ।।

विल्वपङ्कजमन्दारमल्लीसर विराजितैः ।
नैवेद्यैः शर्करापूपैः स्वाद्वन्नैः पायसैरपि ।। २६ ।।

धूपदीपावलीभास्वन्नीराजितशिवालये ।
ताम्बूलवीणावेणूत्थदुन्दुभ्याधातापूरिते ।। २७ ।।

शिवालयेषु लिङ्गाग्रनृत्यद्वाराङ्गनायुते ।
विच्छिन्नसन्धिकरणवरगोपुरमण्टपान् ।। २८ ।।

---

1. ऽविरतपानहृष्यज्जनाकुले । 2. क्षौद्रसितादिभिः ।। तिलैस्तैलैश्च दधिभिः, अथवा दधितैलतिलैश्चैवेति ।

सुधाधवलितोदारान् पाषाणैरिष्टकाचितान् ।
नदीसरोवरस्वच्छतीरबन्धोरुमण्डपैः ।। २९ ।।

छत्रचामरपङ्क्तीभिर्वाहनानां च कारणैः ।
तद्भित्तिचित्रीकरणरुद्रक्रीडादिलोखनैः ।। ३० ।।

वृषोत्सवरथारूढशिवोत्सवनिरीक्षणैः ।
कुर्वन्ति[1] चोलावनिपास्ते षोडशमहैश्वरि ।। ३१ ।।

एवं कैङ्कर्ययुक्तास्ते चोळास्तत्रैव शङ्करि ।
तस्मिन्देशे विप्रवरो हरदत्तो मदंशजः ।। ३२ ।।

अशैवगजपञ्चास्यो भविष्यति महेश्वरि ।
तत्र कञ्जपुरे देवि ह्यग्नीशे भक्तिमान् द्विजः ।। ३३ ।।

बभूव हरदत्ताख्यो मदंशोऽयं द्विजोत्तमः ।
श्रीवाञ्छवासिनः कन्या भस्मरुद्राक्षधारिणः ।। ३४ ।।

शैवस्य तस्य सा माता दत्ता शैवाय सा तदा ।
तत्पिता कलिकालुष्यबलतो मोहमास्थितः ।। ३५ ।।

तप्तचक्राङ्कितैः सार्धं तप्तचक्राङ्कितो भवेत् ।
मृदोर्ध्वपुण्ड्रं सच्छिद्रं दधार किल पापतः ।। ३६ ।।

---

1 लट् प्रयोगः भाविवृत्तान्तकथनसङ्कल्पश्चेति न सङ्गच्छेते वर्तमानसमीप्ये लट् इति च पुराणविषये न युज्यते ।। उत्तरत्र च लृट् प्रयोगः दृष्यते । करिष्यन्ति च चोलेशा इति सङ्गतः पाठः ।

द्राविडानि भषन्पापः शुनामिव निरन्तरम् ।
एवं स्थितेऽथ विप्रस्य महिला कमलोपमा ।। ३७ ।।

वीथीस्थविप्रपत्नीभिर्ययौ नित्यं शिवालयम् ।
स्नात्वा मरुद्वृधातोये नत्वाचाग्नीश्वरं गृहे ।। ३८ ।।

सखीभिः सा ययौ गेहं भर्त्रा सन्तापितापि सा ।
तस्याः स्वप्ने विस्तृतोरुवक्त्रे कोपमयं महः ।। ३९ ।।

मयैव प्रेरितं तेजः प्राविशत्तन्मदंशकम् ।
सा दधार तदा गर्भं वर्धमानं दिने दिने ।। ४० ।।

ततः[1] सुषाव कालेन कुमारमिव पार्वती ।
सोऽप्यवर्धत कालेन पित्रोरान्ददायकः ।। ४१ ।।

पांसुक्रीडास्वपि शिवं पांसव्यं सोऽप्यपूजयत् ।
भस्मरुद्राक्षधृङ्नित्यं सवयोभिश्च बालकैः ।। ४२ ।।

तत्पिता प्राहरत्तं च नित्यं युक्तं शिवार्चकम्[2] ।
उपनीतः स कालेन वेदाञ्जग्राहशास्त्रवत् ।। ४३ ।।

उग्रप्रसादादत्युग्रा तस्याभूद्बुद्धिरुत्तमा ।
सस्नौ स सह्यजातोये कृतनित्यक्रियो वटुः ।। ४४ ।।

भस्मदिव्यत्रिपुण्ड्राङ्को रुद्राक्षस्रगलङ्कृतः ।
श्रीमदग्नीश्वरं नत्वा तथान्याञ्छाम्भवान् यतीन् ।। ४५ ।।

---

1. ततः कालेन सुषुवे कुमारमिव पार्वति ।
2. शिवार्चने ।

अग्रहीत्सर्वविद्यास्ता विद्याधिपपदार्चकः[1] ।
तत्पिता प्राहरत्तं च नान्नतोयप्रदायकः ।। ४६ ।।

तन्माता पुत्रवात्सल्यात् गृहप्रान्ते च तं तदा ।
समाहूय तथैकान्ते ददात्यन्नं दिने दिने ।। ४७ ।।

भिक्षित्वा सोऽपि विप्रेभ्यो गृहीत्वान्नमबूभुजत् ।।
कालेन निधनं प्राप्तस्तत्पिता नरकं गतः ।। ४८ ।।

तस्योचितक्रियाः पुत्रश्चकार द्विजपुङ्गवैः ।
तत्रावात्सीद्गृहे नित्यं शिवमभ्यर्चयंस्तदा ।। ४९ ।।

विवाहाय मतिं चक्रे कन्यां कोऽप्यददाद् द्विजः ।
तामुद्वाह्य महासोमैराराध्याश्रमतत्परः ।। ५० ।।

देवं लिङ्गेऽर्चयन्नित्यं त्रिकालं भस्मभूषणः ।
अग्नीश्वरं तथा नत्वा सप्तग्रामाणि सञ्चरन् ।। ५१ ।

तत्र तत्र महेशानं नत्वाऽऽयाति स नित्यशः ।
तस्य भक्ति तथा ज्ञात्वा दह्यमाना हि वैष्णवाः ।। ५२ ।।

ऊचुस्तं क्रोधताम्राक्षा ऋक्षा इव द्विजाधमाः ।

वैष्णवाः

भो भो विप्रार्भक त्वं हि महादेवपदार्चकः ।। ५३ ।।

---

1. हरदत्तकृते 'ब्रह्मतर्कस्तवे' "विद्याप्रदं वरद विश्वसिभः कमन्यं विद्याधिपे भवति विश्वगुरौ प्रतीते" इति विद्याधिपत्वेन शिववर्णनपरं पद्यमेकं दृश्यते । विस्तरेण हरदत्त चरित्रस्य वर्ण्यमानत्वाच्च शिवरहस्यं तद्विरचितं भवेद्वेति संशयो जायते ।

शिवोत्कर्षे त्वमस्माकं प्रमाणं कुरु मा चिरम् ।
नो चेत्सन्तप्तचक्राङ्को भव त्वं त्वयि नोऽप्रमा ।। ५४।।

शिवोत्कर्षप्रमाणेन यदि प्रामाण्यदं हि नः ।
भस्मरुद्राक्षसम्पन्नाः शिवलिङ्गार्चकाः सदा ।। ५५ ।।

भवामो नात्र सन्देहस्सन्तप्ताग्नौ त्वमावस ।

स्कन्द उवाच -

इति वैष्णवाक्येन हरदत्तोऽतिहर्षितः ।। ५६ ।।

न्यवेदयत्तदा राज्ञे चोषभूपं निरीक्षीतुम् ।
शिवलिङ्गाख्यचोलोऽपि तत्रागात्सेनया सह ।। ५७ ।।

अग्नीश्वरं तथा नत्वा हरदत्तं च वै शिवे ।
वैष्णवांस्तान्समाहूय लिख्य पत्राणि चैतयोः ।। ५८ ।।

विस्तारमायसं तप्तं कृत्वाग्नीशस्य सन्निधौ ।
आहूय नृपतिं तत्र ब्रह्मक्षत्रविशःस्त्रियः ।। ५९ ।।

वैष्णवांस्तांस्तथा शूद्रान् सङ्करान् हरदत्तकः ।
स्नात्वा कवेरजातोये भस्मरुद्राक्षभूषणः ।। ६० ।।

प्रदक्षिणत्रयं कृत्वा नत्वाचाग्नीश्वरं शिवे ।
उत्फुल्लपद्मसङ्काशं समारुह्य तदायसम् ।। ६१ ।।

ऊर्ध्वबाहुरथावादीद्वेदसारवचो द्विजः ।
पश्यत्सु जनसङ्घेषु वैष्णवेषु नृपेऽपि च ।। ६२ ।।

हरदत्त उवाच

महादेवो देवः श्रुतिशिखरमौलिस्थवचनै-
स्तथान्ये विष्ण्वाद्याविधिहरिहरेन्द्रानलयमाः ।
महादेवाज्जाताः श्रृणुत वरसोमेन जनिता
अतो वेदैर्वेद्यो भवति शिव एकः शिवकरः ।। ६३

मखानामेवायं प्रभुरखिलविश्वाधिक हरः
स वेदादौ चान्ते स्वरजनिततारः परशिवः ।
यतो ब्रह्मेन्द्राद्या हरिरविमुखा रुद्रनिवहाः
प्रसूता ध्येयोऽयं श्रुतिशिखवाक्यैः परशिवः ।। ६४ ।।

ऋतं सत्यं देव पुरुषपरमो भूतहृदयो
नमोऽन्तानां शेषी श्रुतिवरमहारुद्रवचसाम् ।
रवेरन्तर्ध्येयो भवति स हि भर्गेन(ण)वचसा
द्विजैर्गायत्र्यां च प्रतिपदमुपास्यः परशिवः ।। ६५ ।।

यतो वाचः शम्भोर्भवति च निवृत्ताश्च मनसा
महानन्दं यस्माद्भवति जनतास्वेव निपुणम् ।
जगद्यस्माज्जातं प्रभवति महेशेन जनितं
अतोऽन्ते तस्मिन्यद्भवति च विलीनं परशिवे ।। ६६ ।।

द्विजानां जाबालश्रुतिगदितवर्णाश्रमविधिः
महात्रैविध्योक्तः श्रुतिगदितवर्णाश्रमविधिः ।
शिवस्यार्चालिङ्गे श्रुतिगदितभस्माक्षविधृति-
र्जपो रुद्रस्यायं श्रुतिगदितपञ्चाक्षरमनोः ।। ६७ ।।

विष्णुब्रह्मानलेन्द्रा मुनिनृपदितिजा यस्य लिङ्गार्चनाद्वै
सम्प्राप्ताः पदवीं सदैव मुदितास्तैः कर्मदेवा जनाः ।
एतत्सत्यमहो त्रिसत्यमधुना वच्मीदमग्नीशितुः
सान्निध्ये निवसामितत्सुखमहं पद्मेवतत्पायसे ।। ६० ।।

इत्युक्त्वा हरदत्तकस्त्रिजगतीनाथं प्रणम्यादरा-
न्निस्तीर्णः सुमहायसोरुशयनादुत्तीर्य राज्ञार्चितः[1] ।
शौवेन्द्रैर्हरभक्तिभावजनितैः सानन्दबाष्पाम्बुभिः
लोकैः साध्विति नन्दितो हरकृपापीयूषवारान्निधौ ।। ६९

मग्नस्तान्द्विजवैष्णवाधमपशून् भस्माक्षपूतान्करोत्
विप्रःकश्चन विप्रवध्य(?)जमहादोषैर्युतोनिन्दितो
विप्रैर्वै हरदत्तकेन स तदा सम्भोजितः पावितः
मन्नाम्नैव शिवेति तं सकृदुमे मल्लिङ्गसान्निध्यगं
विप्राह्या(?)स वरं प्रदाय वृषभं व्यावृत्तवक्त्रं करोत् (?) ।। ७० ।।

एवं कलावपि भवन्ति ममेष्टशैवा
लोकाय दर्शितुमुमे मम भक्तिभावम् ।

---

1. भविष्यतीति शेषः ।

ते चापि सोमसुललामविदीप्तनेत्राः

कैलासमेत्य सुखिता निवसन्ति[1] शैवाः ।। ७१ ।।

[3]शैवग्रन्थानुबन्धद्युतिविजितजनेषुद्यततमो-

ऽप्यभेद्यं निर्भिद्य श्रुतिगदिततात्पर्यवचनैः ।

द्विजैः शैवैरन्ते कलिकुपथकालुष्यजनिते

सदेहः कैलासं मम स हि शिवे यास्यति द्विजः ।। ७२ ।।

कलौ छन्दोगोऽपि श्रुतिशिखरतात्पर्यवचनै-

र्महाग्रन्थोद्‌बन्धैर्जयति मतवादिद्विप हरिः ।

भिनत्येवं दीक्षाक्षपित सुखवृत्तिः शिवपदे

शिवे दभ्रस्थाने भवति च ततोऽन्ते मम गणः ।। ७३ ।।

।। इति श्रीशिवरहस्ये नवमांशे गौरीहरदत्तचरिते नाम

सप्तदशोऽध्यायः ।।

---

1. करोत् इति प्रयोगः कुर्यात्, करिष्यतित्यर्थे एव सङ्गतार्थो भवति । अकरोदित्यर्थे करोदिति प्रयोगः नोपपद्यते ।। निवत्स्यन्तीत्यर्थे ।।

2. शिवग्रन्थाबन्धात् ।

शैवग्रन्थानुबन्धद्युतिविजितजनेषुद्यततमो-

ऽप्यभेद्यं निर्भिद्य श्रुतिगदिततात्पर्यवचनैः ।

महाग्रन्थोद्वोधैर्जयति मतवादि द्विपहरिः भिन्नत्येवं दीक्षा ।

।। अष्टादशोऽध्यायः ।।

देव्युवाच

के ते भाव्याः शिवे भक्ता भव्या भवपदार्चकाः ।
किं तेषां चरितं शम्भो विस्तरेण वदस्व मे ।। १ ।।

स्कन्द उवाच

इति देव्या महादेवः पृष्टस्तुष्टोऽभ्युवाच ताम् ।
कैलासशैलसदने मदनान्तकरो हरः ।। २ ।।

शिवः उवाच

श्रृणुष्वैकमना भद्रे मद्भक्तचरितं मुदा ।
कलावपि भवन्त्येवं मत्प्रसादाच्च शङ्करि ।। ३ ।।

शाङ्कराः शङ्करासक्तमानसाः कमलानने ।
मत्स्तुत्या स्वस्तये लोके ते भवन्त्येव तारकाः ।। ४ ।।

तारकाः पापसङ्घानां वराका अपि शङ्करि ।
तदग्रे चरितं तेषां लोकानां विस्मयावहम् ।। ५ ।।

भविष्यति कलौ देवि मद्भक्तचरितं सदा ।
भक्तिं दर्शयितुं लोके मया सृष्टा महेश्वरि ।। ६ ।।

त्रिषष्टिपरिमाणास्ते भक्तिप्रामाण्यदर्शिनः ।
तदग्रे मुनिमुख्यानामुपमन्युर्महाद्युतिः ।। ७ ।।

भक्तिप्रभावं सर्वेषां भक्तानां वदति स्वयम् ।
तदेतत्ते प्रवक्ष्यामि नास्ति सङ्ग्रहविस्तरम् ।। ८ ।।

वदामि ते मुदा देवि सदा लोकेषु भूतये ।
मद्गणस्य महादेवि सुन्दरस्य कथाश्रयम् ।। ९ ।।

कैलासे मम देवेशि नानाश्चर्यसमन्विते ।। १० ।।

उद्दालसाल कृतमालतमालताल-
बालाम्रजावरलबिल्वसुमूलमूले ।
लिङ्गानुषङ्गवरभूधरसङ्गसाङ्ग-
मातङ्गतुङ्गसुकुरङ्गकिणाधिकान्ते ।। ११ ।।

जालावलीजटिलफालतलाभिराम-
निर्यत्कृशानुशरजालविशालमार्गे ।
लोलाक्षकालकृतनीलसशूलदग्ध-
कामाङ्गभस्मसगिरीश्वरमौलिमूले ।। १२ ।।

उद्यच्छशाङ्ककरसन्निभपर्वतेन्द्र-
श्रीमौलिलिङ्गकुलधामकलोत्तमाङ्गे ।
गङ्गातरङ्गभवनीरजफुल्लगन्ध-
बन्धद्विरेफ वरसारसकोककान्ते ।। १३ ।।

उत्फुल्लकेतक कदम्बजकर्णिकार-
मालूरपुष्पसहकारभवोरुवाते ।
केकारवैः परभृतां शुकशारिकाणां
सारङ्ग बृह्मितवरैर्गिरिसानुजाले ।। १४ ।।

उद्घोषितान्तरमुखान्तर सारभार-
निर्यत्प्रभाकरकरैः कलधौतशैले ।
मुल्लीजमल्लिवरवल्लिसमूहपाली-
झिल्लीगणैश्चटुरणद्गणबृन्दजाले ।। १५ ।।

निःसाणबाणकरघोणमहोरुहास
वाद्यन्मृदङ्ग वरदुन्दुभिनादयुक्ते ।
कुन्देन्दुसन्निभमहावरसागरोद्य-
त्कञ्जोरुनादबधिरीकृतदिङ्मुखाद्ये ।। १६ ।।

माद्यद्वृषेन्द्रवरगर्जनतर्जितोरु-
मातङ्गसिह्महरिणीकरुणाक्षकूले ।
उत्पुच्छचामरगणैः सृमरीवृकादि
दंष्ट्रैर्हयारिगणधावनमौलिजाले ।। १७ ।।

वातादिघर्षणमहारववेणुमौलि-
सञ्जातवह्नि शिखरारुण कान्तिकान्ते ।
स्रग्गन्धगन्धवहबन्धुरधूमतान्त-
गन्धैर्विसर्पितगरागरु देवदारैः ।। १८ ।।

कैलासशैलमणिगोपुरमौळिजाल-
कुम्भोद्यतामलमणि व्रजकान्ति कान्ते ।
दोधूयमानसुपताकततिप्रभाभि
रादीपिते तिमिरहारिणि पर्वतेन्द्रे ।। १९ ।।

अदलितकदलीदलोरुभार-
सन्नाळिकेरसुरसालसुमौलिभारैः ।
आन्दोलिते च सुसमीरणकारणे च
सन्तारणे गिरिशिखासुसमीरकान्ते ।। २० ।।

मणिगणसुखवालुकाभिरामे
गिरिमौलौ गणवृन्दतोषयुक्ते ।
गिरिगरिमधुरिमानुसानु-
भानुद्युतिविद्युत्प्रभाविते तते च ।। २१ ।।

फणिफणामणिजालबालविद्यु-
त्प्रभयाभासितकाशितान्तरे गिरौ च ।
तरुणारुणसुप्रभाभिराम-
द्युतिविद्युत्प्रभमालमौलिजाले ।। २२ ।।

तत्सौधजालपरिकल्पिगवाक्षशिक्षा-
शिल्पेषु नाल्पमतिभिः परिचिन्तनीये ।
तस्मिन्कैलासमौलौ परिमलकुसुमासारधारानुबन्धि
गन्धस्पर्धाभिधावत्प्रतिनगकुसुमोदग्रषट्पादकान्ते ।। २३ ।।

शान्ते चाम्बुजबृन्दबम्भररवे वैतंसिके मारुते
मत्पादाम्बुजपूजनोत्सवमतिः कश्चिद् गणेषूत्तम-
स्तत्पुष्पोपचयाय सम्प्रति ययौ कैलासमौलीवनम् ।। २४ ।।

समुल्लसितयौवनो मदनकोर(र)कान्तप्रभा-
विभासितदिगन्तरो भसितभूषदिव्याङ्गकः ।
मदेभकरसप्रभप्रबलहस्तदण्डोज्ज्वल-
त्त्रिपुण्ड्रललितालको(कः) सुरवरारिसम्मर्दनः ।। २५ ।।

रुद्राक्षोत्तमहारकण्ठवलयोऽनङ्गाङ्गभङ्गार्चको
लिङ्गे तुङ्गसरोजबिल्वकुसुमासारैश्च सम्पूजकः ।

तस्मिन्पुष्पवने समीरणगलत्पुष्पोच्चयोच्चद्रव-
त्क्षौद्रासारपरागरञ्जितमहीपीठे सुशान्ते तदा ।। २६ ।।

माकन्दद्रुमपल्लवोत्सवलसद्वासन्तिके चान्तिके
उत्फुल्लारुणपद्मरागसदृशप्रोद्यन्मणीन्द्रप्रभाम् ।
भास्वत्कोकिलकाकलीरवयुते नाम्नाप्यसौ सुन्दरो
दृष्ट्वा तां चकमे कलासु सुशलः पञ्चेषुबाणाहतः ।। २७

मुञ्चन् स्वं नयनाम्बुजाञ्चलगलद्धैर्यो वरोऽसौ युवा ।। २८ ।।

ततः पाळीपालागतिजितमराळीमिव तदा
शिवे व्यालीवेणीमणिगणसदृक्षालकराम् ।
स्मराम्भोधेः केलीवनभुवि सुगन्धर्वसरली-
विशेषान्गायन्तीं स्मरखुरलिकां तां स ददृशे ।। २९ ।।

मत्तेभकुम्भसदृशोरुकुचाग्रभाग-
संलग्न चूचुकभरामधरोरुबिम्बाम् ।
धम्मिल्लभागकृतमल्लिसमूहगन्ध-
बन्धद्विरेफचिकुरां मुकुराभवक्त्राम् ।। ३० ।।

तस्याननेन्दुपरिकल्पिकलङ्कशङ्का-
राजत्सुधांशुमिव तां तिलकात्तफालाम् ।
आलोलमारशरकृत्तमहोरुवक्षां
त्र्यक्षार्चकोऽपि न शशाक तदाक्षिजालम् ।। ३१ ।।

सापि प्रमोदमदभारकटाक्षसारै-
रीषद्विकासिमुखपङ्कजजातहर्षा ।

तं चापि सुन्दरनरोत्तमयौवनोद्य-
त्संवृत्तगात्रमभिवीक्ष्य जगाम हर्षम् ।। ३२ ।।

तावुद्यतोद्धतसुमन्मथबाणजाल-
विद्धाङ्गकौ मदनकेलिषु जातहर्षौ ।
किञ्चिद्विवृत्त्य वनमध्य निकुञ्जसीम्नि
सेवाभिलग्नहृदयौ ययतुस्तदानीम् ।। ३३ ।।

तावागतां(तौ)अभिसमीक्ष्य ममान्तिके तं
त्वत्सन्निधानरसिकामथ तां च दृष्ट्वा ।
दृष्ट्वा सहर्षमधुना तमवोचमेवं
तं सुन्दरं मदनबाणगणाभितप्तम् ।। ३४ ।।

ईश्वरः (उवाच)
त्वं सुन्दराशु भुवि भोगपरम्परासु
किञ्चिद्विहृत्य मम सद्मनि पश्य लिङ्गम् ।
योषा तवैव भवतां(तात्) कमलेव विष्णो-
रेषा सखी कमलिनी सततं हि देव्याः ।। ३५ ।।

इत्थं मद्वदनाम्बुजच्युत महाविद्युत्प्रपातोपमं
वाक्यं स श्रवणाम्बुजाञ्चलभरैः संशुश्रुवे तादृशम् ।
प्राणंसीद्विनयेन पाहिं नितरामागस्करः सुन्दर-
संतुष्टावाष्टतनुं प्रकृष्ट(हृष्ट) हृदयो निष्ठावता चेतसा ।।

सुन्दरः उवाच -
नाकनायक विनायकस्तुत गरलभक्षक हारतक्षक
कुक्षिसंस्थितलोकरक्षक वीक्षणक्षण(क्षत)मन्मथान्तक ।

पाकमुनिसुतजीवदायक हस्तशस्तविरिञ्चिमस्तक
पाहि मामखिलपातकान्तक देव देव भवाम्बुधेः ।। ३७ ।।

सुखतारकाव मदुन्मुखप्रभ पार्श्वषण्मुख
दुःखभर्जक सर्गसर्जक तर्जितासुर गर्जनोर्जित
वर्जिताखिलपाप तापनिवारकाव मखोन्मुखो-
त्सुकलेखशिक्षक गाङ्गतुङ्गजटोत्तमाङ्ग-
सुसङ्ग बालकुरङ्ग किणधरलिङ्गसङ्ग भस्मधूसरिताङ्गा-
हस्करारुणितेक्षण क्षतपापस्मर तस्करोत्तम
धनप्रभूत्तम कन्धरेश्वर भूरथस्थित चन्द्रखण्डशिरोमणे ।। ३८ ।।

गजचर्मवर्म चराचरास्थित विष्णुचक्रविदायक
पञ्चवक्त्र चतुर्मुखस्तुत छन्दसांगणदायक छादिता-
खिलविश्व जगज्जन्मस्थितिविनाशनाव जञ्जपूक वरप्रदायक ।।

झणज्झण इव (नव) नूपुरोत्तमपादपङ्कज, टङ्ककर, हर, देवतटिनीजूट, जठरीलोक, कुण्ठितपापवृन्द, विकुण्डपूजितपाद, मृड, हर, डमरुध्वाननदित भुवनडम्बर, कुण्डलीश्वरकुण्डलप्रिय, चण्डभानुसुतार्तिदायक, मण्डलीकृतपर्वताधिप चण्ड दण्डित वैरिपुरवरखण्डनोद्धतकाण्ड, गुरुतरमुण्डषण्डविराजितेश्वर खाण्डवाशनलोचन ।। ४० ।।

पुण्डरीकत्वचाविभूषित वेतण्डवरशुण्डगुरुरम्यभुजदण्ड धारितवर-कोदण्ड पण्डितोत्तम, भण्डजन हर, कर्मकाण्डनिषूदन, भक्ति-दृढतरमुक्तिदायक (दृढतरभक्तिमुक्तिदायक) गूढपाद्वर, मूढजनता-गाढहृत्तमोभेदकार्क ।। ४१ ।।

विभूषणीकृतपन्नगेश्वर, नगोत्तमवास, गुणगणनन्दितानन, ताम्यमान भवस्थितावन, ताम्रसंस्थित, तस्कराधिप, दीनसदयसनाथनाथित मन्मथान्तक, दन्दशूकफणामणिद्युतिरञ्जिताङ्ग, दारिद्र(दारिद्र्य) नाशक, देव देव दयानिधे ।। ४२ ।।

मानवाद्य (मामवाद्य) धनाधिपप्रिय धेनुपुत्र रथप्रियाध्वरशिक्षकावन-नायकाव विनायकप्रियवाहपूजिताम्बुजपाद नानताखिलमुक्तिदायक,[1] पापभयहर पन्नगप्रिय, पत्ररथवर पूज्यमानपदाम्बुज, फाणिताखिल वेदजाल, फणीश्वरोत्तमबन्धमोचन, बन्धुरालक, बिल्वपूजित बाणलिङ्गविहारशङ्कर ।। ४३ ।।

भद्रदायक भस्मभूषित भक्तिदायक, भीम, भूम, महेश्वरेश्वर मन्मथान्तक, विश्वसृग्वर, हस्तशस्तकमस्तक, यक्षपक्ष विवर्जितक्षण, यक्ष्मरोगविनाशक, राजराजकलाविराजितमस्तक[2], सर्वदेवललाम, सोम, भवहर भीमलोचन लालितोत्तम, हस्तशूल-सलीलकीलितविश्वक ।। ४४ ।।

षण्मुखस्तुत षड्जमध्यग, पापपण्डविशोषण, सर्वमुनिगण-हृत्पाथोजविहारभृङ्गवरोत्तम । सामजप्रिय कृत्तिधारण, सामसंस्तुत देव, भवहर, हारभूतविषोल्बण सत्फणी(णि) गण शोभित ।। ४५

हावभावविलासवैभव हारिताखिलविष्टपत्रय, क्षत्रियान्त[1]करामपूजित दक्षयज्ञविनाशनाव माम् । लोकशिक्षक भिक्षिताखिलमौनिपक्षग त्र्यक्ष जगदध्यक्ष मामव पाहि माम् । पाहिमामखिलार्तिनाशन हे महेश्वर किङ्करस्तव शङ्करोऽपि भवेद्वरदयेक्षणात् ।। ४६ ।।

---

1 पुनः पुनर्नमज्जनमुक्तिदायक । 2. चन्द्र । 3. भार्गवराम ।।

रक्ष मां शिव त्र्यक्ष रक्षक पक्षपातदृशा पाहि मां तवापराधिनं भवमूढं धाष्टर्यपरायणम् । या तवाप्यधिवक्तृता शिव महेश्वर पाहि मामवाङ्मनोविषयानतेः स्तुतिरियं श्रुतिमौलिजैः । भक्तितः शशिशेखर महेश्वरेश्वर पाहि माम् ।। ४७ ।।

ईश्वर उवाच -

इत्थं संस्तुत्य मां देवि सुन्दरो विनयानतः ।
अवाङ्मुखो दीनमना व्यतिष्ठत कृताञ्जलिः ।। ४८ ।।

गव्यैरनङ्गमदभित्प्रियलिङ्गमौलिं
संसिच्य चन्दनविलेपनबिल्वपत्रैः ।
सम्पूज्य धूपवरदीपनिवेदनाद्यै
दत्वा(?)स्तुवन्ति नतिभिः किल शैववर्याः ।। ४९ ।।

यो मातृकास्तवमिदं(मं) पठति प्रदोषे
नत्वा विभूतिकवचो मदजाक्षमालः ।
भूत्वा विभूतिकवचो(चः) प्रसमीक्ष्य लिङ्गं
स्तुत्वा महाघनिचयैः स विमुक्त एव ।। ५० ।।

भ्रातृव्यं विनिहत्य भव्यपदवीमव्याहतात्मा सुखी
काव्योत्तेजि शरीरकान्तिविलसत्(न्)स्तव्यं त्विदं व्याहरन् ।
न व्यावृत्तिमुपैति दिव्यसुमहायानैश्चरत्येव सो
मन्तव्यं मनुतेऽप्यसौ श्रुतिशिरोगं याति चान्ते गतिम् ।। ५१

।। इति श्रीशिवरहस्ये नवमांशे सुन्दरस्यशापो नामाष्टादशोऽध्यायः ।।

।। एकोनविंशोऽध्यायः ।।

देव्युवाच

देव देव महादेव सृष्टिस्थित्यन्तपालक ।
अनङ्गेनाङ्गनायाश्च कमलिन्या विशेषतः ।
सुन्दरस्य महादेव किं वा चोक्तं गणाग्रणेः ।। १ ।।

त्वयैव देवदेवेश शशिशेखर धूर्जटे ।
अनुग्रहः कथं तस्य कृतो देव दयानिधे ।। २ ।।

तन्मे वद विशेषेण त्वं कृपां कुरु शङ्कर ।

स्कन्द उवाच -

इत्थं देव्या तदा पृष्टः शिपिविष्टो महेश्वरः ।। ३ ।।

तुष्टः कष्टहरस्तस्या वचसाप्यष्टमूर्तिमान् ।
उवाच देवीमालोक्य सहर्षं स त्रिलोचनः ।। ४ ।।

मुनिश्रेष्ठैः सुरश्रेष्ठैर्गणश्रेष्ठैश्च त्वं श्रृणु ।

महेश्वर उवाच -

श्रृणुष्व गिरिजे तत्र सुन्दरेण स्तुतस्तदा ।। ५ ।।

तमब्रवं महादेवि सुन्दरं लोकसुन्दरम् ।
ईश्वर उवाच -
त्वं सुन्दर गणश्रेष्ठ कमलिन्यानया सह ।। ६ ।।

सह्यजायास्तटे पुण्ये शिवक्षेत्रे तटद्वये ।
श्रीकण्ठरत्नगिरिराण्मातृभूतगिरौ तथा ।। ७ ।।

तृणज्योतीश्वरे पुण्ये पुण्ये पञ्चनदे तथा ।
शमीवने कुम्भघोणे तथा मध्यार्जुने मुने ।। ८ ।।

मायूरे तेजिनीनाथे श्वेतारण्ये द्रुतिस्थले ।
बिल्वारण्ये श्रीवाञ्छे तथा छायावने गण ।। ९ ।।

लिङ्गालये तथा पुण्ये विशिष्टे कमलालये ।
वेदारण्ये सेतुबन्धे हालास्ये च विशेषतः ।। १० ।।

श्रीमद्दक्षिणकैलासे पुण्ये चैवारुणाचले ।
गोपर्वते च वृद्धाद्रौ पुण्डरीफपुरे तथा ।। ११ ।।

स्तुत्वा मां सम्यगाराध्य समायाह्यनया गण ।
कमलिन्यानया सार्धं मा च ते स्मृतिविप्लवः ।। १२ ।।

भविष्यति च मानुष्ये स्मृतिर्मद्भक्तिगौरवात् ।
इत्युक्तो मां प्रणम्यासौ त्वां चापि गणपाग्रणीः ।। १३ ।।

मलिनी सा कमलिनी मदनेन हृतान्तरा ।
ह्रिया किञ्चिन्नता मां सा तुष्टाव शशिशेखरम् ।। १४ ।।

कमलिन्युवाच -

चन्द्रभानुकृशानुलोचन सर्वपावननाम भुवनविराम
बुधजनसामस्तुतवरसाम मदनशमन गराशन
को नु वेद महिमानमीश्वर तेऽम्बुजासनवारिजेणा-
वपीह वञ्चितौ मौलिमूलविलोकनेऽपि च कस्स्तवे-
मतिमीहते मामवेश अनङ्गसङ्गशरार्दिताङ्गाङ्गना-
मङ्गनार्धकृतार्धगात्र शिव त्रिणेत्र पवित्र माम् ।। १५ ।।

उद्वृत्तोद्धतक्षपक्षसुरतामिक्षाभुजाध्यक्षक ध्वाङ्क्षाङ्ग-
प्रभदैत्यहन्तृमदभित्सन्धुक्षिताधोक्षज ।
उक्षाधीश्वरकेतन स्मरहरापाङ्गेक्षण त्वां भजे
वृक्षाणामधिपं वलक्षभसिपाराङ्गवक्षाक्षतम् ।। १६ ।।

मखमुख शशिशाखाखाशेखरोद्वृत्तलेखा
सुखविशिखमयूरवास्त्यक्त दुःखाखुवाहाः ।
शिखिवहमुखनेत्रोत्तेजिपद्मोरुमाला-
विकसनसुखगोल्कं त्वां भजे खण्डपर्शुम्(?)।। १७ ।।

यज्ञेश विज्ञानद दक्षयज्ञ-
विनाशकाज्ञानविकर्तनेश ।
त्वदाज्ञयाऽयं विधिविष्णुसर्गः
संवर्तते ज्ञापय मां विमुक्त्यै ।। १८ ।।

पवनानलदाशुषात्मकोऽसि खंगा (गोख)
तपनेन्दुतनुभाक्त्वमेव शम्भो ।
तवमूर्तिभिराभिरेव लोकं
शिव धत्से क्व नु तेऽस्ति वर्णनाशः ।। १९ ।।

स्कन्दः -

इत्थं देवि तया सख्या तव स्तुत्या स्तुतस्तदा ।
प्रसन्नोऽस्मि तया स्तुत्या तामवादिषमेव हि ।। २० ।।

ईश्वरः (उवाच)

श्रृणु भद्रे विशालाक्षि भूमौ त्वं सुन्दरेण हि ।
विहृत्य मम कैलासमागच्छद्रुतमेव हि ।। २१ ।।

शब्दोषाः शोधनार्हाः

जातिस्मरा भव त्वं च मद्भक्त्या च विशेषतः ।
कमलालयमासाद्य लिङ्गालयमनुत्तमम् ।। २२ ।।

गाननृत्तपरा साध्वी सुन्दरेणामुना सह ।
स्मरकेलिषु विश्रान्ता समायाहि मदान्तिकम् ।। २३ ।।

इत्युक्तमात्रे च मया तदा कमलिनीगणौ ।
प्रणेमतुर्मत्पदाब्जं भक्तियुक्तौ दृढव्रतौ ।। २४ ।।

प्रोचतुः परया प्रीत्या मां च त्वां चापि तौ तदा ।

सुन्दरः (उवाच)

देव देव महादेव शरणागत वत्सल ।। २५ ।।

यत्र यत्र भजे जन्म तस्मिन्भक्तिः पदे तव ।
भवताद्भवपादाब्जे भवोद्भव सदावयोः ।। २६ ।।

कस्मिन् क्षेत्रे महादेव तव सान्निध्यमुत्तमम् ।
पुण्ये सह्यापगातीरे शिवक्षेत्रविराजिते ।। २७ ।।

नानाशैवजनाधारे द्विजग्रामसमावृते ।
तद्वदाद्य महादेव त्वद्भक्त्या पृच्छतो मम ।। २८ ।।

स्कन्दः (उवाच)

इति सुन्दरवाक्येन जातहर्षो महेश्वरः ।
उवाच सुन्दरं वीक्ष्य तदा कमलिनीमपि ।। २९ ।।

ईश्वर (उवाच)

भुवोमण्डलमेतद्धि सप्ताब्धिपरिवेष्टितम् ।
वर्षेष्वपि च सर्वेषु भारतं पुण्यमुत्तमम् ।। ३० ।।

द्वीपेषुच गणश्रेष्ठ जम्बूद्वीपोऽयमुत्तमः ।
देशेष्वपिच सर्वेषु चोलोऽयं पुण्यकृत्तमः ।। ३१ ।।

तस्मिन् सा सरितां श्रेष्ठा कावेरी पुण्यनिम्नगा ।
दिग्भ्यो दशभ्यो गणप दक्षिणा दिग्विशिष्यते ।। ३२ ।।

घटोद्भवो मुनिर्यत्र विन्ध्यहृत् संस्थितः पुरा ।
व्याघ्रापादमुनेर्यत्र सन्न्यधत्त महेश्वरः ।। ३३ ।।

पुण्डरीकपुरं यत्र धाम तत्र कपर्दिनः ।
त्वयाहं नित्यसान्निध्यात्सायं ताण्डवतत्परः ।। ३४ ।।

सर्वैर्देवैश्च मुनिभिः गणवृन्दैः सदा नतः ।
तत्र स्थितोऽहं देवेशि गणेन्द्र श्रृणु तत्सदा ।। ३५ ।।

श्रीमद्दक्षिणकैलासे विलासो मम सर्वदा ।
यत्र दन्तावलः पूर्वं पूजयामास मां तदा ।। ३६ ।।

विरिञ्चिनारायणयोर्हंसक्रोडशरीरयोः ।
अदृष्टमौलिपदयोर्निसर्गागतगर्वयोः ।। ३७ ।।

अरुणाचलरूपोऽहं तरुणेन्दुशिखामणिः ।
अचलेन्द्रं सदा पश्य प्रदक्षिणपुरःसरम् ।। ३८ ।।

अहं चिरगिरिस्तत्र देव्या वृद्धाम्बया त्वया ।
सन्निधास्याम्यहं तत्र तथा गोपर्वते द्विज ।। ३९ ।।

कम्पातीरे गणश्रेष्ठ स्मराक्ष्याहं त्वया शिवे ।
एकाम्रमूलनिलयः सन्निधास्याम्हं सदा ।। ४० ।।

सह्यापगाया मूरे तु श्रीकण्ठेश्वरसंज्ञितः ।
साक्षाद्रत्नगिरीशोऽहं तृणज्योतीश्वरोऽप्यहम् ।। ४१ ।।

तथा मातृगिरौ पुण्ये सिन्धुरारण्यसंस्थितः ।
धृतस्थाने तथा पुण्ये तथा जप्येश्वरे गण ।। ४२ ।।

तथाहं सुन्दरगिरौ क्षीरिणीविपिनेऽपि च ।
दक्षिणावर्तके स्थाने कुम्भघोणेऽर्जुनेऽपि च ।। ४३ ।।

ब्रह्मारण्ये बिल्ववने श्वेतारण्ये गणोत्तम ।
छायावने च श्रीवाञ्छ्ये तेजिनीविपिनेऽपि च ।। ४४ ।।

दुर्गेश्वरे मङ्गले च त्रिकोटौ च महेश्वरि ।
तथैवाम्रवणे देवि वेदारण्ये तथैव च ।। ४५ ।।

कमलालयसंज्ञे च वल्मीकेश्वरसंज्ञितः ।
श्रिया यत्र तपस्तप्तं बहुवर्षगणं गण ।। ४६ ।।

तत्र संवस सेवाशु (सेवस्व) कमलिन्याऽनया गण ।
तत्राहं तव भक्तिं च परीक्ष्य सुचिरं गण ।। ४७ ।।

कमलिन्या विवाहं ते कारयामि समाहितः ।
सेतुबन्धेऽहममलो हालास्येऽप्यहमास्थितः ।। ४८ ।।

ताम्रपर्ण्यास्तटे पुण्ये शिवक्षेत्रेषु संस्थितः ।
अन्यानि पुण्यस्थानानि ममैव गणपोत्तम ।। ४९ ।।

एषु स्थानेषु नियतं संवसन् गानधारया ।
स्तुत्वा मां नियतौ गौर्या कमलिन्याऽनया सह ।। ५० ।।

भक्त्या मां त्वं समभ्यर्च्य कैलासं त्वं सदा मम ।
समायाहि मुनिश्रेष्ठैः शैवैः सर्वजनार्चितैः ।। ५१ ।।

चोळद्रविडभूपालैः सेविते देशसत्तमे ।। ५२

कमलालयसंस्थितोऽस्मि नित्यं
मुचुकुन्दाद्यभिसेव्य पादपद्मः ।
हरिणा शतमन्युना च तत्र
गणवृन्दैर्मुनिभिश्च सेवितोऽस्मि ।। ५३ ।।

तत्र त्वं गणपाग्रणेऽनया त्वं
संसेव्यामरवृन्दपूज्यपादम् ।
परितुष्टः सततं वसैव भक्त्या
मम भक्तैः कमलाविलासलोलः ।। ५४ ।।

।। इति श्रीशिवरहस्ये नवमांशे सुन्दराय शिवस्थाननिदेशो नाम
एकोनविंशोऽध्यायः ।।

।। विंशोऽध्यायः ।।

जैगीषव्यः (उवाच)

स गणः सुन्दरः शम्भोः कथं क्षोण्यामवातरत् ।
सा वै कथं कमलिनी सञ्जाता भुवि कस्य वा ।। १ ।।

कुले विवृद्धिमगमदुद्वाहो वा कथं तयोः ।
तद्वदैवानुपूर्व्येण गणेन्द्रचरितं महत् ।। २ ।।

स्कन्दानन्दितमन्दार त्वं सङ्क्रन्दनवन्दित।
सहैभिर्मुनिभिर्देवैर्गणैरुत्कण्ठितं मनः ।। ३ ।।

वैकुण्ठपूज्यपादाब्जश्रीकण्ठचरितं सदा ।
श्रोतुमुत्कण्ठितं चेतो भक्तस्य चरितं सदा ।। ४ ।।

सूतः (उवाच) -

तच्छ्रुत्वा तं मुनिं प्राह क्रौञ्चारिश्चरितं महत् ।
श्रृणुष्वेति तमाहूय ध्यायन् शिवपदाम्बुजम् ।। ५ ।।

उवाच चरितं तस्य सुन्दरस्य गणाग्रणेः ।

स्कन्द उवाच

श्रृणुष्व जैगीषव्याद्य कलावपि तपोबलैः ।। ६ ।।

भवन्ति शिवपादाब्ज ध्याननिर्धूतकांहसः* ।
स सुन्दरः शिवादेशात् कमलिन्या भुवं गतः ।। ७ ।।

---

* निर्दलितांहसः ।

कस्य चिच्छिवभक्तस्य शिवक्षेत्रनिवासिनः ।
जम्बूद्वीपे सह्यजायास्तीरे जन्माप सत्तमः ।। ८ ।।

विप्रस्य देवदेवस्य प्रसादाद्भक्तितत्परः ।
कुमारजन्मानन्देन निधिं प्राप्येव निर्धनः ।। ९ ।।

स वार्धिरिव चन्द्रेण वृद्धिं प्राप सुभूसुरः ।
विप्रेषु शिवभक्तेषु ददौ गां स धनादिकम् ।। १० ।।

कुमारो मारसङ्काशः पूषवत् स पुपोष ह ।
तं दृष्ट्वा तत्पिता माता मोदाब्धि(ब्धि)विवशान्तरौ ।। ११

अन्वभूतां च तद्बाल्यं तत्क्रीडां नेत्रमङ्गलाम् ।
स काले चोपनीतश्च वेदाञ्जग्राह वै क्रमात् ।। १२ ।।

मातङ्गराजगमनं यौवनोल्लासिताङ्गकम् ।
दृष्ट्वा कुमारं विप्रेन्द्रो विवाहाय मतिं व्यधात् ।। १३ ।।

कन्यां विप्रकुलोद्भूतां दृष्ट्वा रूपवयोचिताम् ।
बान्धवैस्तद्गृहे गत्वा सम्भारैर्भूषणादिभिः ।। १४ ।।

ज्योतिर्विदा समादिष्टे मुहूर्ते कर्तृमुद्यतः ।
विवाहं तस्य विधिवद्बान्धवैस्तत्पिता मुदा ।। १५ ।।

एतस्मिन्नन्तरे तत्र वृद्धविप्राकृतिः शिवः ।
पत्रं तत्र समादाय प्रादर्शयदहो तदा ।। १६ ।।

तत्पित्रोश्चैव बन्धूनां दास्यार्थं सुन्दरस्य हि ।
श्रृणुध्वं बान्धवा येऽस्य सुन्दरोऽयं द्विजात्मजः ।। १७ ।।

मया परिगृहीतश्च पत्रं सन्दृश्यतामिदम् ।
तद्विप्रवचसा तस्य बान्धवाः पितरौ च तौ ।। १८ ।।

दृष्ट्वा तत्पत्रमतुलं तद्दास्यपरवाचकम् ।
ह्रिया नताननाः सर्वे पितरौ ते च बान्धवाः ।। १९ ।।

विप्रमेनं सुन्दराद्य अनुगच्छस्व सर्वदा ।
शरण्यः शरणीयस्ते पत्रसन्दर्शनेन हि ।। २० ।।

इत्थं तद्बान्धववचो [1]बभूषन् तेन सो ययौ[2] ।
तं सुन्दरं गृहीत्वैव जगाम स्वेप्सितां दिशम् ।। २१ ।।

ते बान्धवास्तत्पितरौ दुःखव्याकुलमानसाः ।
ययुस्ते स्वाश्रमाण्येव मानयन्तो गतिं विधेः ।। २२ ।।

तत्र वृद्धेन विप्रेण ययौ कञ्चिच्छिवालयम् ।
तिरोऽभवत्स वृद्धोऽपि तस्मिंल्लिङ्गे मनोहरे ।। २३ ।।

सुन्दरो विस्मयाविष्टस्तुष्टाव शशिशेखरम् ।। २४ ।।

सुन्दरः (उवाच)

व्योम त्वं व्योमकेश श्रुतिशिरवचसां सीमभूमा त्वमेव
धामा सोमादि वामस्तव वरमहिमा सामसीमास्तुतस्त्वम् ।
संसारोद्दामपाप्म प्रशिथिलतनुभिः सेवनीयस्त्वमीशो
मामेवं दास्यभावे नियतिपरवशं भक्तिभावे कुरुष्व ।। २५

इति सुन्दरवाक्येन देवस्तदर्शनं गतः ।
आरुह्य वृषभं देवः सह देव्याद्रिकन्यया ।। २६ ।।

---

1. मानयन् 2. ऽगमत् ।

जटागङ्गातरङ्गात्तचलदिन्दुकलाधरः ।
खेलद्भिर्भुजगद्वन्द्वैराबद्धमकुटीतटः ।। २७ ।।

पतङ्गानलसोमोद्यत्पारावारीणलोचनः ।
गौरीमणिमयादर्शकपोलतललम्बिना ।। २८ ।।

मण्डितं कुण्डलेशानकुण्डलेन फणी(णा)भृता ।
दन्तमुक्तानिबन्धोष्ठप्रवालमणिपेटकम् ।। २९ ।।

स्मितश्रीपुञ्जकिञ्जल्कमञ्जुलाननपङ्कजम् ।
कण्ठशङ्खनिधिस्फूर्जन्मुदितोर्जितवैभवम् ।। ३० ।।

मृगटङ्कवराभीतिवृतहस्तचतुष्टयम् ।
वृषधाटिचलद्धारारुद्राक्षस्थानवैभवम् ।। ३१ ।।

ककुदास्फालनोदञ्चत्फणिकङ्कणशिञ्जितम् ।
सहारूढाद्रिजाश्लेषोदञ्चद्रोमाञ्चकञ्चुकम् ।। ३२ ।।

उत्तरीयायितोद्दण्डवेतण्डाजिनमण्डितम् ।
कटिसूत्रस्थितव्यालनद्धव्याघ्राजिनाम्बरम् ।। ३३ ।।

सुमेरुवरकोदण्डचण्डबाहुविराजितम् ।
हरिसोमानलोत्तेजिशरशोभिकरं हरम् ।। ३४ ।।

आखण्डलादिकोटीर कोटीमणिमरीचिभिः ।
आम्रेडितप्रभापूरस्फूर्जन्नीरजपादुकम् ।। ३५ ।।

सोमधामसमानोद्यत्कोटिकन्दर्पसन्निभम् ।
घृतकाठिन्यवन्मूर्तं सच्चिदानन्दसम्पदम् ।। ३६ ।।

आकारं वीक्ष्यचाक्षिभ्यां प्राणंसीत्सुन्दरस्तदा ।
ननर्ति देवं वीक्ष्यैवमस्तावीदीदृशं शिवम् ।। ३७ ।।

सुन्दरः स तदा चिन्तासंसारे तामरीरमत् ।
व्यरीरचत्स्तुतिं शम्भोस्तस्य भक्तिमपूपुषत् ।। ३८ ।।

सुन्दर उवाच

भूम्ने दाम्नेव बद्धा इव मणिगणवल्लोकजालं त्वयीदं
सीम्ने साम्ना स्तुतं त्वां भजति मवहरं भूतये स्वस्तये च ।
वाहाम्नायसटाभिरेव ते (?) पदयुगं पश्येच्च कश्चिद्धदा
तं त्वादृक्षसुवृक्षमक्षरहितं वीक्षेत कः प्रेक्षकम् ।। ३९ ।।

अतिचलकमला विलासजालै-
र्महिलाभिश्च रमन्ति मूढबालाः ।
जर[1]बालेय इवाति भारखिन्नाः
भवतान्ताः कुसुमेषुबाणनुन्नाः ।। ४० ।।

स्कन्दः (उवाच)

स देवः स्तुतिमाकर्ण्य अपर्णापतिरीश्वरः ।
तदा कन्दलितानन्दमवादीत्सुन्दरं हरः ।। ४१ ।।

---

1. an old ass.

माध्वीरीतिपरिपाकचमत्कारजिता गिरा ।

हर उवाच

यदवादि मया सौम्य तदिदानीमनुष्ठितम् ।। ४२ ।।
यदनाथि भवान् दास्यं पत्रेण पठता सतः (?) ।

तदद्य किं विवाहेन प्राज्यराज्येन किं तव ।। ४३ ।।

स्मर स्मरहरं नामस्तोत्रं त्वं सुन्दराधुना ।
सा चापि ते कमलिनी कमलालयमध्यगा ।। ४४ ।।

कमलेवाविरासीत्सा कमलं सरसीष्विव ।
तत्रागच्छ विवाहं ते कारयाम्यहमेव हि ।। ४५ ।।

इति शम्भुवचः श्रुत्वा हर्षयुक्तः स सुन्दरः ।
मन्नामपदमाबध्य स्तुहीत्यादिक्षदीश्वरः ।। ४६ ।।

इत्यादिष्टस्तदा तेन श्रीकण्ठेन दयालुना ।
व्यरीरचदनेकानि गानान्येव स सुन्दरः ।। ४७ ।।

वेदान्तागमतात्वार्थ नामधारारसैः शुभैः ।
कुर्वाणे सुन्दरे शम्भोः श्रवणामृतपारणाम् ।। ४८ ।।

पपात चामरैः सृष्टा वृष्टिः पुष्पमयी दिवः ।
पुनस्तमाह देवेशो सुन्दरं विनयानतम् ।। ४९ ।।

महादेव उवाच-

द्विजगोवधदारुणाशयेन (यो हि) योऽन्धो-
ऽप्यबुधो वा विबुधाधिपं महेशम् ।
*सकृदारग्वधपुष्पतोऽर्च्य लिङ्गे
मधुना सिच्य स धुनोति पापजालम् ।। ५० ।।

कम्राम्रताम्रनवपल्लवनम्रशाखा-
संलग्नमौलिमनलार्कशशित्रिणेत्रम् ।
साम्राणिधूपमग्जे प्रसमीक्ष्य दत्वा
साम्राज्यमेव लभते कलिजोऽपि मर्त्यः ।। ५१ ।।

अपापान्यो दारांस्त्यजति च कुमारानपि नर-
स्तथाऽगारे वह्निं क्षिपति सुजनानाक्षिपति च ।
स पापानां नाशं कलयति यदि स्वैरमगजे
चिरं वृद्धाद्रीशं भजतु भवनाशाय सुलभम् ।। ५२ ।।

तरुणेन्दुकलाकलापमीशं
शरणं ये प्रतिसादितारुणाचलेशम् ।
भवदावोत्तमवारुणालयं ते
परिमृशन्ति च गोष्पदप्रमाणम् ।। ५३ ।।

हालास्य लास्य सुमुखं मम पादपद्मं
आलस्यजातमहाय यदेक्षितं स्यात् ।
कालास्यमेव न हि पश्यति कालकाल-
मावश्यकं खलु नरेषु सदेदमेव ।। ५४ ।।

---

* आरग्वध - கொன்றை மலர்

[1]यत्पुण्डरीकाक्षसुपूजिताङ्घ्रि
[2]हृत्पुण्डरीके सकलेषु संस्थम् ।
मां [3]पुण्डरीकाजिनवासमीक्ष्य
तत्पुण्डरीकं पुरमाव्रज त्वम् ।। ५५ ।।

कमलालयमेहि सुन्दर त्वं
समलानां न हि तत्र वास इष्टः ।

स्कन्द उवाच -

इत्थं तं सुन्दरेशं प्रणतिपरमिवथोपदिश्याष्टमूर्ति-
र्दिव्यं धाम स्वकीयं गणगणसहितो वै तिरोधत्त देव्या ।
पौरैरीरितवैभवोऽपि स तदा श्रीसुन्दरोऽनल्पधी-
धर्मान्येव जगाम शम्भुकृपया संसेवितुं भक्तितः ।।

।। इति श्रीशिवरहस्ये नवमांशे सुन्दरचरितं नाम विंशोऽध्यायः ।।

---

1. திருமால் 2. தாமரையில் 3. புலித்தோல் அணிந்த

।। एकविंशोऽध्यायः ।।

मुनिरुवाच

कानि धामानि देवस्य स जगामाम्बिकापतेः ।
स सुन्दरो गणश्रेष्ठस्तन्मे वद सुविस्तरम् ।। १ ।।

गणेशानुज सर्वज्ञ कमलिन्या महोत्सवः ।
उद्वाहो वा कथमभूद् वृषवाहप्रसादतः ।। २ ।।

सुन्दरस्य महादेवप्रसादेन विनोदकृत् ।
इति तद्वचनं श्रुत्वा उवाच क्रौञ्चसूदनः ।। ३ ।।

जैगीषव्यं समालोक्य मुनीन्द्रान्गणपान्सुरान् ।

स्कन्द उवाच -

श्रृणु त्वं सुन्दरस्यास्य कथाविस्तरमादरात् ।। ४ ।।

पुरारिणा समादिष्टः सुन्दरः शशिशेखरम् ।
नन्तुं ययौ मुदा विप्र भक्तिनिर्भरमानसः ।। ५ ।।

श्रीमद्दक्षिणकैलासं विलासस्थानमैश्वरम् ।
यत्र हस्ती पुरा शम्भुं शुण्डादण्डार्जितैः शुभैः ।। ६ ।।

बिल्वपत्रैः समभ्यर्च्य पुष्करासारसेचनैः ।
दन्तिजन्म विसृज्यैव दन्तित्वक्कटिचेलकः ।। ७ ।।

त्रिणेत्रो नीलकण्ठश्च बभूव गणपोत्तमः ।
तां कालहस्तिनगरीं प्राप सुन्दरशेखरः ।। ८ ।।

कालोऽपि फणिराड्यत्र स्वामौलिमणिभिः पुरा ।
समभ्यर्च्याम्बिकानाथं बभूव फणिभूषणः ।। ९ ।।

ऊर्णनाभिः पुरा कृत्वा मुखतन्तुवितानकम् ।
प्रेपेदे परमं स्थानं कैलासं देवदुर्लभम् ।। १० ।।

स तत्र गत्वा संस्नाय सुवर्णमुखरीजले ।
स्नात्वा भस्माङ्गविभवो भूतिदिव्यत्रिपुण्ड्रकः ।। ११ ।।

रुद्राक्षमालाभरणः शिवालयमथागमत् ।
नत्वा तुष्टाव देवेशं कालहस्तीश्वरं शिवम् ।। १२ ।।

पश्यन् सानन्दरोमाञ्चकञ्चुकालङ्कृताङ्गकः ।। १३ ।।

सुन्दर उवाच -

हे कामनाशन हिरण्मयदर्शनाङ्ग
हे व्योमकेश गरलाशन कालकाल ।
हे शाश्वताव्यय विभो [1]मुदिराभकण्ठ
त्वत्सत्प्रभा मम हृदि प्रसरत्ववश्यम् ।। १४ ।।

एवं स्तुवन्स नियतं मासमात्रमनन्यधीः ।
तस्मात्स्थानादपक्रम्य काञ्चीमभ्यागतो गणः ।। १५ ।।

कम्पां पापाद्रि[2]शंपातामालुलोके गणेश्वरः ।
तस्यां स्नात्वा भस्मदिग्धो दिव्यफालत्रिपुण्ड्रकः ।। १६ ।।

कामाक्षी तपसा कम्पातटे देवमतोषयत् ।
यत्र विष्णुस्तपोऽद्यापि तपते हरदर्शनम्[3] ।। १७ ।।

---

1. मुदिर - cloud. 2. शंपात -The Thounderholt of Indra. 3. द्रष्टुमीश्वरम् ।

कम्पितानि भवन्त्येव पापानि सकलान्यपि ।
कम्पास्नानेनचैकेन नाविनाश्यं[1] त्वघं कुतः ।। १८ ।।

पूतच्यूतोत्तमालोल पल्लवालम्बिभूतले ।
मूले रसालवृक्षस्य शूलहस्तं निरीक्ष्य सः ।। १९ ।।

साष्टाङ्गलग्नभूपृष्ठस्तुष्टावाष्टाकृतिं हरम् ।। २० ।।

सुन्दरः (उवाच)

शम्भो रसालवरमूलग कालकाल
हालाहलोत्तमगलामल हस्तशूल ।
फालानलज्वलितकामसुदेहतूल
व्यालोरुमाल परिपाहि जगत्सुमूल ।। २१ ।।

कामाक्षीमपि तुष्टाव सुन्दरो नन्दमेदुरः ।
साष्टाङ्गं प्रणतो भूमौ मौलिबद्धाञ्जलिस्तदा ।। २२ ।।

सुन्दर उवाच

देवि त्वं गिरिराजसागर कुलोत्तुङ्गोद चन्द्रोज्ज्वले[2]
नीलेन्दीवरलोचनोरुयुगले नीलालकालङ्कृते ।
पूर्णेन्दुद्युतिकान्तिराजितमुखे बिम्बाधरे कुन्दज-
भ्राजत्कोरकदन्तपङ्क्तिमधुरे कामाक्षि तुभ्यं नमः ।। २३ ।।

त्वं मत्तेभमराळराजगमने मत्तेभकुम्भाभजि-
त्कान्तोत्तुङ्गकुचद्वयीपरियुते व्यालाभवेणीस्फुर-

---

1. अविनाश्यमघं कुतोऽपि न ।।
2. देवि त्वं गिरिराजराजसुकुलोत्तुङ्गाब्धिचन्द्रोज्ज्वले

द्रत्नभ्राजितपद्मपुष्प विलसन्नासालसन्मौक्तिके
मञ्जीरद्वयपादपद्मजरणत्पद्माभपादद्वये ।। २४ ।।

काञ्चीकाञ्चितसत्कटीतटयुते हस्तोल्लसत्कङ्कणे ।
कौसुम्भद्युति चञ्चलाङ्गलतिके कामाक्षि तुभ्यं नमः ।। २५

एवं संस्तुत्य हृष्टात्मा निर्जगामारुणाचलम् ।
शिवतीर्थे ततः स्नात्वा भस्मरुद्राक्षभूषणः ।। २६ ।।

नत्वा शोणाचलाधीशं तरुणेन्दुशिखामणिम् ।
अरुणाधिपनेत्रं तं शरणं स ययौ गणः ।। २७ ।।

अस्तावीत्स तदा देवं देव्या[1] मौलिकृताञ्जलिः ।। २८ ।।

सुन्दर उवाच

भगणाधिपचूडमौलि शम्भो
उगण त्वां गणवृन्दवन्दिताङ्घ्रिम् ।
अरुणाद्र्यधिपाधुना पदं ते
शरणं यामि शरण्यमिन्दुमौले ।। २९ ।।

वरुणालयपारणानतं ते
पदपद्मं मरणेऽपि ये स्मरन्ति[2] ।
तरुणं च भवेद्भवाम्बुधेः
करुणाशालि कटाक्षवीक्षणं ते ।। ३० ।।

इत्युक्त्वा निर्जगामाशु निर्जरैः सेवितं पुरम् ।
वृद्धाचलं तदा पुण्यं सुन्दरः शिवमन्दिरम् ।। ३१ ।।

---

1. सहितं देवं ।
2. दर्शनादभ्रसदसि जननात्कमलालयेकाश्यां तु मरणान्मुक्तिः स्मरणादरुणेशितुः इति अभियुक्तवचनमत्रानुसन्धेयम् ।

स्नात्वा स मणिमुक्तायामणिमाद्यष्टसिद्धिदे[1] ।
भस्मरुद्राक्षधृग्योगी चिराद्रीशं प्रणम्य च ।। ३२

साष्टाङ्गं चापि तुष्टाव भक्तिनिर्भरमानसः ।

सुन्दरः (उवाच) -

विद्युत्पिङ्गजटोत्तमाङ्ग सुमहामातङ्गचर्माम्बर
गङ्गातुङ्गतरङ्गसङ्गम महालिङ्गाङ्गसंस्थ प्रभो ।
उक्षाङ्गस्थित कामिनीविलसितस्वार्धाङ्ग कौरङ्गस[2]-
ल्लक्ष्मालङ्कृतमौलिवीक्षणभवत्पातङ्गनङ्गागते (?)
पादाब्ज दृगपाङ्गतोऽद्यकलये मोक्षश्रिया सङ्गतम् ।। ३४ ।।

इति संस्तुत्य तं देवं तस्मात्स्थानादपापाक्रमत् ।
गोपर्वतं ततः पुण्यं प्राप्य तुष्टाव शङ्करम् ।। ३५ ।।

भस्मरुद्राक्षपूताङ्गो गोपर्वत निवासिनम् ।। ३६ ।।

सुन्दरः (उवाच)

त्वमङ्घ्रिपाणां पतिरिन्दुमौले
गिरीश इत्येव श्रुतेर्गिरेडितः ।
क्व ते स्तुतिर्वाङ्मनसामगोचरा
न मेऽनुभाव्या पदवीमथाणु ? ।। ३७ ।।

---

1. मणिमुक्ताजले स्नात्वा ह्यणिमाद्यष्टसिद्धिदे

2. कौरङ्गसल्लक्ष्मालक्ष्मालङ्कृतचूड वीक्षणकृतपातङ्गभावस्मर पादपञ्चकयुतं पद्यम् ।।

इति तत्रापि संस्तुत्य देववदेवं प्रणम्य च ।
पुण्डरीकपुरं प्राप हृदयं वै तदा भवः* ।। ३८ ।।

प्रहृष्टहृत्पुण्डरीकः पुण्डरीकाक्षपूजितम् ।
अभ्रंलिहैर्गोपुरैश्च श्रीमदभ्रसभां तदा ।। ३९ ।।

स्नात्वा स शिवगङ्गायां भस्मरुद्राक्षधारणः ।। ४० ।।

प्राणंसीदवतंसितेन्दुमनलालङ्कारफालक्षधृ-
गधस्तोत्तेजितवाङ्घुमध्वनिभृतासङ्गामरेणाम्बिकाम् ?
पश्यन्हेमसभाविभासिचरणाम्भोजं हि रक्षोगणा-
ध्यक्षाक्ष्य्यगतिप्रदानकुशलं विन्यस्य नृत्तं सदा ।। ४१

कुर्वन्तं चललोललम्बितजटासाम्राज्य वित्रांसित-
नक्षत्रोडुप तत्सुवर्षणझणत्कारोरुसत्कङ्कणम् ।
सव्यासव्यकरद्वयारुणलताभ्राजत्सुभीतिं हर-
ल्लोकानामभयप्रदानकुशलं चान्येन चालम्बिना ।। ४२

पादेनोरु निकुञ्चितेन मधुना संसिञ्चता सिञ्जिता
लोलालम्बितपादकङ्कणफणीफूत्कारलोलस्रजा ।
ब्राह्मोत्तुङ्गकरङ्कषण्डसुमहारत्नोरुमालांशुक-
भ्राजद्वक्त्रसमुल्लसद्द्युतिभृता पर्वेन्दुपूर्णश्रिया ।। ४३ ।।

सोमानलार्कसुकटाक्षरसावलोकै-
रालोक्य लोकमखिलं शरदिन्दुकुन्दम् ।
कान्तायिताङ्ग सुभुजाङ्गमहोरुहारं
मातङ्ककृत्तिवसनं हृदयान्तरङ्गे ।। ४४ ।।

---

* कृत्तिवाससः

तत्पार्श्वगामचलराजसुतां नतां त-
त्पादाम्बुजान्तरदृगञ्चलकां ददर्श ।
उत्फुल्लपद्मवदनोत्थितनीलनीर-
जातेक्षणाञ्चितकपोलतलायताक्षीम् ।। ४५ ।।

कर्णान्तरोद्यतसुरत्नज कान्तिकान्त-
ताटङ्कयुग्मविनिवार्यरवीन्दुबिम्बाम् ।
बिम्बाधरां चिकुरवेणिगरत्नपद्मां
[1]शुक्रोयमोरुनसलम्बितमौक्तिकां ताम् ।। ४६ ।।

ग्रैवेयकावलिभवोत्तमकम्बुकण्टीं
श्रीनीलकण्ठहृदयाम्बुज केलिभृङ्गीम् ।
पाणिप्रभाविजिततामरसोरुनाल-
बाहुद्वयीविधृतकङ्कणनिःस्वनां ताम् ।। ४७ ।।

हीरात्तफालफलकान्तलसत्सुरेखां
सिन्दूरबिन्दुवदनां रदशोभिकुन्दाम् ।
कौसुम्भचेलगकृताञ्चलकान्तशात-
कुम्भोत्तरीयविनिबद्धमदेभकुम्भाम् ।। ४८ ।।

[2]तद्भ्राजिसल्लिकुचवर्णकुचानताङ्ग-
बद्धप्रभात्रिवलितोदरमध्यभागाम् ।
रत्नोरुहेमखचितोत्तमचाकचक्य-
काञ्चीकचत्कटितटाञ्चितमौक्तिकां ताम् ।। ४९ ।।

---

1. शुक्राधिकोरु । नस = नासा   2. सत् + लिकुच

रम्भानिभोरुकमठीनिभपृष्ठलग्न
लाक्षारुणाङ्घ्रियुगलां मणिनूपुरां ताम् ।
मत्वा हृदम्बुरुहमोदविकासितार्कां
तुष्टाव सुन्दरगिरा स च सुन्दरोऽपि ।। ५० ।।

सुन्दरः (उवाच) -

शम्भो बालेन्दुचूडद्युतिविजितदिशास्तोमसीमानुरागं
फुल्लोल्लेखमुखान्तभागकुमुदां स्तोमाविभूमानि ते ।
सामस्तोमगुणभिरामनितरां श्रीवामदेव प्रभो
कामाङ्गोत्थितभस्म रञ्जिततनो मां पाहि साम्ब प्रभो ।।

कालव्यालमुखानलोद्धत महाज्वालादिदग्धं जगत्
त्वत्सोमाञ्चितलोचनेन नितरां पुष्येत तुष्येत च ।
पुष्यत्त्वत्पदपद्मसंयुतमहामञ्जीर शिञ्जद्ध्वनो
दूरीकर्तुमलं महाधजनितं सन्तापवृन्दं हर ।। ५२ ।।

मन्दारवृन्दमकुटीतटपादपद्म-
निर्यन्मरन्दरसलग्नमधुव्रतोऽयम् ।
नान्यं हृदेच्छति सुरान्तरसंविलग्नं
भुग्नं सदा भजति ते पदपद्मलग्नः ।। ५३ ।।

संसार सर्पो(घोरो)द्धतसर्पदष्टा
दुष्टा अपि प्रमथनाथ तवेह भावात् ।
शिष्टास्त एव जगति शिपिविष्टनिष्ठा-
निष्ठास्तु ते तनुभृतां स्वत एव धृ(हृ)ष्टाः ।। ५४ ।।

कोवा पूजयिता भवेत्कुसुमतो यन्मौलिमूलं हरिः
ब्रह्मा वाप्यनुमीतवांस्तव विभो कस्ते सदृक्षो गुणः ।
कामं मे शिवकामसुन्दरि भृशं सम्पूरयेताम्बिके
मद्भावं विनिवेदयाशु गिरिजे श्रीव्योमकेशाय तु ।। ५५

त्वं माता जगतां जनित्रि स पिता विश्वेश्वरो मेऽधुना
तस्मात्त्वत्पदभक्तिभावमतुलं त्वं देहि विश्वेश्वरि ।
इत्युक्त्वा प्रणनाम शम्भुपदयोः सानन्दवार्धौ सदा
मग्नः शम्भुसलीललास्य विलसल्लोकेऽनुलोकोत्तरम् ।। ५६

स्थित्वा चाभ्रसभान्तरे च स तदा वर्षं स्तुवन् शङ्करं
यातोऽसौ कमलाविलास सदनं नन्तुं महेशं गणः ।। ५७

।। इति श्रीशिवरहस्ये नवमांशे (चित्)सभादर्शनं नामैकविंशोऽध्यायः ।।

।। द्वाविंशोऽध्यायः ।।

मुनिरुवाच -

कमलालयसंज्ञास्य शिवक्षेत्रस्य शाङ्करे ।
कथमासीद्वदस्वाद्य समुत्कण्ठति मे मनः ।। १ ।।

नीलकण्ठचरित्रेषु केकीव घनगर्जनात् ।
इति तद्वचनं श्रुत्वा स्कन्दः सूदिततारकः ।। २ ।।

उवाच मोचामधुरवाचा चन्दनशीतया ।

स्कन्द उवाच-

जैगीषव्य श्रृणुष्वाथ कमलालयविस्तरम् ।। ३ ।।

पुरा कमलया तत्र तपस्तप्तं शिवाश्रये ।
बहुवर्षगणं तात वल्मीकेशार्चनेन सा ।। ४ ।।

निनाय वत्सरांस्तस्मिन् सूच्यग्रे संस्थिता सती ।

मुनिरुवाच -

कस्मात्कमलया तप्तं कामात्तन्मे वदाधुना ।। ५ ।।

कमलायाः प्रसादेन सर्वोऽपि विमलो भवेत् ।
तादृश्यपि कथं स्थाने तपस्तप्तवती पुरा ।। ६ ।।

स्कन्द उवाच-

अपुत्रस्तप्यमानो वै हरिर्वार्धौ पुरा स्थितः ।
नागपर्यङ्कशयने शिश्ये कमलया सह ।। ७ ।।

ध्यायन्नास्ते महादेवं साम्बं चन्द्रकलाधरम् ।
मृगटङ्कधरं सौम्यं लोचनत्रयभूषितम् ।। ८ ।।

नीलकण्ठं विरूपाक्षं रत्नसिंह्मासनस्थितम् ।
फुल्लकल्हारमालाङ्कं दिव्यपीताम्बरावृतम् ।। ९ ।।

अनल्परत्नाकल्पेन शोभमानं महत्तरम् ।
स्वहृदुत्फुल्लपद्मस्थमेवंध्यायन्त्स शङ्करम् ।। १० ।।

बहुवर्षगणं विप्र स्वपन्नेव हरिस्तदा ।
मानसैरुपचारैश्च पूजयन्त्साम्बमीश्वरम् ।। ११ ।।

तुष्टाव वाग्भिर्हृष्टाभिः शिपिविष्टं महेश्वरम् ।। १२ ।।

विष्णुरुवाच -

सोमास्कन्द विभो त्वदीयविमलं रूपं सुधांशुस्फुर-
ज्जूटाहिस्फुटमौलिकाञ्चितमणिस्फाराङ्गरागोद्धतम् ।
त्र्यक्षं सौम्यसुधांशुकान्तिविलसत्तिर्यक्त्रिपुण्ड्राङ्कितं
वीक्षेऽक्षादिविदूरगं तव विभो वक्त्रं कटाक्षोदयम् ।। १३

त्वत्पादाब्जमरन्दसुन्दरमहावीचीस्फुरन्मौलयो
बृन्दारद्युतिवृन्दवन्दितमहानन्दाम्बुधारास्पदम् ।
ध्यायं ध्यायमुपास्महे तव महापापौघभित्केवलं
युक्त्या किं मम साम्प्रतं तव विभो भक्तिं हि याचे सदा ।।

इति विष्णुवचः श्रुत्वा सोमास्कन्दो महेश्वरः ।
विष्णुमाह तदा देव वृणु कामं तवेप्सितम् ।। १५ ।।

श्रुत्वा शम्भोश्च वचनं तदा विष्णुः सुहृष्टधीः ।
ययाचे देवमीशानं भक्तिं तत्पदपङ्कजे ।। १६ ।।

जेतारं सर्वलोकेषु पुत्रमेकमयाचत ।
सुन्दरं सुन्दराणां च कुसुमेषुं हरिस्तदा ।। १७ ।।

विष्णुहृत्काममतुलं पूरयामास शङ्करः ।
प्रहृष्टस्त्र्यक्षमैक्षिष्ट दक्षशिक्षं सुरारिहा ।। १८ ।।

तदन्तरे महादेवी कोपसंरक्तलोचना ।
विष्णुं जिष्णुं तदा वीक्ष्य तीर्यगैक्षत स(सा)क्रुधं(धा) ।। १९

देव्युवाच

मामनादृत्य देवेशं हरेऽस्तौश्च दर्पतः ।
तस्मात्ते शिवदत्तोऽपि सुतो नाशमुपैष्यति ।। २० ।।

शिवकालानलज्वाला कीलतूलायितो हरे ।
देवी(व्या) वाग्वज्रमुत्सृष्टं श्रुत्वा चिन्ताकुलो हरिः ।। २१

प्रणम्याह स साष्टाङ्गं गिरिजामश्रुलोचनः ।

हरिरुवाच -

कथं शापास्त्रपात्रं मां कृतवत्यसि शैलजे ।। २२

क्षन्तव्योऽयं ममागो हि अगकन्ये सुदारुणः ।
इति विष्णुवचः श्रुत्वा शङ्करस्तामभाषत ।। २३ ।।

ईश्वर उवाच-

हरिः कन्दर्प जनने दर्पान्नैवास्तवीच्च माम् ।
ममार्धाङ्गगतां त्वां च मन्यमानस्तवैक्यताम् ।। २४ ।।

नास्य मन्तुश्च मन्तव्यः तन्तुभूते सुतेऽस्य वै ।
मत्फालानलदग्धोऽपि कालेन महता तव ।। २५ ।।

त्वत्कटाक्षाङ्कुरोद्भूतः पुनरुज्जीवतात् स्मरः ।
इत्युक्त्वा विष्णुहृदये उवास स तदा हरः ।। २६ ।।

ततः कालेनमहता सुषाव कमला स्मरम् ।
मदनं सर्वदमनं सुरसाहाय्यकारिणम् ।। २७ ।।

कुसुमेषुं समुत्पन्नं दृष्ट्वा विष्णुः प्रहृष्टधीः ।
अतिष्टदुत्सुकः पुत्रं वीक्ष्य त्र्यक्षप्रसादजम् ।। २८ ।।

ततः कालेन महता सुरकार्यार्थमुद्यतः ।
शिवफालानलज्वालावलीढो मदनस्तदा ।। २९ ।।

शम्भुना दमिते तत्र मदने सर्वभेदने ।
चिन्ताकुला सा वैकुण्ठान्नीलकण्ठं समाश्रयत् ।। ३० ।।

कमला विष्णुना सार्धं क्रोधाद्वचनमब्रवीत् ।

कमलोवाचः -

तवैवानयतो विष्णो मदनोऽनङ्गतां गतः ।। ३१ ।।

नाहं वसामि वैकुण्ठे पुत्रक्लेशाग्निदीपिता ।
दुःखोपमर्दकं स्थानं सङ्गच्छामि कपर्दिनः ।। ३२ ।।

इत्युक्त्वा साऽथ कमला कमलालयमेत्य च ।
विमलं सा तपस्तेपे शूलहस्तार्चनेन च ।। ३३ ।।

वल्मीकेशं समाराध्य देवमेवमतोषयत् ।। ३४ ।।

कमलोवाच-

श्रीबिल्मिने कवचिने वरसोमधाम
सामिप्रकामशिरसे मम दुःखहन्त्रे ।
पात्रे समस्तसुरतावनदीक्षिताय
वल्मीकमध्यविलयाय नमःशिवाय ।। ३५

गौरीविलासमुखपङ्कज[1]सानुनेत्र-
प्रोद्यत्प्रभाधवलिताय महेश्वराय ।
प्रोद्यत्सुधांशुचयवार्धितरङ्ग रिङ्ख-
द्गङ्गातरङ्गकलितेन्दुजटालकाय ।। ३६ ।।

उद्दण्डचण्डकरधारितमेरुमध्य-
कोदण्डकाय सततं हरशङ्कराय ।
इति तत्कमलास्तुत्या वल्मीकेशः प्रहृष्टधीः
मा भैरिति श्रियं चोक्त्वा कालात्ते स्यात्सुतोदयः ।। ३७

देव्याः प्रसादादचिरात् पुत्रः सञ्जीवतां(त्) श्रिये ।
इति शम्भोर्वचः श्रुत्वा हर्षोन्मीलि(त्फुल्ल)हृदन्तरा ।। ३८

स्मरप्रादुर्भवात्तत्र पद्मादेव्याः कटाक्षतः ।
उवास तत्र नियतं चिन्तयन्ती स्मरोद्भवम् ।। ३९ ।।

चिन्तयन्ती महादेवं मदनान्तकरं शिवम् ।
तदा प्रभृति तत्क्षेत्रं कमलालयसंज्ञितम् ।। ४० ।।

प्रथितं सर्वलोकेषु मन्मथान्तकरस्य च ।
त्यक्त्वा विष्णुश्च वैकुण्ठं तदा श्रीविरहातुरः ।। ४१ ।।

---

1. सानु - Sun

श्रीवाञ्छस्थानमगमच्छ्रियं वाञ्छंस्तदा हरिः ।
भस्मरुद्राक्षधृङ्नित्यं त्रिपुण्ड्रोज्ज्वलफालकः ।। ४२ ।।

तपस्तेपे निराहारः शतवर्शाण्यनन्यधीः ।
तपो घोरतरं तेपे मुनीनां विस्मयावहम् ।। ४३ ।।

त्रिकालमर्चयन् शम्भुं बिल्वपत्रैश्च कोमलैः ।
पञ्चामृतैः पञ्चगव्यैर्गन्धचन्दनवारिभिः ।। ४४ ।।

धूपदीपैश्च नैवेद्यैरुपचारैरनेकशः ।
स्तुवन्नेवं महादेवं चिन्तयन्नब्धिकन्यकाम् ।। ४५ ।।

विरहात्स श्रियो देव्याः कार्श्यं चाहरहर्ययौ ।
वाञ्छितार्थप्रदं देवं श्रीवाञ्छेशं विचिन्तयन् ।। ४६ ।।

विष्णुरुवाच -

वाञ्छी(ञ्छे)श तुच्छफलदेषु न मे स्पृहा स्यात्
पुच्छं त्वमेव श्रुतिमौलिगिरां सदैव ।
इच्छा भवेत्तव पदे मम भक्तिभाव-
स्त्वच्छासनं कलयतो मम किं हि भोगैः ।। ४७ ।।

इत्युक्तं हरिवचनं निशम्य शम्भु-
स्तस्मै तामचिरादर्शयदाऽचिरेण । (तामचिददर्शयच्च)
[1]मूर्तिं स्वां त्रिणयनमिन्दुचूडयुक्तां
उद्यत् . . . . प्रथितोरुचारुबिम्बाम् ।।

1. मूर्तिं स्वां त्रिणयनामथेन्दुचूडां
उद्यद्भास्करप्रथितोरुचारुबिम्बाम् ।।

सम्प्रोचिवान्स्मररिपुः प्रणतं मुरारिं
देव्याः कटाक्षवशतस्तव जन्म भूयात् ।

मारस्य ते तनुभवः कमलावशा(शः) स्यात् (शात्)
निर्याहि लोकमधुना तव लोकगुप्त्यै ।
असव्यपाणिस्थितलिङ्गमैश-
मभ्यर्च्य मृद्नाति हि पापजालम् ।।
योगं यमाद्यं विरचय्य भक्त्या
मल्लोकमेवाशु वसेत्सधन्यः ।।

निरागादुरगारिकेतन
शिववाक्यामृतधारसारवर्षतर्षः ।
समवाप्य निजां प्रियां तदा
स्मरमुद्बोध्य तदाद्रिजा कटाक्षैः ।।

।। इति श्रीशिवरहस्ये नवमांशे द्वाविंशोऽध्यायः ।।

।। त्रयोविंशोऽध्यायः ।।

स्कन्द उवाच

ततः स सुन्दरः प्राप्य कमलालयमुत्तमम् ।
देवर्षिस्थापितोत्तुङ्गं लिङ्गसङ्घविराजितम् ।। १ ।।

आनन्देशादि सिद्धेशमचलेशं स सुन्दरः ।
हाटकेशं च तुष्टाव श्रीवल्मीकमहेश्वरम् ।। २ ।।

स्नात्वाऽथ देवसरसि भस्मरुद्राक्षभूषणः ।
सम्प्रणम्य महादेवं सुन्दरः शशिशेखरम् ।। ३ ।।

क्रमेण पञ्च लिङ्गानि तुष्टावाथ स सुन्दरः ।। ४ ।।

सुन्दर उवाच -

आनन्देश सुनन्दित त्रिभुवने मन्दारवृन्दानत
पादाब्जोत्थमरन्दसुन्दरमहानन्दाम्बुवीचीस्थितः ।
मच्चित्ताख्यमिळिन्द एव नितरां पातुं तवाद्यादरा-
न्निन्दन्नर्थचतुष्टयं कलयते पुण्येन्दिरायाः पुरे ।। ५ ।।

इति संस्तुत्य हृष्टात्मा सिद्ध्यष्टकगतिप्रदम् ।
सिद्धेशं सम्यगाराध्य प्रतुष्टाव स सुन्दरः ।। ६ ।।

सुन्दरः

सिद्धेश सिद्धनिगमोत्तममौलिवाचा
मोचासदृक्षवचसा त्वयि विद्धि भावम् ।
मुग्धेन्दुसिद्धसुललामनिजाक्षसोम
मामद्य पाहि भवसिसिद्धिकरो महेश ।। ७ ।।

इति संस्तुत्य सिद्धेशमचलेशं ययौ तदा।
विनयावनतो भूत्वा प्रास्तावीदिन्दुभूषणम् ।। ८ ।।

सुन्दर उवाच -

अचलाधिपराजकन्या(यका)
कुचलीलायितवक्षसा विशाल ।
निटिलानलदग्धपुष्पबाण
अचलेशान नमामि ते पदाब्जम् ।। ९ ।।

नत्वासावचलाधीशं दृष्ट्वा तं हाटकेश्वरम् ।
अभितुष्टाव हृष्टात्मा राजराजकलाधरम् ।। १० ।।

सुन्दर उवाच

अहिकटकायित पाद देव मौलिकोटी
विलसद्गाङ्गजटोरुजूट पाहि ।
नटनेन निमग्न भूतल
करटित्वक्कृतचेल हाटकेश पाहि ।। ११ ।।

एवं स्तुत्वा हाटकेशं सुन्दरः प्रययौ तदा ।
वल्मीकेशं ततो नत्वा तुष्टावभक्तिभावितः १२ ।।

सुन्दर उवाच -

चन्द्रापीडकचोरुमौलिमणिभा(सन्दीप्तजूटान्तर-
प्रोद्यद्) गाङ्गतरङ्गसम्भवलसद्रक्तोरुसद्धल्लक ।
तत्रत्योरुसमीरलोलितमहागन्धानुबन्धोद्यत-
दिग्वक्त्राणि परागितानि हि विभो पापापहन्तृणि ते ।।

त्वं शम्भुः काल्मलीकिः[1] श्रुति गदितयशा बिल्मिनीबिल्वपूज्यो
वल्मीकोरुसुमध्यसंस्थित महालिङ्गंत्वद(सम)द्राक्षिषम् ।
धन्यस्तेन सुरादिमान्यपदवीं प्राप्तां च मन्ये विभो
को वाऽन्यो हि समुद्दिधीर्षुरिह मां संसारसन्तारणे ।। १४

भव भूतपते भवोद्भवाद्य
विभवं भावुकमेव तेऽनुभवम् ।
भवसन्तरणाय संभवे
हर भर्गामल भीम भव्य पाहि ।। १५ ।।

भर्गानङ्गविलोपिलोचन विभो गङ्गावतंसोज्ज्वल-
ज्ज्वालाक्षातुल जालकीलितपुरं सङ्कीलितं ते क्षणात् ।
घूर्णन्ती त्रिदशोरुघोरपटली[3]भूर्णिः दृशा ते विभो
सम्पूर्णं पुनरेव ते हर विभोऽपर्णापते पाहि माम् ।। १६ ।।

---

1. कल्मलीक - Brightness,

2. कोऽन्यो मां समुजीर्षुरेव भगवन्संसारसन्तारणे ।

3. भूर्णिः - The earth.

इति संस्तुत्य देवेशं सोमास्कन्दं महेश्वरम् ।
रत्नसिह्मासनासीनं वल्मीकेशस्य दक्षिणे ।। १७ ।।

रत्नप्रभासुविलसत्पूर्णेन्दुविजितानननम् ।
सोमसूर्याग्निनयनं गङ्गाचन्द्रकलाधरम् ।। १८ ।।

वरदाभयहस्तं च नागपादविराजितम् ।
त्यागराजं महादेवमगजाकान्तीमीश्वरम् ।। १९ ।।

मृगटङ्कधरं सौम्यं विकटं साम्बमीश्वरम् ।
इन्द्राय विष्णुना दत्तं सोमास्कन्दं महेश्वरम् ।। २० ।।

इन्द्रेणापि पुरा दत्तो मुचुकुन्दाय भूभुजे ।
सुराश्चरक्षोसाहाय्ये तदाजौ दितिजार्दने ।। २१ ।।

तेन जैत्ररथेनैव समानीता महेश्वराः ।
सप्त तेषामादिमोऽत्र स्थापितः कमलालये ।। ३२ ।।

तं नत्वा देवदेवेशं सोमसोमार्धशेखरम् ।
फुल्लकल्हारमालाङ्गं शशाङ्कद्युतिदेहकम् ।। ३३ ।

प्राणंसीद्भक्तिपरमो ह्यथास्तावीन्महेश्वरम् ।। ३४ ।।

सुन्दर उवाच -

गङ्गातुङ्गतरङ्ग(सङ्ग)सुमहामौले कुरङ्गाङ्कधृक्
मातङ्गत्वगलङ्कृताङ्ग भुजगाभोगाङ्गसङ्ग प्रभो ।

उक्षाङ्गस्थित दिव्यभस्मलसित गङ्गातरङ्गोल्लस-
त्यागाधीशमहोऽगजामुखकृपापाङ्गं भजे शङ्करम् ।। ३५

मातङ्गानङ्गभङ्गं मुररिपुहृदयानन्दसन्दोहदं तं
कुन्देन्दुद्युतिरञ्जितं हृदि भजे त्यागाधिपं शङ्करम् ।। ३६

मद्भागधेय नगजार्धकृताङ्गसङ्ग
सारङ्गरञ्जितकरं वरलिङ्गसङ्ग ।
हे नीलकण्ठ हृदये तव पद्मपादं
उल्लासतां हि भगवन् हर त्यागराज ।। ३७ ।।

स्कन्द उवाच -

इत्थं त्यागाधिपं स्तुत्वा नगजानायकं तदा ।
सानन्दाश्रुलसद्वक्रो हृष्यद्रोमाञ्चकञ्चुकः ।। ३९ ।।

शिपिविष्टाग्रतस्तस्थौ निष्ठायुक्तेन चेतसा ।
तस्मै प्रसन्नो भगवानिन्दुचूडः स सुन्दरम् ।। ४० ।।

उवाच देवीमालोक्य प्रहृष्टश्चाभ्युवाच तम् ।
महेश्वरः (उवाच)
सुन्दरागच्छ भद्रं ते भक्त्या सुन्दर एव हि ।। ४१ ।।

मद्दास्ये त्वं नियुक्तो हि भक्तोऽसि त्वं ममाधुना ।
वस त्वं कमलावासे विमले मुक्तिदायिनि ।। ४२ ।।

देवतीर्थेऽनिशं स्नाहि भस्मरुद्राक्षभूषणः ।
वसात्र नियतं भक्त्या क्षेत्रेऽस्मिन्त्सर्वकामदे ।। ४३ ।।

पश्य मां सततं भक्त्या तेन मुक्तो भविष्यसि ।
अविमुक्तशरीरः सन्मदङ्गे लयमेष्यसि ।। ४४ ।।

या सा पूर्वं कमलिनी तरुणी मीलितेक्षणा ।
सञ्जाता सा मदादेशात् वश्यवेश्याकुलाङ्कुरा ।। ४५ ।।

तस्याः पाणिग्रहं तेऽद्य कारयाम्यधुना गण ।
कल्याणाकल्पिनं त्वां च सम्पश्यामि दिने दिने ।। ४६ ।।

ममादेशं कुरुष्वेति तमुवाच महेश्वरः ।

सूत उवाच -

इत्थं त्यागाधिपस्य प्रियवचनमहो सुन्दरः सन्निशम्य
प्रोद्यन्मौलिपदाम्बुजं सरसया दृष्ट्या विलोक्यादरात् ।
तस्मिन् वै कमलाविलाससदने देवं हि पश्यन् सदा
भक्त्या निर्भरमानसेन सुमहाकालं स निन्ये द्विजः ।।

।। इति श्रीशिवरहस्ये नवमांशे महेश्वरप्रसादो नाम त्रयोविंशोऽध्यायः ।।

।। चतुर्विंशोऽध्यायः ।।

मुनिः (उवाच)

तस्योद्वाहः कथमभूत्सुन्दरस्य गणाग्रणेः ।
तन्मे विस्तरतो ब्रूहि श्रवणेऽवधृतोऽस्मि ते ।। १ ।।

मुनिः (स्कन्दः) उवाच -

श्रृणु ते (श्रृणुष्व) विप्रवर्याद्य वदामि च विशेषतः ।
कमलिन्यास्तथोत्पत्तिं कमलालयमध्यमे ।। २ ।।

ततः पूर्वं पुरे तस्मिन्नाम्ना श्रृङ्गारनायिका ।
विद्यते चन्द्रगणिका सौन्दर्यामृतसीमभूः ।। ३ ।।

दिव्यवल्मीकरन्ध्रेशं सा सुताजननोत्सुका ।
आर्चयच्छिवभक्तांश्च द्रव्यैस्तत्तन् (तैस्तैः) मनोरमैः ।। ४ ।।

कन्याश्च पूजयामास हारिद्रवसनादिभिः ।
गौरीं च पद्वसनमालाकुङ्कुमभूषणैः ।। ५ ।।

असकृत्पूजनात्तुष्टौ ज्ञाततद्भाविनौ शिवौ ।
वरं ददतुरेतस्यै दुहिता ते भवत्विति ।। ६ ।।

तदा कैलासनाथस्य देव्याः श्रीपरिचारिका ।
नाम्ना कमलिनी या सा तस्याः कुक्षिमवातरत् ।। ७ ।।

तस्याश्चकार दुहितुर्नाम श्रृङ्गारनायिका ।
कान्तिश्रृङ्गारवेलायास्तदा सागरिकेति च ।। ८ ।।

मातुर्मूर्ति(र्त)निवानन्दमेकलक्ष्यं प्रियं दृशा ।
पुपोष सा सागरिका सौन्दर्यनिलया वपुः (अनघा) ।। ९

किमियं तरुणीमुग्धा किमियं तरुणं मधु ।
प्रतिपच्चन्द्रलेखा किमियमानन्दकन्दली ।। १० ।।

कारणेनावतीर्णा किं कमला कमलालये ।
इति वारविलासिन्यस्तां विलोक्य जगदुर्मिथः ।। ११ ।।

पांसुसद्मादिकृतकपुत्रिकाकन्दुकादिभिः ।
निनाय सा तदा बाल्यं मूर्तेवाज्ञा मनोभुवः ।। १२ ।।

बाल्योचितासु लीलासु तासु तासु च बालिका ।
अगायदात्मस्वामिन्या गौर्या(र्य) शीतिस्तवावलिम् ।। १३ ।।

गायन्त्यां मधुरं तस्यां वीणाभूत्परिवादिनी ।
शुकानां कोकिलानां च शरणं करुणालया ।। १४ ।।

समुत्सुका सागरिका स्वनिवेशाद्विनिर्ययौ ।
समरूपवधूभिः (वयोभिः) सा सखीभिनिर्गता बभौ ।। १५ ।।

आज्ञाशक्तिश्चमूयुक्ता देहबन्धेव(द्धेव)मान्मथी ।
यदा सागरिका प्राप देव श्रीमन्दिरान्तिकम् ।। १६ ।।

तदा सुन्दरनाथोऽपि तं देवं वन्दितुं ययौ ।
तस्मिन्नेव समुद्देशे तरुणीनां शिखामणिम् ।। १७ ।।

सुजातहसितज्योत्स्नां चारुसन्ध्यारुणाधराम् ।
भ्रूवल्लीविभ्रमाकृष्टवीरकन्दर्पकार्मुकाम् ।। १८ ।।

विषमायुधजैत्रास्त्रवीरायुधविलोचनाम् ।
[1]आचक्रभूविनिर्धूतमदकुञ्जरमस्तकाम् ।। १९ ।।

प्राग्जन्मभाग्ययोगेन तां ददर्श तलोदरीम् ।
मनोभवेन्द्रजालास्त्रमायामायूरपिञ्छिकाम् ।। २० ।।

तां दृष्ट्वा तनुरूपाङ्गीं तस्याभूत्तरलं मनः ।
किं कल्पभूरुहस्येयं प्रसूननवशाखिका ।। २१ ।।

किं वा पुण्यमहासम्पत्पुण्यपण्यस्य किं फलम् ।
किमद्भुतं किमात्मांशः शिवकारुण्यसारिणी ।। २२ ।।

न वेद्मीति सखा शम्भो रसातिशयवानभूत् ।
सा च सागरिका दृष्ट्वा कान्तं सुन्दरनायकम् ।। २३ ।।

तत्सौन्दर्यमहापूरमग्नदृष्टिरभूत्तदा ।
कोऽयं कुमारो मारः किं सौन्दर्यामृतसागरः ।। २४ ।।

किमु विद्याधरः शम्भोः करुणारसवर्धितः ।
कोऽयं हन्ति ममाप्येवं मानसाकर्षणोद्यतः ।। २५ ।।

इति चिन्ताकुला तत्र श्रीवल्मीकपतिं ययौ ।
तां यान्तीं सुन्दरो दृष्ट्वा प्राह रथ्याचरान् जनान् ।। २६

कान्वियं कान्तिसीमाभूरिति प्राहुरिमं जनाः ।
सेयं सागरिकाख्येयमिति सञ्चिन्त्य सुन्दरः ।। २७ ।।

---

1. जघनस्थलनिर्धूतेत्यर्थे ।

वल्मीकरन्ध्रदेवेशं वन्दितुं शिवमाययौ ।
सा च सागरिका देवं नत्वा वल्मीकनायकम् ।। २८ ।।

कृत्वा प्रदक्षिणं भूयो द्वारेणैकेन निर्ययौ ।
गत्वा सोऽपि हरं स्तुत्वा प्रिया सागरिकास्तु मे ।। २९ ।।

इति सञ्चिन्त्य देवेशमभ्यवन्दत सुन्दरः ।
तथापि वन्द्य स्तुत्वा च कमलालयशङ्करम् ।। ३० ।।

निर्ययो मनसा बिभ्रत्स तां सागरिकां शुभाम् ।
मत्प्राणराजहंसी सा क्व याता मानसप्रिया ।। ३१ ।।

इति तां सस्मितमुखीं कान्तां मृगयतेस्म सः ।
मृगीवोन्मील्य नयने स्मित्वा वक्तुमिवोन्मुखीम् ।। ३२ ।।

पुनः केन पथा याता पुण्यनाथस्य मेऽदया ।
तेजोमयमवाप्यैवं मोहयित्वा स्थिरं मनः ।। ३३ ।।

पुनः केन पथा यातापुण्यनाथस्य मेऽदया ।
इति काममपारीणं सोढुं सुन्दरनायकः ।। ३४ ।।

तामन्वेष्टुं तदौत्सुक्यादेवाश्रयमुपागमत् ।
तस्मिन्क्षणे सुन्दरेशः प्रियां सागरिकामिव ।। ३५ ।।

गन्तुमैच्छत्तदा रागी भानुः पाश्चात्यदिग्वधूम् ।
गते ज्ञान इवालोके भास्करस्य नभोऽभवत् ।। ३६

सागरं च तमोयुक्तं सुन्दरस्य मनो यथा ।
स्त्रियं निरीक्ष्य विकृतः शिवभक्तोऽप्यसाविति ।। ३७

हासश्रीरिव यामिन्याश्चन्द्रिका ददृशे तदा ।
मञ्चित्त निर्गतं ज्ञात्वा देवं प्रायो मनोभवः ।। ३८

बाधते मां शशाङ्कोऽपि तन्मौलिस्थोऽनलायते ।
वासन्तिकं पुष्परजः किमुमुर्मूर चूर्णवत् ।। ३९

मान्मथं ज्वलयत्युच्चैरनलं मलयानिलः ।
एवं स्मरातुरः सोऽभूत्सुन्दरशोऽपि मन्दधीः ।। ४० ।।

मृद्व्याः सागरिकायास्तु स्मरार्तिः केन वर्ण्यते ।
सा च सुन्दरसौन्दर्यदर्शनोत्थस्मराङ्कुरा ।। ४१ ।।

आविष्टेव गृहं प्राप मन्दमन्दपदक्रमा ।
सखीजनेनापि समं सँल्लापमपि तन्वती ।। ४२ ।।

सौधोत्सेधं समारोहद्व्यामोहविवशाशया।
तारमुक्तायुत ज्योत्स्नास्वच्छाम्बरवितानके ।। ४३ ।।

तन्वी पुष्पमये तल्पे निषसाद तदार्तवत् ।
ततोऽन्तिकस्थितां कांचिच्चेटिकामब्रवीद्वचः ।। ४४ ।।

नितान्तनिर्यन्निःश्वासग्लापिताधरपल्लवा ।
निषेवन्त्या नीलकण्ठं मया योऽयं निरीक्षितः ।। ४५ ।।

कुमारकोटिमाराऽऽभः किं त्वया विदितः पुरा ।
तयैवमुक्ता सा प्राह स नाम्ना सुन्दरः किल ।। ४६ ।।

शङ्करस्य सखा तेन बलवत्किङ्करीकृतः ।
इत्युक्त्वा सा च तं स्मृत्वा तद्गुणप्रेमविह्वला ।। ४७ ।।

कृतशीतोपचारापि स्मरार्ता पर्यतप्यत ।
हिमाम्बुचन्दनरसैः प्रेरितैस्तु सखीजनैः ।। ४८ ।।

तस्या स्मराग्निज्वालायाः प्राज्यैराज्यायितं तदा ।
तस्यां हिमाम्बुसिक्तानि कुसुमानि सखीजनः ।। ४९ ।।

अवीकिरच्चान्वभूवन्मनोभवविषाशुगाः ।
उत्थाय सा मयूरीव श्लथकेशकलापिनी ।। ५० ।।

मुखमुन्नम्य बिम्बोष्ठं वचो निर्लक्षमब्रवीत् ।
किमिदं मम शीतांशुः सख्यः कालानलायते ।। ५१ ।।

मन्दानिलाङ्कुरस्तस्य सहायो भवति स्वयम् ।
न वेति(त्ती)मामेवमालि चन्द्रशेखरकिङ्करः ।। ५२ ।।

किं करोमि [1]दयाम्बाऽद्य न करोति दयानिधिः ।
इति ब्रुवाणा तां त्यक्त्वा शयनं मुहुरुत्थिता ।। ५३ ।।

पतन्ती निःश्वसन्ती च कामार्तिं सोदुमक्षमा ।
त्रियामान्तयामेव साऽभवद्विरहार्तयोः ।। ५४ ।।

तस्याः सागरिकायाश्च सुन्दरेशस्य तस्य च ।
तयोस्तु चरमे यामे क्षणसञ्जातनिद्रयोः ।। ५५ ।।

स्वप्ने प्राह शिवोऽप्यस्तु विवाहो युवयोरिति ।
सेयं सागरिका कन्या मद्भक्ताय महात्मने ।। ५६ ।।

---

1. दयां अम्बा

सुन्दरेशाय देयेति स्वप्ने पौरान् जगाद च ।
तरुणेन्दुधरस्वप्नकरुणाख्यारुणोदयात् ।। ५७ ।।

विरराम तयोरीषद्विरहप्रभवं तमः ।
पूर्वविघ्नितसौम्येशविवाहालोकनादरः ।। ५८

तं द्रष्टुमिव निर्विघ्नमुदियाय दिवाकरः ।
ततः प्रभाते पौरास्ते ज्ञात्वा स्वप्नं शिवोदितम् ।। ५९ ।।

मुहूर्तं कल्पयामासुर्मौहूर्तिकवरोदितम् ।
तस्याः सागरिकायाश्च सुन्दरेशस्य तस्य च ।। ६० ।।

विवाहं कारयामासुर्विभवेन महीयसा ।
कृतोद्वाहो यथाकामं सुन्दरेशस्तया सह ।। ६१ ।।

रत्या काम इवानेकान्विषयानन्वभूत्तदा ।
शिवं स्तुवन्सदा चित्ते धृततत्पादपङ्कजः ।। ६२ ।।

सौम्यः सागरिकोपेतो विजहार विलासवान् ।
कदाचिद्देवदेवेशं सर्वदेवनमस्कृतम् ।। ६३ ।।

नमस्कर्तुं मनश्चक्रे स भक्तैः सह सुन्दरः ।
परिधाय नवं वासो माननीयः सुरैरपि ।। ६४ ।।

चर्चितः कुङ्कुमरसैरन्तः कल्हारचूलिकः ।
करे वहन्हेमपात्रं फालोत्कीर्णत्रिपुण्ड्रकः ।। ६५ ।।

चञ्चत्काञ्चनताटङ्को वक्षःश्लक्ष्णगुणत्रयः ।
आप्तैः परिवृतो भक्तैः कमलालयशङ्करः ।। ६६ ।।

सर्वतोभुखमहात्म्यो निरियाय निकेतनात्।
[1]गौरींबलवदासीभूसुराणां पुरः सरः (?)।। ६७ ।।

वीथ्यां स्थित्वा मुहुः श्रृण्वञ्जनकोलाहलं परम् ।
कपिकुक्कुटमेषादिरणकर्मविलोकयन् ।। ६८ ।।

वृतः कलाचीताम्बूलच्छत्रचामरचारिभिः ।
हयमुख्येन चायातः स्वर्णपर्यङ्कचारुणा ।। ६९ ।।

कविराजकलानाथः शिवश्रीपादशेखरः ।
आदिदेशिकशैवानां शैवागमधुरन्धरः ।। ७० ।।

श्रीमज्जम्बु पुराकल्प कमलालय शङ्कर ।
जयेति पुरतः शश्वत् स्फूर्ज द्विरुतकाहलः ।। ७१

कान्त्या नेत्रोत्सवं कुर्वन् सुन्दरीणां स सुन्दरः ।
परितः सहितोविप्रैः शम्भोः श्रीगोपुरं ययौ ।। ७२ ।।

तन्नत्वा प्राविशद्भक्तप्राप्यदेवाश्रयस्थितान् ।
नत्वानन्यसमान् भक्तान् कदैषां किङ्करोऽस्म्यहम् ।। ७३

स भृत्यभृत्य इत्येत्य द्वारं गर्भगृहस्य च ।
सुरार्चितं तदभ्यर्च्य शम्भोरभ्यन्तरं ययौ ।। ७४ ।।

पूर्वं दृष्ट्वैव[2] तं दृष्ट्वा स्वात्मेशं चन्द्रशेखरम् ।
सानन्दबाष्परोमाञ्चः प्राणंसीत्पादयोः प्रभोः ।। ७५ ।।

---

1. अशक्यशोधनमिदमर्धम् ।
2. पूर्वदृष्टचैव

नत्वा च निहितात्मा च सौम्योऽस्तुवत तत्पदे ।
यद्वेतालवृतं तस्मै पादाब्जाय नमोऽस्तु ते ।। ७६ ।।

यत्ताण्डवोत्सवं तेने महाहेमसभान्तरे ।
तस्मै कालस्य संहर्त्रे पादपद्माय ते नमः ।। ७७ ।।

देव्या संवाह्यमानं यत्पुण्यं च हृदि योगिनाम् ।
अन्तर्ज्योतिर्ज्योतिषां च पादपद्माय ते नमः ।। ७८ ।।

यदवीक्षितमाद्येन हंसेनापि सुपोत्रिणा ।
नमस्ते पादपद्माय श्रुतिमातङ्गशीर्षग ।। ७९ ।।

नाथ सोढापराधानां [1]यो मे मोहतमोऽपहः[2] ।
नमस्ते पादपद्माय नावे संसारवारिधेः ।। ८० ।।

इति तेन स्तुतः प्रीतस्तस्य ज्ञात्वा मनोगतम् ।
तद्दातुकामः सौम्येशं प्राह तं पार्वतीपतिः ।। ८१ ।।

ददाम्यभिमतं ते मद्भृत्यानां व्रज भृत्यताम् ।
तेह्यात्म[3]सदृशात्मानो लब्ध्वा मामपि निर्मलाः ।। ८२ ।।

न्यूलतादोषरहिता मद्ध्यानविलसत्सुखाः ।
व्रजतां शरणं ज्ञानं मया दत्तं स्तुतिक्षमम् ।। ८३ ।।

परम्परा त्वं भक्तानां शुद्धाभिस्तुहि सूक्तिभिः ।
इत्युक्तस्सुन्दरस्तेन पुनः प्राह महेश्वरम् ।। ८४ ।।

---

1. यन्मे 2. मोहतमोऽपहम् 3. आत्मसमात्मानो.

आरभ्य स्तौमि किन्नाम प्रकारेण तु केन वा ।
कोऽहमित्युदितो देवः प्राहैनं पञ्चभिर्मुखैः ।। ८५ ।।

श्रीमत्तिल्लपुरीभूष्णुद्विजकिङ्करकिङ्करः ।
अस्मीत्यारभ्य निःसीममाहात्म्यस्तुतितत्परान् ।। ८६ ।।

इत्याज्ञां देवदेवस्य सुन्दरः शिरसा वहन् ।
तद्भक्तान् दूरतो दृष्ट्वा प्रणनाम प्रहृष्टधीः ।। ८७ ।।

त्वद्भृत्यभृत्योऽस्मीत्यस्तौत्तान् च पृथक् पृथक् ।
अस्मत्सङ्घातरङ्गस्य इत्याहुस्ते तु शाश्वतम् ।। ८८ ।।

इति स्तुतैः संस्तुत एव सुन्दरः
पूरे पुरारेः कमलालयाह्वये ।
प्रणम्य गायन्ननिशं स भक्तिमा-
निहावसत्सागरिकासखः सुखम् ।। ८९ ।।

नैवाविमुक्तं समवाप्य चान्ते
शाम्भोः पदाब्जे स विलीन एव ।
तया सहायः गणिकासखः सुखी
न वै विमुच्याथ निजं कलेबरम् ।।

।। इति श्रीशिवरहस्ये नवमांशे चतुर्विंशोऽध्यायः ।।

।। पञ्चविंशोऽध्यायः ।।

पुनरन्यच्चरित्रं ते कथयिष्ये समासतः ।
श्रृणु त्वं श्रवणानन्दं शिवभक्तमहोत्सवम् ।। १ ।।

अस्ति चोलमहीकान्ताकर्पूरतिलकायितम् ।
पुण्डरीकपुरं नाम 'पुरं पुरभिदो महत् ।। २ ।।

हृत्पुण्डरीककमलं विरजं पुरुषस्य यत् ।
दहरोपासनादक्षध्येयं तेजःकरम्बितम् ।। ३ ।।

मल्लीवल्लीवतल्लीभिर्वलितोपान्तकानने ।
यस्मिन्नातनुते नाट्यं क्रीडानटशिखामणिः ।। ४ ।।

दर्शं दर्शं तदा शम्भोः परमानन्दताण्डवम् ।
आसाते यत्र हृष्यन्तौ व्याघ्रपादपतञ्जली ।। ५ ।।

श्रीमद्धेमसभामध्ये नृत्यन्तं चन्द्रशेखरम् ।
वेदपादान्वितैः स्तोत्रैर्यत्र तुष्टाव जैमिनिः ।। ६ ।।

यत्रास्ते जगदाधारो वटस्य सविधं(धे) हरः ।
श्रीमूलस्थानलिङ्गात्मा भवपाशविमोचकः ।। ७ ।।

त्रिकूटस्य गिरेः श्रृङ्गे क्वचिद्धेमसभा क्वचित् ।
तत्र ब्रह्मादयः क्वापि श्रीमूलस्थाननायकः ।। ८ ।।

शिवगङ्गातटे यत्र शिवकामेशसुन्दरी ।
त्रैलोक्यरक्षां कुरुते करुणोर्मितरङ्गिते ।। ९ ।।

कृपापाङ्गेन तद्देव्या अनङ्गोज्जीवचारुणा ।
सन्ति तिल्लवने तत्र समुल्लसितचूलिकाः ।। १० ।।

हिरण्यवर्णा आनीता भूसुरा भासुराः पुरा ।
समधीतचतुर्वेदाः षडङ्गाध्ययनोत्सुकाः ।। ११ ।।

अध्यात्मज्ञानकुशला मोचापेशलवाक्कलाः ।
पुराणज्ञानभूतार्था धर्मशास्त्रप्रवर्तकाः ।। १२ ।।

प्रातःस्नाताः कृतोद्वाहा विधिनाऽऽहितवह्नयः ।
पाकयज्ञहविर्यज्ञसोमसंस्थाधुरन्धराः ।। १३ ।।

वाजपेयाऽऽर्जितश्वेतछत्रस्थगितदिक्तटाः ।
त्रिसहस्रद्वादशाहपौण्डरीकविधायिनः ।। १४ ।।

यैरध्वरे समाहूते पुरुहूते चिरं शची ।
श्वासैरुष्ममयांश्चक्रे मरुदुद्यानमारुतान् ।। १५ ।।

ते सत्रिणः सदा शम्भोरर्चनाकर्मकर्मठाः ।
तीव्रशक्तिनिपातेन शिवानुग्रहगोचराः ।। १६ ।।

समयेन विशेषेण दीक्षाभेदेन संस्कृताः ।
निर्वाणदीक्षानिष्णाताः कृतचर्याभिषेचनाः ।। १७ ।।

क्रियातत्त्वविदश्चर्याप्रवर्तनपरायणाः ।
त्रिप्रमाणपरिपाप्तत्रिपदार्थ विवेचनाः ।। १८ ।।

सशिष्यज्ञान षट्त्रिंशत्तत्त्वबुद्धाध्वभूतयः ।
दीक्षाच्छिन्नमलाटोपा दीक्षयन्तो नतानपि ।। १९ ।।

नित्यानित्यविवेकाढ्याः सर्वत्र विगतस्पृहाः ।
शान्तिदान्तिमहादीक्षा उपरत्या समाधिना ॥ २० ॥

विश्वासेन समायुक्ता मुमुक्षोल्लासिमानसाः ।
अधीतब्रह्ममीमांसाः शिवध्यानैकतत्पराः ॥ २१ ॥

चिदम्बरनटेशानपूजोत्सवविधायिनः ।
पश्यन्तः सर्वदा शम्भोः परमानन्दताण्डवम् ॥ २२ ॥

सदा प्राप्तसमस्यार्था द्विजाः स्वात्मनि संस्थिताः ॥ २२

ते वर्णनीयाः कथमस्मदाद्यै-
र्मनुष्यकीटैर्महितानुभावाः ।
ये सौम्भभक्तिस्तुतिसाधकेन
देवेश्वरस्यैव मुखेन संस्तुताः ॥ २३ ॥

रुद्राक्षमालाभरणा विभूत्या
शाश्वत्समुद्धूलितसर्वगात्राः
वर्ण्याः कथं ते शतरुद्रमन्त्र-
परायणैकप्रवणा महान्तः ॥ २४ ॥

क्रियासु चर्यासु पचेलिमश्रमाः
प्रबोधमार्गे पटवोऽतियोगिनः ।
कृतत्रिसाहस्रमखाः सभापते-
र्जयन्ति भक्तास्त्रिसहस्रभूसुराः ॥ २५ ॥

अजटाः फालचन्द्रेण अफालान्तरचक्षुषः ।
अवामा वामभागेन वपुषा शम्भुमूर्तयः ॥ २६ ॥

स्कन्द उवाच -

अथ तिल्लवनावासी(सि) त्रिसहस्रभूसुरान् ।
नत्वा श्रीनिलकण्ठस्य कथां वक्ष्यामि पावनीम् ।। २७ ।।

निर्माल्यपुष्पनिर्मुक्त माध्वीतुन्दिलषट्पदः ।
आसीत्तिल्लवने कश्चित् कुलालकुलशेखरः ।। २८ ।।

भक्ताग्रगण्यः श्रीकण्ठपूजामृत्पात्रिकाकरः ।
माहेश्वरजनाभीष्टभिक्षापात्रप्रदायकः ।। २९ ।।

सदा शम्भुपादसक्तमानसः शिवकर्मसु ।
वीक्ष्य वीक्ष्य विभोः क्ष्वेलनीलकण्ठं समाकुलः ।। ३० ।।

नीलकण्ठपदोच्चारी नीलकण्ठ इतीरितः ।
स जन्मनः प्रभृत्येव [1]सन्त्यक्त्वा देवतान्तरम् ।। ३१ ।।

सेवमानो महादेवं वयः कौमारमत्यगात् ।
पञ्चबाणभुजाटोपपरिपाटीपटीयसा ।। ३२ ।।

प्रथीयसा महोल्लासैः पस्पृशे वयसा ततः ।
तस्यासील्ललना नूनं केलिकल्पेन शिल्पिना ।। ३३ ।।

श्रृङ्गाररससर्वस्ववेधसा वयसाञ्चिता ।
पातिव्रत्यादरुन्धत्या माहात्म्यमनुरुन्धती ।। ३४ ।।

कन्दर्पवैजन्ती सा तस्य [2]सारसमावहत् ।
स व्याघ्रपादलिङ्गस्य कुर्वाणो दर्शनं व्रती ।। ३५ ।।

---

1. त्यक्त्वा वै   2. Woman's Zone

चिदम्बरपतेर्नाट्यं वीक्षमाणोऽति कौतुकी ।
स कदाचन शर्वर्यामन्धकारेऽतिसुन्दरे ।। ३६ ।।

धारालिमेघघोषासु तथा दिक्षु विदिक्षु च ।
सेवित्वा ताण्डवेशानं व्याघ्रपादेश्वरं तथा ।। ३७ ।।

प्रत्यागच्छन् पयःपूरकण्ठदघ्नेन वर्त्मना ।
आसारझञ्झापातेन वेपमानकळेबरः ।। ३८ ।।

झलञ्झल्लितकेशाग्रपाथसाऽऽर्द्रतराम्बरः ।
स नीलकण्ठः कस्याश्चिद्वेश्याया वेदिकां ययौ ।। ३९ ।।

[1]नीलकण्ठपदोच्चारान्नीलकण्ठमुपागतम् ।
बुद्ध्वा सा दीपिकाहस्ता झटित्यागत्य भामिनी ।। ४० ।।

तं कथंचिदुपच्छन्दं[2] सा नीत्वा भवनान्तरम् ।
सम्मृज्याङ्गं दुकूलेन हसन्ती माययाततः ।। ४१ ।।

झटित्यम्बरमास्तीर्य यत्र तूलपटी पुनः ।
प्रसार्य हेमपर्यङ्के मणि श्रृङ्खलिकाञ्चिते ।। ४२ ।।

स्थापयित्वा महावृष्टिबाधामुद्धूय सा क्रमात् ।
चन्दनागरुकस्तूरीमिलन्मृगमदादिभिः ।। ४३ ।।

विलिप्याङ्गं कृताहारं तत्र शाययति स्म तम् ।
ततो महेश्वरप्रीत्या तं रन्तुं वाञ्छति स्म सा ।। ४४ ।।

---

1. कण्ठदघ्नपयः पूरेण 2. Coaxingly.

दुर्वारत्वाद्रतीशस्य तस्यां दाक्षिण्यतोऽपि सः ।
तरुणस्तद्रतिं प्राप्तुमनुमेनेऽतिकौतुकी ।। ४५ ।।

तस्या ईप्सानुसारेण कञ्चित्कालं मनोभुवः ।
साम्राज्यमनुभूयासौ निजालयमुपाविशत् ।। ४६ ।।

तत्रालोक्य निजां कान्तां शम्बरारातिशम्बरीम् ।
पुनरुद्दीपितानङ्गस्तां रन्तुमुपचक्रमे ।। ४७ ।।

सम्मृज्य गात्रेषु पटीरचर्चा-
माच्छाद्य चेलाञ्चलतो रतांशान् ।
स प्रीणयन् चाटुपरम्पराभि-
स्तदीयशय्यां शनकैः प्रपेदे ।। ४८ ।।

।। इति श्रीशिवरहस्ये नवमांशे पञ्चविंशोऽध्यायः ।।

।। षड्विंशोऽध्यायः ।।

स्कन्द उवाच

ततः स नीलकण्ठोऽसौ नीलकण्ठपदाश्रयः ।
तया परिमलोल्लासैः सार्धं वारस्त्रिया रतिम् ।। १ ।।

अन्वभुङ्क्तेति चेटीभ्यो श्रुत्वा सा पतिदेवता ।
तदा चन्द्रमुखी रात्रौ वारस्त्रीकृतसङ्गतिम् ।। २ ।।

पतिं दृष्ट्वा तु तल्पेऽस्य स्पर्शं स्नेहेन खण्डिता ।
भवतः श्रीनीलकण्ठः प्रमाणं चेद्धि मा स्पृश ।। ३ ।।

इत्याह सा रुषा नाथं तमालिङ्गनलालसम् ।
इत्युक्तः श्रीनीलकण्ठो रुषाविष्ट उवाच ताम् ।। ४ ।।

नीलकण्ठ उवाच -

मनसा त्वां स्त्रियश्चान्या न स्प्रक्ष्याम्यद्य चेतसा ।
विनान्योन्याङ्ग संस्पर्शमनाङ्गो देववर्जिता (?) ।। ५ ।।

सापि चक्रे व्रतं भर्तुरिष्टं तन्वी वितन्वती ।
गार्हस्थ्यधर्मं सा चक्रे परैरज्ञातसङ्गरा ।। ६ ।।

तावेवं दम्पती तादृगसिधाराव्रतस्थितौ ।
निन्यतुः किल तारुण्यं शिवकारुण्यभाजने ।। ७ ।।

प्रवृद्धशिवभक्ती तौ वृद्धौ शिथिलविग्रहौ ।
चक्रतुः शिवकैङ्कर्यं तथापि तरुणाविव ।। ८ ।।

ततस्तयोर्मतं ज्ञातुं शिवस्तापसवेषभृत् ।
दीप्यत्पिङ्गजटाधारी कौपीनी दण्डवस्त्रधृक् ।। ९ ।।

यज्ञसूत्रोल्लसद्वक्षा भस्माङ्गः सत्रिपुण्ड्रकः ।
स्मेराननः पात्रपाणिर्नीलकण्ठालयं ययौ ।। १० ।।

श्रीनीलकण्ठस्तं दृष्ट्वा हृष्टाङ्गः शिवयोगिनम् ।
शिवयोगी महानेष इत्यपूजयदार्द्रतः ।। ११ ।।

नाथ किं करवाणीति भक्त्या तेनेरितः शिवः ।
तमेनमाह मे पात्रमिदमादाय रक्ष्यताम् ।। १२ ।।

अस्त्यस्य न समं पात्रं पुनात्यन्तरतर्पितम् ।
रत्नाद्यादपि रक्ष्यं स्याद्भूयःस्वं रक्ष्यतामिति ।। १३ ।।

ततः श्रीनीलकण्ठस्तत्पात्रमादाय तत्क्षणात् ।
गृहे तन्न्यस्य तद्रक्षां कृत्वा भूत्स्वस्थमानसः ।। १४ ।।

तं यान्तमनुसृत्यासौ निवृत्तोऽभूत्तदाज्ञया ।
देवदेवोऽप्युदीच्यां तां प्रविशत्काञ्चनीं सभाम् ।। १५ ।।

गते काले शिवः पात्रं *याययित्वा स्वमायया ।
भृत्याय पुनरादित्सुस्तमागात्पूर्ववेषवान् ।। १६ ।।

तमागतं प्रणम्यासौ कुलालकुलसम्भवः ।
आगतस्त्वं हि भाग्यादित्यस्तावीत्तन्मुखेक्षणः ।। १७ ।।

---

* अन्तर्धाप्य - तिरोधाप्य

शिवः (उवाच)

पात्रं पुरा त्वयि न्यस्तं सहसा तत्प्रदेहि नः ।
तिष्ठेत्युवाच तं शर्वः[1] सर्वदानाधिपः शिवः ।। १८ ।।

तच्छ्रुत्वा नीलकण्ठोऽपि प्रविश्यान्तर्गृहं क्वचित् ।
मुहुरन्विष्य तत्पात्रमदृष्ट्वा दुःखमास्थितः ।। १९ ।।

अन्तर्यासि न निर्यासि को विलम्ब इतीरितः ।
स तदा निर्गतो मन्दं वचः प्राह विषादभाक् ।। २० ।।

सूत उवाच -

जटाजूटोरुशोभाङ्कमस्तकं भूतिभूषितम् ।
रूद्राक्षस्रग्भिराकीर्णं त्रिपुण्ड्रावलिभूषितम् ।। २१ ।।

स कुलालः कुलालेशं प्रणम्य विनयानतः ।
प्राञ्जलिर्विनयेनाह नीलकण्ठस्तदा शिवम् ।। २२ ।।

कुलाल उवाच -

तन्न पश्यामि ते पात्रं ददाम्यन्यच्च तन्निभम् ।
मन्नाथ [2]कापराधो मे भवता क्षम्यतामिति ।। २३ ।।

कृतप्रणामं तं प्राह कोपप्रस्फुरिताधरः ।

शिवयोग्युवाच -

घोरं त्वयोक्तं किन्नाम मत्पात्रं तद्ददस्व मे ।
अपि रत्नस्वर्णमयमन्यन्नादातुमुत्सहे ।। २४ ।।

---

1. तं नीलकण्ठः सन्तुष्टमानसः ।
2. कांपाराधः कुत्सितः अपराधः ।

इत्युक्तः सोऽब्रवीद्भूयः प्रमादो मे महानभूत् ।
किं तेन पात्रं स्थाप्यान्यद्ददामीत्यवदत्पुनः ।। २५ ।।

न्यायवत्त्वतिगुह्यं त्वं भक्तवद्भावशुद्धवत् ।
किञ्चिन्न लज्जये वक्तुं न याह्यद्य पदात्पदम् ।। २६ ।।

लोकः पश्यतु रुद्ध्वा त्वामनादाय च पात्रकम् ।
न यामीत्युद्भटालापं कुलालःप्राह तं द्विजम् ।। २७ ।।

पात्रं न वञ्चितं भुक्तं चौर्यं नास्त्यल्पकं मयि ।
किं वात्रकुर्यामित्युक्तो देवस्तं पुनरब्रवीत् ।। २८ ।।

शिवयोग्युवाच -

यद्येवं तनयं हस्ते गृहीत्वा दीर्घकाम्भसि ।
निमज्ज त्वं विशुद्धात्मा पुनर्याहि गृहानिति ।। २९ ।।

तच्छ्रुत्वा नीलकण्ठोऽपि तमाह कपटद्विजम् ।
किं कर्तव्यं सुतो नैव ममास्तीति भयाकुलः ।। ३० ।।

यद्येवं महिलां हस्ते गृहीत्वा वापिकाजले ।
निमज्ज्योन्मज्ज्य गच्छेति व्याजविप्रोऽभ्यभाषत ।। ३१ ।।

इत्युक्तः शङ्करेणासौ शङ्करेणानया सह ।
निमज्जनं ममायुक्तमहमेकः पुरस्तव ।। ३२ ।।

दीर्घिकां सकलां मत्वा द्रागुन्मज्ज्यनिमज्ज्यताम् ।
इत्यवादीत्कुलालाग्र्यो भावना ब्राह्मणस्तदा ।। ३३ ।।

यद्येवं चोरितं नैव दित्ससि स्त्रीकरं करै ।
कृत्वेच्छसि न वा मङ्क्तुं याहि तिल्लवनद्विजान् ।। ३४ ।।

द्विजः आह -

अहं यास्यामि तैरुक्तं करिष्ये वो महात्मभिः ।
इत्युक्त्वा सह तेनेशो ययौ तिल्लवनद्विजान् ।। ३५ ।।
मद्दत्तां पात्रिकां नैष दत्ते महिलया सह ।
न निमज्जत्यसावीशो व्याहरद्द्विजसन्निधौ ।। ३६ ।।

ब्रूहीति तैर्द्विजैरुक्तः स कुलालवरोऽब्रवीत् ।

कुलालः (उवाच)-

एतद्दत्तं मया गुप्तं पात्रं नैव प्रदृश्यते ।। ३७ ।।

तदाकर्ण्य द्विजाः प्रोचुर्यद्येवं आर्यया सह ।
निमज्ज त्वं जले तेन यथोक्तं नीतिरीदृशी ।। ३८ ।।

तदाकर्ण्य कुलालाग्र्यो यद्येवं क्रियते मया ।
प्रतिवाद्यनुमत्येति भणित्वा भवनं ययौ ।। ३९ ।।

भवनं प्राप्य गेहिन्या देहिन्येव नवश्रिया ।
सहागत्य सभामेव वरवाचमवोचताम् (त) ।। ४० ।।

पाणिभ्यां दण्डमालम्ब्य निमज्यत इतीरयत् (?) ।
तथा निमज्जनोद्योगमतानीद्वापिकाजले ।। ४१ ।।

तं तथाविधमालोक्य द्विजा एवमवादिषुः ।

द्विजाः (ऊचुः) -

नैवं निमज्जनं कार्यं प्रत्यर्थं नानुमन्यते ।। ४२ ।।

करेण करमालम्ब्य तया सह निमज्ज्यताम् ।
इत्युक्तो नीलकण्ठस्तैर्व्याघ्रपादेशसन्निधै ।। ४३ ।।

प्रकाश्य संविधं(दां) पुर्वं(र्वां) निममज्ज तथैव सः ।
उन्मज्जन् स तया सार्धं ददृशे सहतैर्द्विजैः ।। ४४ ।।

तरुणाकृतिरुद्धूय वार्धिकं तरुणीच सा ।
नादृश्यत तदा व्याज ब्राह्मणस्तत्र रोदसी ।। ४५ ।।

व्यालोकि वृषभारूढो मृडस्तत्र सहोमया ।
दम्पती तौ सरस्तोये निमज्जन्तौ युवाकृती ।। ४६ ।।

देवप्रसूनवर्षेण निमग्नाङ्गौ बभूवतुः।
तुष्टुवाते तदा शम्भुं सव्रीळौ तौ च दम्पती ।। ४७ ।।

कुलालः -

नमोऽस्तु ते देव दयानिधे हर
प्रपन्नपालाव्यय सोममौले ।
व्यालोलव्यालामल हस्तशूल
नौ पाहि सर्वेश्वर कालकाल ।। ४८ ।।

शिवः स्तुतस्तिल्लवनद्विजेन्द्रै-
र्जायापती सम्प्रणतौ स्तुवन्तौ ।
सम्प्राप्य भोगानिह यातमन्ते
मदीय धामेति तदा तिरोऽभूत् ।। ४९ ।।

स नीलकण्ठस्तरुणीसमेतो
भोगान्भुजन्वै[1] तरुणेन्दुमौलेः ।
निधाय पूजां व्रतवैभवेन
क्रमादयासीद्रजताद्रिश्रृङ्गम् ।। ५० ।।

।। इति श्रीशिवरहस्ये नवमांशे नीलकण्ठचरितं नाम षड्विंशोऽध्यायः ।।

---

1. भुञ्जानः

।। सप्तविंशोऽध्यायः ।।

स्कन्द उवाच -

स्वभावरिपुसंज्ञस्य कथयामि कथां शुभाम् ।
मेरुमुद्रितशार्दूललालनेन जगज्जितम् ।। १ ।।

नृपेणाभङ्गचोलेन्द्रनाम्नार्कान्वयजन्मना ।
कावेरीवारिभरिते पालिते चोलमण्डले ।। २ ।।

कवेरजापुष्पपुरीत्यस्ति देवपुरीसमा ।
तस्यामासीद्वैश्यवर्यः स्वभावरिपुसंज्ञकः ।। ३ ।।

प्रथमः शिवभक्तानां श्रीशाम्भवपदार्चकः ।
शिवभक्तपदार्चातः सम्पदा धनदोपमः ।। ४ ।।

तस्मिन्ददति भक्तेभ्यो वस्तु तत्तदभीप्सितम् ।
तस्य भक्तस्य दातृत्वं जिज्ञासुरभवच्छिवः ।। ५ ।।

स्थिराया गोचरो भक्तस्त्र्यम्बकेशस्त्रयीमयः ।
देवेशः सूक्ष्मगम्योऽपि सभादर्शितताण्डवः ।। ६ ।।

गौर्या च गङ्गया ज्ञातः कितवो धूर्तवेषवान् ।
वणिजोऽस्य गृहं प्राप्य स तदाभस्मपाण्डरः ।। ७ ।।

तिर्यक्त्रिपुण्ड्ररुद्राक्षमालाभरणभूषितः ।
वणिक्पतिर्भक्तवेषं तं मूर्तमिव मन्मथम् ।। ८ ।।

दृष्ट्वा तद्दर्शनानन्दो ननाम शिवतत्त्ववित् ।
पचेलिमैः पूर्वपुण्यैर्भूषितोऽस्मीति हृष्टधीः ।। ९ ।।

उचितैरुपचारैस्तमूरुजात उपाचरत् ।

वणिक् (उवाच)

मामेवंवपुराप्तोऽसि किं मे भाग्यं फलोदयम् ।। १० ।।

त्वत्किङ्करोऽस्मि भगवन्किमागमनकारणम् ।
इति ब्रुवाणं वणिजं प्राञ्जलिः प्राह स प्रभुः ।। ११ ।।

मन्दस्मितशशिज्योत्स्नाऽऽलोकनेन मनोहरम् ।

विप्रः (उवाच) -

धनेन भक्तसङ्धानां वाञ्छितं यद्ददासि तत् ।। १२ ।।

इति श्रुत्वा तवोदन्तमागतोऽस्मि त्वदन्तिकम् ।
ददासिचेत्तद्ददामीत्यूचिवान् स तदा द्विजः ।। १३ ।।

प्राञ्जलिः प्राह तं वैश्यः प्रेमान्तः सम्प्रकाशयन् ।

वणिक् (उवाच) -

यदस्तु[1] तव रत्नानि धनं मे भक्तसात्कृतम् ।। १४ ।।

माभैषीर्वाञ्छितं तेऽद्य ददामि भगवन्निति ।

विप्रः (उवाच)

धनादिषु न मे वाञ्छा शिवेच्छायाः प्रियोऽस्म्यहम् ।। १५

त्वत्प्रियावाञ्छया प्राप्तं विद्धि सिद्धं[2] वणिग्वर ।।
तां ददातु भवान् मह्यमिति प्राह तदा द्विजः ।। १६ ।।

---

1. धनं मे भक्तसात्कृतं इति यत् तदस्तु । तव कृते रत्नानि वर्तन्ते, मा भैषीः इति ।।

2. सिद्धपुरुषं माम् विद्धि ।।

तच्छ्रुत्वा वचनं वैश्यो विरुद्धमपि लोकतः ।
तदानीं प्रथमप्रीतेरप्यति प्रीतिमानभूत् ।। १७ ।।

वणिक् (उवाच)

यदस्तु मे प्रियं वस्तु तदस्तु तव वाञ्छितम् ।
वैश्यवर्यस्तदावश्यं प्राह भार्यां तदा द्विज[1] ।। १८ ।।

विप्रेणानेन गच्छ 'त्वं दत्तासीत्यवदच्च ताम् ।
तच्छ्रुत्वाऽशनिसङ्काशं वाक्यं सा व्याकुलाऽभवत् ।। १९

पुनः स्वस्थमनाः प्राह प्राणेशं पतिदेवता ।
इयमेव त्वदाज्ञा चेज्जीवितेशस्त्वमेव मे ।। २० ।।

यत्त्वयोक्तं मया कार्यं न स्वतन्त्रास्मि भर्तरि ।
इतीरयन्ती सा नाथं नाथन्ती[2] मन्मथान्तकम् ।। २१ ।।

तयोरकृत्रिमं भावं ज्ञात्वा देवोऽतिविस्मितः ।
मन्दस्मितोल्लसद्गण्डं विलासोल्लासिभूषणम् ।। २२ ।।

प्राप्य प्रणम्य सा विप्रं तस्थौ स्तब्धा नतानना ।
त्यक्ता प्रिया किमस्त्यन्यत्कार्यं नाथेति वादिनम् ।। २३ ।।

अतीत्य मां नय ततो न भयं विद्यते ततः ।
इत्युक्तस्तं वणिक्प्राह मया विप्र विचिन्तितम् ।। २४ ।।

---

1. जैगीषव्य सम्बोधनम् ।

2. पश्यन्ती नाथन्तीति च पाठभेदः क्रमेण मा. 1764/9548- तथा सङ्ख्यारहित मातृकाद्वायानुसारेण ।

त्वयेदितं मया कार्यमिति प्राप्य गृहान्तरम् ।
बद्धचेलो दधत्खड्गफलकं च विनिर्ययौ ।। २५ ।।

स तान्निरोधकान्हन्तुमकरोद्दृढमानसम् ।
प्रणम्य तं प्रयाहीति प्रयातं द्विजमन्वगात् ।। २६ ।।

तस्मिन्क्षणे श्रुतोदन्तास्तस्य तस्याश्च बान्धवाः ।
निर्ययुर्निजधामभ्यो वैश्याः क्रोधाद्धृतायुधाः ।। २७ ।।

विना भ्रान्तं स्वभावाद्धि केन नीतिरियं कृता ।
तामादाय कथं याति कश्चित्काञ्चित्पतिव्रताम् ।। २८ ।।

वैश्यामवर्ण्यामज्ञात्वेतामनुद्धूय वीर्यतः ।
लोकस्थितिनिःस्थापनीया इति मारुतरंहसः ।। २९ ।।

कठोरतरवाचस्ते निन्दन्तस्तां समन्वयुः ।
क्व यासि तिष्ठ तिष्ठेति दुद्रुवुस्तौ च तां च ते ।। ३० ।।

स्वभावार्या हितास्ते वै वैश्यास्ते विधृतायुधाः ।
पतिव्रतामिमां हित्वा त्वं याहीत्यब्रुवन् द्विज ।। ३१ ।।

साब्रवीत्सुमुखं वीक्ष्य तापसं भीरुवात्स्थितम् ।
साब्रवीद्विस्मिता साध्वी इङ्गितज्ञा स्वभर्तरि ।। ३२ ।।

मा भैषीर्नाथ तानेतान्स्वभावारिर्जयेदिति ।
तच्छ्रुत्वा वणिगित्याह धीमतामीश मास्तु भीः ।। ३३ ।।

हनिष्याम्यसिनानेन पश्यतः स्वांश्च बान्धवान् ।

वैश्य उवाच -

न स्थीयतां मम पुरो गम्यतां जीवितेप्सुभिः ।। ३४ ।।

नोचेन्मत्खड्गकृत्ताङ्गाः सहसा लुठत क्षितौ ।
तच्छ्रुत्वाऽऽहुश्च ते मूढ स्वकलङ्कं न वीक्षसे ।। ३५ ।।

द्विजाय दत्वा पत्नीं स्वां किं दर्शयसि पाटवम् ।
वयं सह विनश्यामो नैनां दातुं सहामहे ।। ३६ ।।

इत्युक्तश्च स्वभावारिस्तानभाषत रोषतः ।

वणिक् (उवाच)-

विभिद्याङ्गानि वो विप्रं नयाम्येनं सुखाध्वना ।। ३७ ।।

इति प्राह स्वभावारिर्धीरोदात्तः स बान्धवान् ।
दुर्वृत्तेनामुना किं न इति ते परिहृत्य तम् ।। ३८ ।।

प्रियासहायं तं विप्रं रुरुधुश्चुक्रुधुस्तदा ।
स्वभावारिस्ततो बन्धून् मुनिं तं शिवभावितः ।। ३९ ।।

चरन्मण्डलमार्गेण कृत्वा तान्निशितायुधान् ।
स ताननेकानेकः सन् निघ्नन् दिक्षु विजृम्भितान् ।। ४० ।।

व्याघ्रवद्द्विजहाराजौ मृगानिव रिपुव्रजे ।
केचित्कृत्तपदाः पेतुः केचिद्विच्छिन्नबाहवः ।। ४१ ।।

केचिन्निकृत्तशिरसः केचित्खण्डितमध्यमाः ।
दलितान्तरनिष्ठान्तास्ते सान्द्रं निःसृतासृजः ।। ४२ ।।

अन्ये निर्भिन्नसर्वाङ्गा निपेतुरवनीतले ।
स्वभावारिहतानां तु पतितानां रणाजिरे ।। ४३ ।।

तेषामुपरि वीराणां निपेतुर्गृध्रसञ्चयाः ।
ये ये युद्धाय सन्नद्धास्ते ते तेन हतास्तदा ।। ४४ ।।

ये ये समरविभ्रष्टा अमरैर्हसितास्तदा ।
दुद्रुवुदर्दुराकारा दिक्षु त्रस्ता मृगा इव ।। ४५ ।।

हतेषु तेषु वीरषु विद्रुतेष्वपरेषु च ।
स चैकवीरः सम्प्राह तं द्विजं तापसं मुदा ।। ४६ ।।

भगवन् याहि मा भैषीरनुगच्छामि ते पदम् ।
इति सोऽनुगतं बुद्ध्वा तं यान्तं मुनिमन्वगात् ।। ४७ ।।

ब्राह्माच्युताज्ञातमूर्तिरनुयातो विशामुना ।
स विप्रतापसः शम्भुर्धाम छायावनं ययौ ।। ४८ ।।

तत्प्रविश्य प्रियायुक्तश्चन्द्रमौलिर्द्विजाकृतिः ।
क्षेममस्ति परं मे त्वं निवर्तस्वेत्यशाद्धि तम् ।। ४९ ।।

स तं प्रणम्य स्तुत्वा च अपश्यन् प्रययाविति ।
स्वभावारिर्भक्तमुख्य शिवे द्रविणदानतः ।। ५० ।।

शुद्धात्मा दुष्करा(कृता)न् हन्तुं बहिःस्थास्थास्येतिचाब्रवीत् ।
समायाहीति देवेन प्रेरितोऽपि मुहुर्मुहुः ।। ५१ ।।

हताः किं पुनरायान्ति याहि वैश्येत्युवाच सः ।
व्याहरन्नेव हस्तात्तश्रृङ्गधाम्नाऽस्मिनाभ्रमन् ।। ५२ ।।

आजगाम स्फुरद्घोषो वितन्वन्मण्डलभ्रमीः ।
ततस्तिरोहिते मायाविप्रे पश्यन् मृगीदृशम् ।। ५३ ।।

एकाकिनीं दृशौ दिक्षु विदिक्षु च विचालयन् ।
ददर्श गगने देव्या समं वृषभवाहनम् ।। ५४ ।।

कैलास शिखरारूढं चन्द्रबिम्बश्रियं हरम् ।
करुणालहरीरेखातरङ्गित दृगञ्चलम् ।। ५५ ।।

सुमनः परिषद्वृष्ट सुमनोवर्षमौलिकम् ।
अनंसीदथचास्तौषीत्सवैश्यो वश्यवाग्धरम् ।। ५६ ।।

गङ्गाचन्द्रकलासदुल्लसझरीसारस्फुरन्मौलि ते
कण्ठं ते शितिकण्ठ कुण्ठितगर श्रीनीलकण्ठाधुना ।
वह्नीन्द्वर्कभवाक्षकोणजकृपापाङ्गोल्लसत्ते मुखं
पादाब्जं सुरमौलिजालमणियुक्कान्तं भजे शङ्करम् ।। ५७

मच्चित्तभ्रमरः सदाशिव तवोदाराब्जमासीदतु ।। ५८ ।।

स्तुत्वेत्थं स प्रणम्यासौ भार्यया शशिशेखरम् ।
. . . . अन्वरंस्त सः ।। ५९ ।।

सन्तुष्टः प्रययौ शम्भुस्तं स्वभावरिपुं ततः ।
स कैलासं निजं धाम सकुटुम्बं निनाय सः ।। ६० ।।

देवेषु पुष्पाणि किरत्सु मोदात्
वदत्सु पाहीति विमानगेषु ।
तस्मिन्पदं शम्भुपदं तदीयं
शस्त्राहताश्चापुरमर्त्यलोकम् ।। ६१ ।।

।। इति श्रीशिवरहस्ये नवमांशे वैश्यप्रसादो नाम सप्तविंशोऽध्यायः ।।

।। अष्टाविंशोऽध्यायः ।।

स्कन्द उवाच -

इलानन्दाख्यभक्तस्य चरितं कथयामि ते ।
चिदम्बरसभानृत्यदेवः श्रीचन्द्रशेखरः ।। १ ।।

शिवभक्तजनस्तोत्रभूमधारिदिगन्तरः ।
चतुर्थजातितादृक्षपचेलिमतपः फलम् ।। २ ।।

कनिष्ठकुटिवास्तव्यः शान्तिदान्तिविभूषणः ।
भस्मरुद्राक्षपूतात्मा अनङ्गारिदार्चकः ।। ३ ।।

यः सदा शम्भुभक्तानां सन्तोषं कलयंस्थितः ।
असङ्ख्यैश्च हलैः कुर्वन्सातत्येन कृषिक्रियाम् ।। ४ ।।

अनन्यजनसामान्यां सम्पदं प्राप्य सर्वदा ।
क्षुधितेभ्यो दिशन्नन्नमनिवारितमञ्जसा ।। ५ ।।

प्राणिनस्तोषयामास सर्वभूतदयापरः ।
विशिष्य भगवद्भक्तान्भस्मोद्धूलितविग्रहान् ।। ६ ।।

रुद्राक्षमालाभरणानभ्युपेत्य प्रणम्य च ।
विधाय कुशलप्रश्नं नीत्वा च भवनान्तरम् ।। ७ ।।

पादौ प्रक्षाल्य विधिवत् भोजयामास वाञ्छितम् ।
एवं प्रतिदिनं शम्भोः किङ्करेषु विधाय च ।। ८ ।।

हर्षोत्कर्ष प्रकर्षेण तस्मिन् धनदसम्पदि ।
सम्पदीव दरिद्रत्वे तस्य निष्ठामचञ्चलाम् ।। ९ ।।

देवो दर्शयितुं तस्य विततान दरिद्रताम् ।
असङ्कोचितचेतस्कः स सङ्कोचेऽपि सम्पदः ।। १० ।।

विक्रीय प्राक्तनं द्रव्यं भूषणादीनि चान्ततः ।
पूर्वाधिकतया शम्भोर्भक्तभक्तप्रदानतः ।। ११ ।।

विन्यस्य भारं नृत्तेशे न दुर्गतिमजीगणत् ।
तृणाय मन्य दौर्गत्यमिवाराधनतत्परै ।। १२ ।।

प्रकाशयितुमेतास्मिन्नन्नदानव्रतं हरः ।
हरिब्रह्मापरिच्छेद्यो विधाय वृषभं स्वयम् ।। १३ ।।

स्वीचक्रेभूमिकां काञ्चित् तपस्विजनमुद्रिकाम् ।
कुहनातापसश्चञ्चत्तडित्पिञ्जरिताम्बरे ।। १४ ।।

दम्भोळिजृम्भितोदञ्चत्स्वनस्फूर्जद्दिगन्तरे ।
निशीथसमये मेघविगलद्वारिसङ्कुले ।। १५ ।।

सुप्तभुक्ताखिलजने[1] भस्मदिग्धस्त्रिपुण्ड्रवान् ।
प्राप भक्तस्य तद्गेहं[2] क्षुधार्त इव भावयन् ।। १६ ।।

शम्भुः (उवाच)

गृहेश शम्भुभक्तोऽहं क्षुधार्तोऽस्मीत्युवाच तम् ।
तच्छ्रुत्वा स समुद्घाट्य गृही च निरगाद्गृहात् ।। १७ ।।

वर्षधाराविलामर्षकम्पमानाङ्गमेव तम् ।
नीत्वा गृहान्तः शीतार्तिं शमयित्वाऽनलार्चिषा ।। १८ ।।

---

1. भुक्तसुप्ताखिलजने । 2. भवनम् ।

भक्तः प्राह निजां भार्यामुपोष्याप्यहमोदनैः ।
शिवभक्तान्प्रीणयामीत्येव संविन्मया कृता ।। १९ ।।

तत्कथं परितृप्तः स्याद्रात्रौ वर्षः समागतः ।
इत्युक्ता सा तथा भर्त्रा शिवाऽकल्याब्रवीत्पतिम् ।। २० ।।

गृहे किञ्चिन्न पश्यामि न वेलेयं हि याचने ।
प्रदद्युः प्रतिवेशमस्था अनुवेलं करोमि किम् ।। २१ ।।

दिनादावधिकेदारमुप्तं बीजसमुच्चयम् ।
समूह्यादाय गच्छावो नान्यत्कर्तव्यमस्ति वै ।। २२

तदन्नं परिकल्प्याथ क्षुधार्तिं शमयातिथेः ।
विनोपायमिमं नान्यदिति तत्प्रेरितः प्रियः ।। २३ ।।

ममादिसम्पत्सुलभा भवतीत्यनुमान्य ताम् ।
स वर्षधाराभिहतः कलमक्षेत्रमभ्यगात् ।। २४ ।।

काले नीलघनच्छन्ने तमोव्याप्तदिगन्तरे ।
पद्भ्यामन्विष्य पदवीं तिमिरान्धीकृतेक्षणः ।। २५ ।।

मध्ये मध्ये स्फुरद्विद्युत्प्रभादर्शितपद्धति ।
विदारितश्रुतिपथो गम्भीराम्भोदगर्जितैः ।। २६ ।।

पयः पिटक[1]सञ्छन्नमस्तकः सुप्तपक्षिकम् ।
प्राप्यकेदारमुत्सार्य सलिलं बीजसञ्चयम् ।। २७ ।।

समाहृत्य तदादाय प्रविश्य (विवेश) भवनं प्रिया ।
प्रक्षाल्यपङ्कं काष्ठानि न सन्तीत्याह तं पतिम् ।। २८ ।।

---

1. पिटक - a basket made of coconut leaves or bambo.

भित्वा स गेहपटलं भित्वा दारूण्यथाययौ ।
आदाय स्म तदा चुल्यां दीपयामास पावकम् ।। २९ ।।

सयवाङ्कुरजातं तत्तप्ते भाण्डे निधाय च ।
विशोष्य मुसलाघातं चक्रे सा शुभ्रतण्डुलम् ।। ३० ।।

भक्तेशं पतिमित्याह व्यञ्जनं नास्ति किञ्चन ।।
ततः सोऽपि क्षुधार्तोऽयं भक्त इत्याकुलीभवन् ।। ३१ ।।

निर्गत्य निष्कुटं[1] प्राप्य भक्तः पूर्णफलान्यपि ।
स स्वपाशानिवोन्मुच्य शाकान्यादायचागमत् ।। ३२ ।।

नानाविधानि तान्येव व्यञ्जनानि व्यधत सा ।
अन्नं सम्पन्नमिति सा प्रीणयेत्याह चातिथिम् ।। ३३ ।।

सम्प्रीतचेतास्तं बोद्धुमशक्यं निजबोधतः ।
शनैः शनैर्बोधयितुमुद्यतः प्रणयोक्तिभिः ।। ३४ ।।

कृषिवलः (उवाच) -

उत्तिष्ठ नाथ मद्दुःखमोचनार्थं त्वमागतः ।
पूजां गृहाण वेलेयमत्येतीत्यब्रवीच्च सः ।। ३५ ।।

भास्वत्तेजो दिशश्चैव द्योतयन्तीं दिशं च सः ।। ३६ ।।

विस्मितोऽभूत्तदालोक्य दम्पती विस्मयाकुलौ ।
ब्रह्मादिभिर्मृग्यमाणस्तत्र ज्योतिर्मयः शिवः ।। ३७ ।।

---

1. निष्कुटं - Field

उमासखो वृषारूढो विस्मितौ प्राहदम्पती ।

ईश्वरः (उवाच)-

मद्भक्त मम पूजां त्वमेवं कृत्वा स्थिरो भव ।। ३८ ।।

मुख्यत्वं शिवभक्तानां प्राप्तवानसि शाश्वतम् ।
एतया सह पत्न्या त्वं मम कैलासपर्वते ।। ३९ ।।

धनेशादधिकां भुङ्क्ष्व शिवदत्तां श्रियं स्थिराम् ।
ततः शिव शिवेत्युच्चैर्वदन् जय जयेति च ।। ४० ।।

प्रहृष्टात्मा स भक्तस्तं तुष्टावाभिप्रणम्य च ।। ४१ ।।

कृषीवलः उवाच -

भो भर्ग शाश्वत विभो त्रिजगच्छरण्य
राकेन्दुधामवदनामलचारुमूर्ते ।
विश्वेश शाश्वत विभो शशिखण्डचूड
मामद्य पाहि करुणावरुणालयेश ।। ४२ ।।

स्कन्द उवाच -

इति संस्तुवते तस्मै देवः पत्नीयुताय च ।
दत्वा कैलासममलं तत्रैवान्तर्दधे हरः ।। ४३ ।।

सानन्दं *सकलदिवन्दितपदं नत्वाधिबृन्दारको-
ट्युद्यन्मौलिनिघृष्टपादकमलं मन्देतरानन्दकः ।
लेभेऽसौ शिवयोरपारपरमानन्दास्पदं कुन्द भा-
धिक्कारं रजताद्रिश्रृङ्गममलं ब्रह्माद्यगम्यं तदा ।।

।। इति श्रीशिवरहस्ये नवमांशे कृषीवलचरितं नाम अष्टाविंशोऽध्यायः ।।

---

* सनकादि

।। एकोनत्रिंशोऽध्यायः ।।

स्कन्द उवाच -

सत्यार्थनाथनाम्नोऽस्य भक्तस्य कथये कथाम् ।
अस्ति चेदिपतिः कश्चित् चिन्तामणिगिरिवार्थिनाम् ।। १ ।।

मराठनाथः सत्यार्थ इत्यन्वर्थपदाभिधः ।
स गोपालपुरे गोत्रमण्डलाखण्डलः प्रजाम् ।। २ ।।

जुगोप भगवद्भक्तान् भवं स्वहृदि भावयन् ।
सतामर्थं स भक्तार्थं सत्यार्थः समुपार्जयत् ।। ३ ।।

कदाचिदर्क एवोद्यत्करालकरवालकः ।
जिगाय जगतीपालो वैरिणं समराङ्गणे ।। ४ ।।

अथो तुरगमातङ्गपदातिरथपत्तिभिः ।
उपायनमिवानीय भुवोभारमिवाग्रतः ।। ५ ।।

कृपाणपरिभूतोऽस्य कृपणां वृत्तिमु(म)च्छिदत् ।
पलायत बलं हित्वा परीप्सन् प्राणमात्मनः ।। ६ ।।

निजमन्दिरमाधूय गिरिमन्दिरमासदत् ।
[1]बलामंदिमनोदंत सहिमंदस्तपस्विनाम् ।। ७ ।।

उद्वस्त पुस्तको हस्ते शिरस्तोस्त्र जटास्तरः ।
प्रशास्ति तापसः स्वास्थ्यं मास्थ्यं प्रास्तितभूपतेः ।। ९ ।।

---

1. इतः परं पद्येषु दोषा दृश्यन्ते ते च विबुधैः शोधनीयाः । यथा मातृकं लिख्यते -

तत्र दत्ताभिदः कश्चित् तरुणं द्वारि तापसम् ।
शेते नरपतिर्नेयं वेला गन्तुं तवान्तरम् ।। १० ।।

दिदृक्षुस्तानिमादेष क्षितिभृक्षाय दीक्षितः ।
विवक्षुरभवद्भिक्षुदत्तवाचमलक्षयत् ।। ११ ।।

मृगेक्षणाक्षितिभृतोभिक्षुमालक्ष्य वल्लभम् ।
अबोधय प्रबद्धः सन् तमवोचदथाञ्जसा ।। १२ ।।

नृपः उवाच -

कुलं शुद्धं गृहं पूतं प्रसन्नं मम मानसम् ।
तवागमनमाहात्म्यात्किङ्करः किं करोम्यहम् ।। १३ ।।

धनं च सम्पदं सर्वं जीवितं च ददामि ते ।
इति ब्रुवाणे सन्तुष्य परिक्षितुमिवास्य गाम् ।। १४ ।।

कोशान्निकृष्य राजानमसिं मुच्य जघान सः ।
सत्यनाथः क्षतः क्षिप्रं पपात क्षितिभृत्क्षितौ ।। १५ ।।

ततः कवाटरन्ध्रेण दृष्ट्वा तच्चेष्टितं गतः ।
कुटिलभ्रुकुटीबद्धं विकटासिपुटोद्यतम् ।। १६ ।।

तं समालोक्य सन्नद्धं त्यक्तमूर्च्छो नृपोऽवदत् ।

राजोवाच -

मैनं वधीर्मावधीषुः परे चापि यथा तथा ।। १७ ।।

शपेन्मां च सृजेदेनं त्वं दत्तेत्यादिशन्नृपः ।
ज्ञात्वा तत्कर्म तं हन्तुमागतान् व्रज शासनम् ।। १८ ।।

उद्घोष्यतां निवार्यैनं दन्तः प्रास्थापयद्वनम् ।
कृपाणपाणिस्तदतः प्रापयत्पावनं वनम् ।। १९ ।।

तपसैव प्राप्य गुह्यस्ततः शक्तिपुरं पुनः ।
पथि दत्तेन नीतस्य वञ्चकस्य तपस्विनः ।। २० ।।

अक्षतत्वं कथं न स्यादित्यमूत्सङ्कुलो नृपः ।
दत्तान्त्समागतान्सर्वं तद्वृत्तान्तं महीपतिः ।। २१ ।।

श्रोतुमिच्छन्निजप्राणान्धारयामास चात्मनि ।
स शठस्तापसः कैश्चिदक्षतो विजनं वनम् ।। २२ ।।

मायानीत इति प्राप्य दत्तो शंसन्महीपतिः ।
त्वया सौम्यं कृतं यत्ते केन वा वर्ण्यतामिदम् ।। २३ ।।

इति दत्तं द्वारपालं प्रशशंस मुहुर्मुहुः ।
आहूय पुत्रामात्यादि निजं भावं न्यवेदयत् ।। २४ ।।

विधिनाद्य कृतं मेऽद्य शिवाज्ञा केन लङ्घ्यते ।
शिवभक्तिः प्रकाश्यैषा भक्तिर्भाग्यवशाद्भवेत् ।। २५ ।।

नोपेक्षणीया सर्वेषु कालेष्वभिमतप्रदा ।
इत्यादिशन्नमस्कृत्य शिवभक्तं दयानिधिः ।। २६ ।।

आनन्दताण्डवेशाङ्घ्रिमन्तः स्वान्तमचिन्तयत् ।
ताण्डवेशस्तदा तुष्टस्तस्य भूतगणैर्वृतः ।। २७ ।।

वृषारूढस्तिल्लवननाथः शीतांशुभूषणः ।। २८

देव त्वया वसनतो नृपाग्रणीः
निजाङ्घ्रिचप्रेमपरम्परायाः ।(?)
स मुक्तिनाथाकृतिरेष नैजं
परं प्रपेदे निजधाम शम्भोः ।। २९ ।।

भक्ताङ्घ्रिनाथप्रतिपन्नसत्यं
सत्यार्थनाथात्तय चोदितस्य । (?)
परस्य शम्भोः पदमेति विप्रो(प्राः)
चरित्रमेतत्सुपठेच्छृणोति वा ।। ३० ।।

स्कन्द उवाच -

चरितं चेदिराजस्य प्रथमं प्रथितं मया ।
वीरोद्भटस्य भक्तस्य माहात्म्यमितिवर्ण्यते ।। ३१ ।।

शिवपादौ समभ्यचर्च्य लब्धो येन परश्वथः ।
स रामः क्षत्रियान्हत्वा विप्रसाद्दत्तवान् धराम् ।। ३२ ।।

वासार्थं याचमानाय तस्मै रामाय सागरः ।
केरलान्स्वार्थविजयं विषयं सम्पदां ददौ ।। ३३ ।।

मौक्तिकैः शङ्खनिर्मुक्तैर्वेणुपुण्ड्रेक्षुसम्भवैः ।
सदालङ्क्रियते तत्र तरुणीनां कुचद्वयम् ।। ३४ ।।

अरुणाद्रिरिति ग्रामः शोभते शम्भुगोचरः ।
मन्त्रसिद्धैर्युतो विप्रैः शापानुग्रहणक्षमैः ।। ३५ ।।

ग्रामे तत्रैव महिते रुद्रवंशशिखामणिः ।
अभूद्वीरभटो नाम शिवभक्तो दृढव्रतः ।। ३६ ।।

छिन्नः संसारबन्धेषु शिवाङ्घ्रिदृढभक्तिमान् ।
शिवभक्तेषु नियतं शिवमेव विभावयन् ।। ३७ ।।

स गत्वा शिवधामानि नत्वा तेषु तदीश्वरान् ।
उल्लङ्घ्य केरळान्भक्त्या चचार सरलां महीम् ।। ३८ ।।

शिवभक्तसमाचारस्थापनव्रतदीक्षितः ।
कल्याणः प्राप कल्याणं कमलालयमास्थितः ।। ३९ ।।

यस्मिन्निवसतः शम्भोश्चक्रे चन्द्रदिवाकरौ ।
रथ्या वेदा रथो भूमिर्यन्ता वेधाः शरो हरिः ।। ४० ।।

वासुकिर्ज्याधनुर्मेरुर्दिविलक्ष्यं पुरत्रयम् ।
तपस्तप्त्वा पुरा यत्र कमला हरिवल्लभा ।। ४१ ।।

परमेशप्रसादेन प्राभूदखिलसम्पदाम् ।
कृपाकटाक्षविक्षेपैः कृपाणानां विशेषतः ।। ४२ ।।

प्रणम्राणां कलयते(तः) प्रायेणाखिलसम्पदाम् ।
शङ्कराङ्घ्रिसमासक्तकिङ्कराग्रेसरो भुवि ।। ४३ ।।

कुङ्कुमाक्षोदनिकरैरङ्कितायतवक्षसम् ।
शिखाग्रविलसत्पुष्पसुखाद्यविशिखान्तरम् ।। ४४ ।।

क्वणत्किङ्किणिकानाद क्वणत्किङ्किणिभूषणम् ।
कस्तूरीतिलकामोदविस्तारिततदिगन्तरम् ।। ४५ ।।

गण्डप्रलोलरुद्राक्षमण्डलं चारुकुण्डलम् ।
आजानसिद्धगाम्भीर्यमाजानुविलसद्भुजम् ।। ४६ ।।

अवमत्य महाभक्तानुपमित्यात्मनोभुवम् ।
मन्दं मन्दं समायान्तं सुन्दरं लोकसुन्दरम् ।। ४७ ।।

हन्तुमेनं मनश्चक्रे हन्ताहन्तारमप्रियम्[1] ।
गर्भगेहं भिया शम्भोर्गर्भमातुरिवाविशत् ।। ४८ ।।

कवाटं दृढमाबध्य ललाटनयनालये ।
भक्तवाह्यं तमालक्ष्य युद्धवीरस्तमब्रवीत् ।। ४९ ।।

वीरोद्भटः (उवाच)

अविनीते यदि प्रीतिस्तव यूनि शिव द्विजे ।
भवबाह्ये महादेव भवबाह्यो महानपि ।। ५० ।।

वीरोद्भटस्य विकटां धीरोक्तिं कलयञ्छिवः ।
शरणागतमाहेमं करुणावरुणालयः ।। ५१ ।।

ईश्वर उवाच -

स्तुहि वीरोद्भट[2]मुखाञ्जहि भीतिं च सुन्दर ।
इति गर्भगिरास्तौषीद्भक्तिमत्तमशेखरः ।। ५२ ।।

---

1. अत्र पूर्वार्धस्य भावार्थेन नोत्तरार्धार्थः सङ्गतो भवति । वीरभट्स्य भावमाज्ञाय सुन्दरः शिवालयं प्रविश्य भगवतोगर्भगेहं प्राविशत् इति समन्वयः कर्तव्यो भवति ।

2. टं मुख्यं

सुन्दरः उवाच -

शम्भो शङ्करकिङ्कराः शिवपरा रुद्राक्षभस्मादरा
लिङ्गार्चासु परायणाः श्रुतिशिरः सारार्थमोदादराः ।
व्याहारेऽपि सदैव ते हरहरेतीशेति शब्दादराः
भक्तास्ते मुहुरप्यपारविभवास्ते शाङ्कराः किङ्कराः ।।

महानुभावास्तेऽप्येनां महादेवस्य किङ्कराः ।
आकर्ण्य तत्स्तुतिं प्रोचुर्भक्तानां प्रथमं तदा ।। ५४ ।।

ततो देवाश्रयं गत्वा सुन्दरो भक्तिवेष्टितः ।
शिवभक्तान्तरङ्गः सन्नवातिष्ठद्भयोज्झितः ।। ५५ ।।

एवं व्यवस्थां रचयन्धरण्यां
माहेश्वराणां महिमात्मनां सः ।
तत्सौम्यनाथोदितशम्भुभक्त
प्रबन्धहेतुर्विचचार कामम् ।। ५६ ।।

वीरोद्भटः शङ्कर किङ्करनाणा-
मग्रेसरः साहसभक्तिधुर्यः ।
अवाप्य काले भगवत्प्रसादा-
द्गणाग्रणी रूप्यमहीधरेऽभूत् ।। ५७ ।।

।। इति श्रीशिवरहस्ये नवमांशे एकोनत्रिंशोऽध्यायः ।।

।। त्रिंशोऽध्यायः ।।

स्कन्दः (उवाच) -

वक्ष्याम्यमरनीत्याख्यवणिजः शोभनां कथाम् ।। १ ।।

कावेरीलहरीमुक्तशङ्खमौक्तिकदन्तुरे ।
कल्हारकैरवोल्लासिफुल्लपद्मविराजिते ।। २ ।।

केकिकेकारवोन्मिश्रशालिकेदारमण्डिते ।
केदारवृत्तिकामुक्तपुण्ड्रेक्षून्मुक्तमौक्तिके ।। ३ ।।

बद्धकल्यातटीसेतुपद्धतीबद्धभूरुहे ।
सिक्त उद्दन्तनिर्भिन्ननारिकेल पयोभरैः ।। ४ ।।

उद्यन्नागलतारूढकदलीदलवीजिते ।
पनसाम्रवणोद्दामफलगन्धनबन्धुरे ।। ५ ।।

द्विजाग्रहारपङ्क्तीभिस्तटद्वयविराजिते ।
आ सह्याद्‍गतायाश्च कावेर्यास्तीरयोर्द्वयोः ।। ६ ।।

शिवागारवरोद्दामकुम्भस्थगितदिक्तटे ।
यत्र यत्र शिवक्षेत्रे वस्तुं संसेवितुं हरम् ।। ७ ।।

विष्णुधामशतैर्युक्ते यतिवृन्दमठैर्युते ।
सह्यजासह्यपापानि नाशयन्ती स्वपावनैः ।। ८ ।।

चल्लत्तरङ्गसङ्गोत्थपूतवातैश्च पापिनाम् ।
देवी शतमुखी तत्र प्लावयन्ती च सागरम् ।। ९ ।।

तरङ्गितशिवागारशङ्खदुन्दुभिनिःस्वनैः ।
निचोलभूते पृथ्व्यास्तु पालिते चोलमण्डले ।। १० ।।

चोलैश्च पालिते तत्र शिवकैङ्कर्यतत्परैः ।
शाम्भवैर्भस्मरुद्राक्षधारिभिः परिषेविते ।। ११ ।।

मृत्सैकतमहारत्नबाणस्फाटिकसम्भवैः ।
शिवलिङ्गार्चकैः शैवैर्बिल्वार्चनपरायणैः ।। १२ ।।

संवृतैर्विविधैः शम्भो रथोत्सवविराजिते ।
पुराणसरिदित्यस्ति कावेरीमुखसम्भवा ।। १३ ।।

तत्तीरे शम्भुरित्यस्ति पुरं भुवनभूषणम् ।
रत्नोद्दीप्तस्यन्दनौघवीथीसम्पदमास्पदम् ।। १४ ।।

तस्मिन्नमरनीत्याख्यो वैश्यवंशसमुद्भवः ।
कश्चिदासीत्सुवर्णादिनवरत्ननिधीश्वरः ।। १५ ।।

शिवमेव सदा ध्यायन् भक्तेभ्यो मुक्तिदायकः ।
कौपीनकन्थांशुकदः सम्पदां फलमन्वभूत् ।। १६ ।।

श्रीकान्ताख्यपुरे त्र्यक्षं नत्वा तत्पादसेविनाम् ।
भुक्त्यै च भक्तवर्गाणां मठं तत्र व्यधात्स वै ।। १७ ।।

स तत्र कल्पितमठे देवयात्रोत्सवे बहून् ।
अन्नाद्यैः प्रीणयन् भक्तानुवासालोकयञ्छिवम् ।। १८ ।।

जातु कान्तपुराधीशस्तं भक्तं चन्द्रशेखरः ।
पातुं कौपीनमाहात्म्याद्व्याजाद्वर्णी बभूव सः ।। १९ ।।

अलक्षितशिखाबद्धः स त्रिपुण्ड्रशिखाञ्चितः ।
स पवित्री यज्ञसूत्री ययौ कृष्णाजिनोज्ज्वलः ।। २० ।।

कौपीनोज्ज्वलमाबद्धखण्डवासकटीतटम् ।
निर्मले भक्तहृदये निक्षेप्तुं पादयोर्युगम् ।। २१ ।।

न्यस्यन् यथोचितं क्षोण्यां यातं माधात् (स्वयं क्रमात्)(?)
वर्णिनं तं जना वीक्ष्य सर्वे हृदि मुदान्विताः ।। २२ ।।

तं स्म हस्तकुशग्रन्थि कौपीनाञ्चितदण्डभृत् ।
स प्रापामरनीतिं तं महिम्नाऽऽनन्दयत् जनान् ।। २३ ।।

अदृष्टपूर्वं तं दृष्ट्वा स वणिक् ब्रह्मचारिणम् ।
लब्धं तपः फलमिति प्राणमत्प्रशशंस च ।। २४ ।।

स वर्णीत्याह तं दृष्ट्वा प्रीणयित्वान्नदानतः ।
कौपीनकन्थावस्त्राणि ददासीत्यहमागतः ।। २५ ।।

तच्छ्रुत्वा स वणिक् प्राप्य मठं पाकविदो जनान् ।
आदरेणान्नंपानादि कुर्वन्त्वस्येति चादिशत् ।। २६ ।।

भूयो वर्णिनमभ्येत्य त्वं मठेऽस्मिन्द्विजोत्तम ।
प्रसीद भोक्तुमित्येनं ययाचे साञ्जलिर्द्विजम् ।। २७ ।।

वर्णी (आह) -

धार्मिक त्वन्मठे भोक्ष्ये स्नातुं यास्ये कवेरजाम् ।
स्याद्वर्षं पथि चेद् एतत् यायात्कौपीनमार्द्रताम् ।। २८ ।।

[1]अतस्त्वन्यच्च मे भूयोऽप्यर्पयेति वणिक्करे ।
आषाढात्ततदादाय ददौ स परतः परः ।। २९ ।।

---

1. अतस्त्वं रक्ष मे भूयोऽपि ।

कौपीनस्यास्य माहात्म्यं मया वक्तुं न शक्यते ।
इदं संरक्ष्यागताय मह्यं देहीत्यशाद्वटुः ।। ३० ।।

वणिक्कौपीनमादाय न्यस्य रक्षाकरो गृहे ।
स्नातुं यातस्य च वटोरागतिं प्रत्यपालयत् ।। ३१ ।।

कौपीनं यापयित्वा तन्मायया वटुराययौ ।

वर्णी - प्राह

किं कावेर्यां जलैरार्द्रं स्वर्णद्यां वा घनोद्भवैः ।। ३२ ।।

भक्तसम्पन्नवानन्नश्चन्द्रमौलिपदस्थधीः ।(?)
आर्द्रमूर्तिं तमायान्तं प्रह्वः प्रत्युद्ययौ वटुम् ।। ३३ ।।

भृत्यप्रेमजले स्नातुकामः कौपीनतस्करः ।
भक्तस्याग्रेस्थितः प्राह कौपीनं गतमार्द्रताम् ।। ३४ ।।

आषाढवेष्टितं चैतदार्द्रं परिहृतं मया ।
परित्यक्तं त्वयि न्यस्तमानयेत्याह वर्णिराट् ।। ३५ ।।

स गृहं प्राप्य कौपीनमदृष्ट्वा दुःखितो मुहुः ।

वैश्यः उवाच -

क्वाद्य यातं केन नीतं कौपीनं मायया मम ।। ३६ ।।

अदृष्ट्वा मुहुरन्विष्यन् स वैश्यः साध्वसाकुलः ।
वटोर्मायाविनः कूटपाशे लग्नः करोतु किम् ।। ३७ ।।

पत्नीं बन्धुं सुतं प्राप्ता महती विपदित्यसौ ।
अन्यदादाय कौपीनं रम्यं निर्गत्य चाब्रवीत् ।। ३८ ।।

वैश्यः (उवाच) -

न्यस्तं गृहे ते कोपीनं न दृष्टमिदमद्भुतम् ।
गृहाण चाद्भुतं चान्यत्तन्न पश्यामि पौर्विकम् ।। ३९ ।।

शिव एव विजानाति केन वा तद्धृतं वटो ।
नवं नीतं तु कौपीनं धारयस्व सितोज्ज्वलम् ।। ४० ।।

अपराधं क्षमस्वेति प्राणमत्तं वटुं तदा ।
इत्थं तेनेरितं वाक्यं श्रुत्वा वर्ण्यब्रवीत्तदा ।। ४१ ।।

वर्णी -

मैवं वद वणिक्श्रेष्ठ कालो भूयान्हि वर्तते ।
तदेव देहि कौपीनं दत्तं मे गुरुणा पुरा ।। ४२ ।।

नीतिः साध्वी देवनीते त्वय्यद्यैव मयार्पितम् ।
महत्कौपीनमादाय गृहाणान्यत्तु तत्समम् ।। ४३ ।।

इति वक्ति भवान् रम्यकौपीनाहरणाय किम् ।
कोपीनहर्तेतिमृषा कथां प्राप्नोषि भूतले ।। ४४ ।।

अयत्नमेतद्वाणिज्यमिति वैश्य यदुच्यते ।
द्विजे क्रुद्धे परिभ्रान्तमानसः शुष्यदाननः ।। ४५ ।।

इदं तेनेरितं वाक्यं श्रुत्वा वर्ण्यब्रवीत्तदा ।
अव्यत्करोति करोमि कैङ्कर्यं कौपीनं किं करोमि ।।(?)

गावो महिष्यो रत्नानि धनानि विविधानि मे ।
ददामि वासो दारांश्च प्रणमामि पदं च ते ।। ४८ ।।

अन्तर्हृष्यन् बहिः क्रुध्यन् किं रत्नैर्मे धनादिभिः ।
कौपीनं देहि तत्साम्यं जहीत्याह विशं वटुः ।। ४९ ।।

वणिक् आह -

कौपीने नास्ति मे चौर्यं अनेकान्यंशुकानि मे ।
ददामि धनजातानि वर्णिनं प्राह सो वणिक् ।। ५० ।।

भूयः स वर्णिनं प्राह कौपीनं मुषितं हि तत् ।
कौपीनं तुलया धृत्वा कौपीनं देहि मेऽपरम् ।। ५१ ।।

इत्युक्तो वटुना वैश्यः प्रीतिमानानयत्तुलाम् ।
स्थाल्यां कौपीनमेतस्यां नीलकण्ठो निजं न्यधात् ।। ५२ ।।

सर्वाणि तस्य वस्त्राणि तस्मिन्विन्यस्य वैश्यराट् ।
कौपीनजातस्यैवैष तस्य नालमभूत्तदा[1] ।। ५३ ।।

न्यस्तं स्थाल्यांमिदं चासीदुन्नतात्पुनरुन्नतम् ।
कौपीनमस्य मायीयमिति पट्टाम्बराणि सः ।। ५४ ।।

स्वर्णादीनप्ययं न्यस्य पुनर्न्यस्यानमच्च तम् ।
तं प्राह वणिजं वर्णी धनेश वचनेन किम् ।। ५५ ।।

निधेह्यत्र धनादीनि मत्कौपीनतुला कृते ।
स स्थाल्यां निदधे स्वर्णलोहरत्नादिकं तदा ।। ५६ ।।

उदस्थात्सर्वमादाय सर्वोऽभूद्विस्मितो जनः ।
वेदसूत्रकृतस्यैतत्कौपीनस्य वणिग्धनम् ।। ५७ ।।

नालमित्यद्भुतं नैतज्जगच्च न हि तत्समम् ।
कैवल्यशेषः सम्प्राह वणिक्किञ्चिद्धनं न मे ।। ५८ ।।

---

1. कौपीनजातमेकस्य तस्य नालमभूत्तदा ।।

अतः पुत्रकलत्राभ्यामारोहामि तुलामिमाम् ।
पाशांशिछत्वा पदं नेतुं सममन्यत तं स्वकम् ।। ५९ ।।

नत्वा तमथ सोल्लासो वणिक् दारसमन्वितः ।
तुलां प्रदक्षिणीकृत्य ह्यारुरुक्षुर्जगाद सः ।। ६० ।।

वणिक् उवाच-

शिवभक्ताङ्घ्रिदास्यं नोल्लङ्घितं चेत् समास्त्वियम् ।
इति कान्तपुरेशानमुमाकान्तं प्रणम्य सः ।। ६१ ।।

आरुरोह तुलां तस्मिन्नुक्त्वा पञ्चाक्षरं मनुम् ।
तद्दास्यं तच्च कौपीनं तुलातुल्यमथोऽभवत् ।। ६२ ।।

भक्तिनिर्मलभावं तं स्तुत्वा नेमुर्जनास्तदा ।
पुष्पाणि ववृषुर्देवाः स वर्णी च तिरोदधे ।। ६३

पुष्पवर्षेतिरोभूते स च कान्तपुरेश्वरः ।
समास्थाय निजं रूपं प्रादुरासीन्नभस्तले ।। ६४ ।।

भक्तस्तुलामधिगतः सुतदारयुक्त-
स्तुष्टाव तं शिवशिवेति तदा प्रहृष्टः ।
देवोऽपि मानवदुदार तुलास्थितेन
तेन प्रियासुतयुतेन समं तिरोऽभूत् ।। ६५ ।।

अमरनीतिचरित्रमिदं शुभं
दुरितजातविनाशनकीर्तनम् ।
पठति भक्तियुतश्च श्रृणोति यः
स शिवलोकमनामयमाप्नुयात् ।। ६६ ।।

।। इति श्रीशिवरहस्ये नवमांशे त्रिंशोऽध्यायः ।।

।। एकत्रिंशोऽध्यायः ।।

स्कन्द उवाच

श्रीवीरभक्तनाथस्य चरित्रं कथयामि ते ।
व्याघ्रमर्दितहेमाद्रेरनपायः स भूभुजः ।। १ ।।

असिभिन्नाद्रिनिर्धूत कवेरीदुर्गमाध्वनः ।
पुरं गर्भपुरं नाम सम्पदामस्ति भाजनम् ।। २ ।।

यदधिष्ठानि रत्नानि भान्ति सन्दीप्तदीपवत् ।
तत्रास्ति हेमप्राकारं भक्तैः सेव्यं सुरैः स्तुतम् ।। ३ ।।

हरधामेति विख्यातं श्रीमच्छङ्करमन्दिरम् ।
तस्मिन् श्रीवीरभक्ताख्यो शिवद्विजकुलोद्भवः ।। ४ ।।

अभूच्छिवोल्लसद्भक्तिः शिवशासनवर्धनः ।
भस्मरुद्राक्षकलितत्रिपुण्ड्रावलिदीप्तिमान् ।। ५ ।।

यदा श्रीशिवभक्तानां केनवाप्यापदाभवेत्[1] ।
स सिह्मवत्तदाखण्ड्यवेतण्डान् चण्डकोपनः ।। ६ ।।

तदापि शिवकामाख्यो हरधामसु सेविता ।
मालार्पकः शिवेभक्तः पुष्पाहृतिपरोऽभवत् ।। ७ ।।

प्रातः स्नात्वा मुखं बद्धा सहसानन्दसङ्गतः ।
पुष्पाण्याहृत्य वेलेयं शिवं सेवितुमागतः ।। ८ ।।

[2]महानवस्तत्सविधे चोलेन्द्रजयकुञ्जरः ।
[3]मदधारालसद्गन्धगन्धायित दिगन्तरः ।। ९ ।।

---

1. केनवाप्यापत् आपतेत् । 2. महानासीत्तत्सविधे । 3. लद्गण्ड ।

निमज्य नद्यामायत्तः प्रसक्तपटहध्वनिः ।
घण्टाबृंह्मितफूत्कार पुष्कराकारसैचनैः ।। १० ।।

विधूताघोरणायासो विचचार स वीथिषु ।
वेगादग्रे प्रयातस्य शिवकामस्य स द्विपः ।। ११ ।।

पुष्पपेटकमध्यस्थपुष्पाण्युर्व्यामवाकिरन् ।
यत्नेन नियमेनापि यन्तृमुख्यैर्भयाकुलैः ।। १२ ।।

क्रुद्धोरु(ऽति)विततां शुण्डं कृत्वा वेतण्डराट् तदा ।
दन्ताभ्यमुल्लिखन्भूमिं मदाम्बुकृतपङ्किलाम् ।। १३ ।।

तं यान्तमक्षमः प्राप्तो वृद्धः प्रस्खलितोऽपतत् ।
भुवमास्फाल्य हस्ताभ्यां क्रोशन् शिव शिवेति च ।। १४ ।।

शिवशङ्कर मां पाहि गजराजत्वगम्बर ।। १५ ।।

चन्द्रगङ्गानद्धजटाभूषणं कुसुमोच्चयम् ।
अवाकिरदहो नागो वीरभक्तो गतः क्व नु ।। १६ ।।

तच्छ्रुत्वा वीरभद्रोऽयमागतः प्रज्वलन् रुषा ।
प्रथमः शिवभक्तानां परिपन्थिभयङ्करः ।। १७ ।।

तं शिवद्रोहिणं हत्वा मोक्ष्यामीति तदाजगौ ।
मा भैषीः शिवकामेति गर्जन् पर्जन्यवद्ययौ ।। १८ ।।

पश्यन्विकीर्णपुष्पाणि रथ्यान्तेन पथा ययौ ।
दृष्ट्वा नागेन निर्भिन्नमस्तकं धावमानकम् ।। १९ ।।

शिवकामं तदाद्राक्षीत्पाहि वीरेति वादिनम् ।
सार्चिषं परशुं बिभ्रत् अनुद्रुत्य तमैक्षत ।। २० ।।

पुरायमीशः कृत्तित्वक् नागरूपहरः किल ।
सुरैर्नियुध्यमानोऽपि खण्डशो हन्मि तं गजम् ।। २१ ।।

इति पादेन तं नागं परभागे जघान सः ।
क्रोधोद्भूताधोरणः सन् विवृतोऽभूत्स च द्विपः ।। २२ ।।

हस्तेन प्राहरच्चापि निर्गतं तं क्रुधा द्विपः ।
उत्प्लुत्य वीरो गतभीर्नागस्याभिस्थितो दृढम् ।। २३ ।।

छित्वा परश्वथेनास्य हस्तमग्रे न पातयत् ।
वेतण्डे खण्डितोच्चण्डशुण्डादण्डे पतत्यसौ ।। २४ ।।

मेरुकोदण्डहस्तोर्ध्वताण्डवं हृति भावयन् ।
द्वौ तत्स्कन्धगतौ पार्श्वचरांस्त्रीन्सायुधान्वधीत् ।। २५ ।।

यन्तृभिः पञ्चभिः सार्धं हतः साम्राज्यकुञ्जरः ।
राज्ञे न्यवेदयेत्यन्ये द्वाःस्थाः यन्तृसमीरितम् ।। २६ ।।

श्रुत्वा तेषां वचो द्वाःस्थाः प्रविश्यान्तर्भियाकुलाः ।
बद्धाञ्जलिपुटा राज्ञे यथावृत्तं न्यवेदयन् ।। २७ ।।

राजा जितारिरपि मे किमद्यैतदुपागतम् ।
अकीर्यनीतिः केनेति कृतक्रुधापलान्त्समादिशत् ।। २८ ।।

राज्ञा तेन समादिष्टा सेना तं नृपमन्वगात् ।
चतुरङ्गबलोपेता धृतनानाविधायुधा ।। २९ ।।

गम्भीरभेरीनिःसाणशङ्खकाहळनिःस्वनैः ।
हेषितैर्हयमुख्यानां गजानां बृंहितैरपि ।। ३० ।।

भटानां सिह्मनादैश्च रथनेमिस्वनैरपि ।
अधःकृताब्धिरवया सेनयानुगतस्तथा ।। ३१ ।।

अरं तुरगमारूढो जवेन पवनोपमम् ।
वीथीमवापसम्भ्रान्तो नृपो घोरैर्निरन्तरम् ।। ३२ ।।

नृपो मत्तद्विपं तत्र ददर्श निहतं भुवि ।
यन्तृभिः पञ्चभिः सार्धं पादैः स्वैरिव पर्वतम् ।। ३३ ।।

न कांश्चिदन्यान् द्विषतो नृपो भक्तमवैक्षत ।
परश्वथधरं वीरं श्वसन्तमिव पन्नगम् ।। ३४ ।।

अयं भक्तो न हन्ता स्यात्केनायं निहतो गजः ।
इति पृष्टे नृपोणाहुः हतशेषा निषादिनः ।। ३५ ।।

यन्तारः ऊचुः -

वीरेषु कः पुरः स्थातुं समर्थस्तव दन्तिनः ।
क्रुद्धेनानेन भक्तेन नागः परशुना हतः ।। ३६ ।।

तच्छ्रुत्वा धूर्जटेर्भक्ता न हि निघ्नन्त्यनागसम् ।
इति सेनां निवार्यैनां स तुरङ्गादवातरत् ।। ३७ ।।

मत्तेनानेन भक्तेन मत्तेभो निहतो मम ।
तं पृच्छामि समागम्य इति चिन्ताकुलो नृपः ।। ३८ ।।

स्कन्दः (उवाच) -

प्रणम्य तं वीरभक्तं शिवकामं शुचाकुलम् ।
उवाच प्राञ्जलिर्भक्तं चोलेन्द्रो हीन्द्रसन्निभः ।। ३९ ।।

राजा उवाच -

यन्तृभिः सह नागेन कोऽपराधः कृतोऽमुना ।
करुणां कुरु भक्तेति स भक्तस्तमुवाच ह ।। ४० ।।

वीरभक्त उवाच

शिवकामः शिवार्हाणि पुष्पपाण्याहृत्य चागतः ।
तान्यास्था (सा)द्याकिरद्दन्ती [1]दन्तैमूर्धन्ययं हतः ।। ४१ ।।

अवारयन्तो यन्तार एवमागस्कृतं नृपः ।
इमे हता इति प्रोक्तो[2]ऽत्रस्तः प्रह्वोऽब्रवीन्नृपः ।। ४२ ।।

नृपः उवाच -

वेतण्डः खण्डितो मेऽद्य हतः स्वेनैव चागसा ।
परश्वथेन भद्रेण मां निहन्तुं न युज्यते ।। ४३ ।।

मदीयेनैव खड्गेन जहि मामपराधिनम् ।
इति शोकात्कृपाणं स्वमाकृष्यास्य करे ददौ ।। ४४ ।।

अस्य भक्तिरहो भक्ते व्यतिरिक्तेति चिन्तयन् ।
सद्यो जिघांसुरात्मानं वीरभक्तोऽसिमाददे ।। ४५ ।।

गृहीतासेः पुरस्तस्य स्थित्वा नत्वा च तत्पदे ।
खड्गेनानेन हत्वा मां जहि मामपराधिनम् ।। ४६ ।।

---

1. दन्ताभ्यां - मूर्ध्न्यंयं हतः ।
2. अत्रस्तः - Quickly.

मया कृतं त्वया नागे कृतमागो महत्कृतम् ।
इति ब्रुवन्नयं राजा कथं वध्योऽसिनामुना ।। ४७ ।।

निरूद्धहस्ते भक्तेऽपि राज्ञि साहसतत्परे ।
तदा शिवाज्ञया व्योम्नि प्राह वागशरीरिणी ।। ४८ ।।

वाणी

भक्तिं दर्शयितुं भूमौ पुष्पाणि व्यकिरद्गजः ।
कृत्यं चैतत्कलानाथरेखामौलिदयाकृतम् ।। ४९ ।।

इति तावत्समुत्तस्थौ यन्तृभिः सह कुञ्जरः ।
खड्गं मुक्त्वाऽनमग्भक्तो भूपो भक्तं तमानमत् ।। ५० ।।

पुष्पाणि ववृषुर्देवाभूयोर्मूर्धनि भक्तयोः ।
भक्तचोलेन्द्रयोर्दिव्यां वाचं तां श्लाधमानकः ।। ५१ ।।

हृष्टोऽभूत् शिवकामोऽपि पुष्पसम्पूर्ण पटेकः ।
ततः सुप्तोत्थितमिव क्वणद्धण्टाकृतारवम् ।। ५२ ।।

जयद्विपं पुरस्कृत्य प्रापुराधोरणा नृपम् ।

आधोरणा ऊचुः -

इममारोह राजेन्द्र गजेन्द्रं गिरिसन्निभम् ।। ५३ ।।

स कुथास्तरणास्तीर्णं मन्मथारातिपूजकम् ।
दिष्ट्या तीर्णं च कष्टं ते साक्षात् त्र्यक्षप्रसादतः ।। ५४ ।।

इत्युक्तो वीरभद्रेण(भक्तेन) स प्रीतेनारुरोह सः ।
भक्तेनातिगभीरेण पौरुषेण कृतं बहु ।। ५५ ।।

वैभवं च निसृष्टासेः स्ववधार्थं महीपतेः ।
भक्तमाहात्म्यमेतद्वै को वा वेत्ति महीतले ।। ५६ ।।

अन्तरेण शिवं नित्यं स्वभक्ताभीष्टदायिनम् ।। ५७ ।।

स वीरभक्तः शिवकामयुक्तो
ज्ञातुं न शक्यः शिवभक्तिभूमा ।
इति ब्रुवंस्तं नृपतिं प्रशंस-
न्भूतेशकैङ्कर्यपरो बभूव ।। ५८

इति तौ शिवकामवीरभक्तौ
शिवभक्तार्तिहरौ चिरं विहृत्य ।
रजताचलसीम्नि धाम्नि शम्भोः
गणनाथप्रमथाविमावभूताम् ।। ५९ ।।

चमूभटेष्वब्धिसमारवेषु
प्रवृत्तबन्दिप्रवरस्तवेषु ।
सुखी स चोलः स्वगृहं विवेश
नटेशपादाङ्किततुङ्गमौलिः ।। ६० ।।

माहेश्वरापत्तिविमोचकस्य
श्रीवीरभक्तस्य चरित्रमेतत् ।
पठन्ति वाचा मनसा स्मरन्ति
ये ते लभन्ते पदमिन्दुमौलेः ।। ६१ ।।

।। इति श्रीशिवरहस्ये नवमांशे एकत्रिंशोऽध्यायः ।।

।। द्वात्रिंशोऽध्यायः ।।

श्रीवीरभवभक्तस्य प्रथितं कथितं मया ।
चरितं विहृताशेषदिङ्मुखं सुखदं सदा ।। १ ।।

भक्तस्यैनादिनाथस्य माहात्म्यं वर्ण्यतेऽधुना ।
विचोलभूते पृथ्व्यास्तु चोले धर्मस्य मूलके ।। २ ।।

देशेऽस्ति शबरग्रामे नाम्ना शूरवरव्रतः ।
तस्मिन्नेनादिनाथोऽभूत्स सप्ताश्वकुलोद्भवः ।। ३ ।।

नृपशास्त्रकुलाचार्यः शिवभक्ताङ्घ्रिसक्तधीः ।
स महेशार्चको नित्यं द्रव्यैः शस्त्रकलोद्भवैः ।। ४ ।।

महेश्वरस्य भक्तांश्च तोषयंश्चान्नदानतः ।
अतिशूर इति ख्यातिरभूद्धर्मस्थितस्य सा ।। ५ ।।

अवामन्यत सोऽप्यन्यान् खड्गविद्यासु गर्वितान् ।
कुलक्रमसमुत्पन्ना वृत्तिरस्यायुधश्रमे ।। ६ ।।

एनादिनाथमाचार्यं न सहे पौरुषेण सः ।
सूर्योदयसवर्णेन्दुसमस्य(श्च) जनसंवृतः ।। ७ ।।

एनादिनाथेन समं स योद्धुं धियमातनोत् ।
तद्गृहद्वारमासाद्य शार्दूलस्येव जम्बुकः ।। ८ ।।

वियाहि वीरभोज्येति सोऽति शूरः समाह्वयत् ।
साहसाङ्को बद्धचेलः स वीरः खड्गखेटभृत् ।। ९ ।।

केनाहूतोऽहमस्मीति हर्यक्ष इव निर्ययौ ।
पार्श्वस्थितेषु शिष्येषु वृतो वैचाप्तबन्धुभिः ।। १० ।।

एनादिनाथं वीरं तं शार्दूलं व्याहरद्रिपुः ।

वीरः उवाच -

ग्रामाद्बहिर्व्यूहबलमावयोर्युध्यमानयोः ।। ११ ।।

विजेतुं शस्त्रविद्यायां वृत्तिः सैषानयोरिति ।
एनादिनाथ निर्याहि शस्त्रैः शिष्यैः परीवृतः ।। १२ ।।

इति तद्वचनं श्रुत्वा शस्त्राचार्यो विनिर्ययौ ।
तदा हृष्टो रणक्षोणीं ययौ तदुभयोर्बलम् ।। १३ ।।

वीरो विख्यातविरुदः कटकादिलसत्पदः ।
सेनयोरन्तरे चेरुः खड्गरोचिर्लसत्कराः ।। १४ ।।

अनुज्ञाता नृपोणापि पौरैरीरितवैभवाः ।
धन्विनो धन्विनो जघ्नुः खड्गिनः खड्गिनो मिथः ।। १५ ।।

सशक्तयः शक्तिभृतस्तथान्ये च समाययुः ।
प्रदीप्तशक्तयस्तात्र वीरहस्तप्रसारिताः ।। १६ ।।

परस्परस्फुरज्जिह्वाः फणिराजा इवाबभुः ।
शरकृत्त शिरः पादपार्श्वजानूरुबाहवः ।। १७ ।।

उद्वान्तासृक्क्षतास्तत्र पेतुर्वीरा रणाजिरे ।
नौकासम्प्लवने यावत्तावत् सस्त्रुर्वसापगाः ।। १८ ।।

पिशाचभूतवेताला राक्षसास्ताण्डवं व्यधुः ।
भक्षयन्तः पलालानां पिण्डानि विकटाननाः ।। १९ ।।

द्वौ खड्गिकौ मिथो युक्तौ तयोर्येनासिना कृतः ।
अनूरुः स पतंस्तस्मै चिक्षेपासिमुभो हतौ ।। २० ।।

आकण्ठक्षिप्तकुन्ताग्रेणैतौ विगतजीवितौ ।
शैर्यं मिथो मानयष्ट्या द्वौ विमानाविव स्थितौ ।। २१ ।।

हतवीरारुणाक्ष्यूर्ध्वबलाका ध्वाङ्क्षमण्डलाः ।
लोहकारानलगुहाङ्गारधूमनिभा बहु ।। २२ ।।

एनादिवीरशार्दूलो वमद्वह्निकृपाणकः ।
चिच्छेद हतशेषाणां पादपार्श्वशिरोभुजान् ।। २३ ।।

शूरमेनादिनाथं तं भूतनाथपदार्चकम् ।
स वीरः सोऽत्यगात्तत्र हतशेषबलान्वितम् ।। २४ ।।

धूतासिरोचिश्छिन्नाङ्गो यावदन्तो विशत्यरिः ।
एनादिस्तावदात्मामुन्मोच्यारिः पलायत ।। २५ ।।

अरिः शूरो जितः क्लेशाच्छयानो निशि भूतले ।
जाग्रद्व्यचिन्तयच्छत्रुं कुहनाया निहन्म्यहम् ।। २६ ।।

स दूतं प्राहिणोत्तस्मै प्रभाते युद्धमस्तु नौ ।
उभयोः किं वृथैवान्यैर्हन्यमानैर्जनैरिति ।। २७ ।।

एनादिनाथस्तच्छ्रुत्वा तथास्त्वित्यपरेऽहनि ।
खड्गखेटधरः प्राप स्वैरज्ञातो रणक्षितिम् ।। २८ ।।

श्रीभस्मफालमेनादिर्नहन्तीति विचिन्तयन् ।
श्रीभस्मभाग्यदूरोऽपि भस्म फाले दधौ तदा ।। २९ ।।

मालिन्यं मनसा बिभ्रत्खड्गखेटधरो रिपुः ।
वीरस्थानमगात्पुण्यं यत्र एनादिरास्थितः ।। ३० ।।

लघुकोऽयमिति स्मृत्वा वीरसिद्धे स्थिते रिपुः ।
खेटच्छन्नालिकः प्राप रन्ध्रान्वेषी तदन्तिकम् ।। ३१ ।।

महोक्षवन्निरुध्यैवं केसरीव रिपौ ललन् ।
एनादिः पार्श्वगे खेटे तस्यापश्यत् त्रिपुण्ड्रकम् ।। ३२ ।।

हन्त हन्त रिपोः फाले भस्मापूर्वं निरीक्ष्य सः ।
शिवभक्तो न वध्योऽयं यथाकामं करोतु मे ।। ३३ ।।

निरायुधवधात्पापं मास्त्वस्येति धृतायुधः ।
अजिघांसुस्तत्र रिपुं तस्थौ भक्तप्रभाववित् ।। ३४ ।।

तथा स्थितस्य भक्तस्य भावं जानन्नथाप्यरिः ।
चक्रे स पातकी हन्तुं निजं पूर्णफलं मतम् ।। ३५ ।।

अथैतच्छिवभक्तं तं रक्षितुं तं च शङ्करः ।
भस्मफालं च तं वीरं रक्षितुं स्वयमाययौ ।। ३६ ।।

उभयोर्युध्यतोर्मध्ये हस्ताभ्यां वारयंस्थितः ।
गङ्गातुङ्गजटाजूटः श्रीकण्ठः प्रत्यदृश्यत ।। ३७ ।।

खड्गेन शत्रोर्भवपाशबन्धा-
नुन्मोच्य सामीप्यपदं च तस्मै ।
दत्वा शिवो हेमसभां विवेश
ताभ्यां स्तुतो वै दृढभक्तिभावतः ।। ३८ ।।

लोकाधिनाथस्य पदाब्जभक्ते-
रेनादिनाथस्य चरित्रमेतत् ।
भक्त्या पठेद्यः श्रृणुयाच्च नित्यं
शम्भोः पदं शाश्वतमाप्नुयात्सः ।। ३९ ।।

।। इति श्रीशिवरहस्ये नवमांशे एनादिनाथचरिते द्वात्रिंशोऽध्यायः ।।

।। त्रयस्त्रिंशोऽध्यायः ।।

स्कन्द उवाच-

भिल्लेनभल्लहस्तेन कालहस्तीश्वरार्चनात् ।
प्राप्तं परं पदं पुण्यं तत्ते वक्ष्यामि सादरम् ।। १ ।।

तत्र श्रीपर्वते वासी भिल्लो [1]नल्वप्रमाणवान् ।
अस्ति गोधापुरं तत्र स्थलं वटविभूषितम् ।। २ ।।

वेणुसम्भूतमुक्तौघमिलन्निर्झरवेष्टितम् ।
शाखाशकलिताम्रौघकपित्थालम्बिवागुरम् ।। ३ ।।

चत्वरप्रान्तविस्तार शिलाशुष्यत्प्रियङ्गुवत् ।
दृप्ताःकृष्णमृगव्याघ्रसिह्मदन्ति किशोरकाः ।। ४ ।।

वर्धिता व्याधशिशुभिरुल्लसन्ति यदङ्गणे ।
यत्र व्याधकुमारीभिश्चमरीहरिणीगणाः ।। ५ ।।

कौतुकेनोपलाल्यन्ते शिखिनः शारिकाः शुक्राः ।
यत्र प्रतिकिरन्तोऽद्य द्विरदा हरिगर्जिताः ।। ६ ।।

प्रादुर्भवन्ति छिन्दन्ति भिन्दन्ति गिरिमुद्भटाः ।
वेणुडिण्डिमश्रृङ्गाणामुच्चलन्ति स्वनाः सदा ।। ७ ।।

यत्रोच्चगिरिश्रृङ्गाणां निर्झराणामथार्भटीः ।
यत्र क्वचन नागानां कुलं मुदिरवत्स्थितम् ।। ८ ।।

तत्रोज्झित क्षमाप्रेमनयानां मांसभोजिनाम् ।
अधर्माणां पुलिन्दानामधिपो नाग इत्यभूत् ।। ९ ।।

---

1. नल्व प्रमाणवान् - 6 feet and above.

वेणुमुक्तामयं हारं यत्स्त्रीणां स्तनमण्डले ।
समीक्ष्य लज्जयेवासीत् वलयं नागदन्तजम् ।। १० ।।

जन्मान्तरेऽपि तप्त्वापि तयोर्व्याधकुलोद्भवः ।
क्रूरो विक्रमदर्पाभ्यां सिह्मवद्धन्विनां वरः ।। ११ ।।

व्याधस्य कुलसम्भूता नाम्ना दन्तेति कन्यका ।
मृगादनस्य व्याघ्रीव तस्यासीद् गृहमेधिनी ।। १२ ।।

शार्दूलनखसुप्रोतगुञ्जाफलकृतस्रजा ।
बर्हिबर्हावलीनद्ध तमालदलचिल्लिफा ।। १३ ।।

सप्तच्छदाच्छच्छदनैच्छादिताच्छाङ्गिका तदा ।
अनपत्येत्युच्यमाना लोकैः सा दुःखिताऽभवत् ।। १४ ।।

विषण्णां तां प्रियां वीक्ष्य देवं नित्यमसेवत ।
मयूरकुक्कुटोन्मत्तनीयमानाङ्कतोरणाम् ।। १५ ।।

घण्टां बद्ध्वा सह स्त्रीभिर्देवं भेजेऽथ तन्मनाः ।
दन्तापि दत्वा मांसानि सर्वेषां भोजनाय हि ।। १६ ।।

स्नात्वा निर्झरतोयेषु निर्जरादधिकाभवत् ।
तत्र सापि चिरं देवं कार्तिकेयमतोषयत् ।। १७ ।।

बर्हिवाहस्य भिन्नाद्रेः पुत्रस्य पुरवैरिणः ।
विषादस्य[1] निषादैक पचेलिमतपः फलम् ।। १८ ।।

श्रीदेव्याश्च प्रसादेन निषादकुलभूषणम् ।
दधौ गुणान्वितं गर्भं सा नैषादी विषादहृत् ।। १९

---

1. विषादस्य हालाहलविषाशिनः परमेश्वरस्य ।

शुभर्क्षे सूतिकागेहे ऋक्षराजद्युतिं सुतम् ।
असूत तनयं दन्ता चन्द्रलेखेन वारिधेः[1] ।। २० ।।

व्याधोऽपि विव्यधे दुःखमृगं हर्षशरैस्तदा ।
देवाः सुमानि ववृषुर्दिवि भेर्योऽपि दध्वनुः ।। २१ ।।

स बालकोऽम्बुदश्यामः करिदन्तोत्थमौक्तिकैः ।
सुविद्युन्मेघमध्यस्था यथा भाति तथा वभौ ।। २२ ।।

उत्सङ्गे शुशुभे बालः शृङ्गे नीलगिरेरिव ।
स तदा बन्धुभिः सार्धं हिंस्रान्व्याघ्रनमूमुचत् ।। २३ ।।

विशसंश्च तदा [2]न्यङ्कुं पललाशोऽमितोत्सवः ।
चक्रे तं वक्रितमतिर्नीलं नाम्ना तदा मुदा ।। २४ ।।

व्याघ्रसिंह्मनखैस्तस्य भूषणैर्दन्तिनां रदैः ।
आकल्पं समकल्पन्त बान्धवा भोजनोत्सवाः ।। २५ ।।

गुञ्जामणिमयं हारं स्वकण्ठादवमुच्य सः ।
तत्कण्ठे कलकण्ठीनां गानेनाधत्तवान् शिशोः ।। २६ ।।

तत्रोत्सवे व्याधपतिः प्रसाद्य कुलदेवताः ।
भिल्लानुल्लासयामास सँल्लापैर्भोजनादिभिः ।। २७

स बालो ववृधे तत्र प्रावृट्कालघनो यथा ।
जानुभ्यां सञ्चरन् बालो धरित्र्यां सञ्चरंस्तदा ।। २८ ।।

ललाटे कोलदंष्ट्राभगजदन्तोरुभूषणम् ।
शूलालिखण्डितप्रोतकाकपाक्षधराङ्कितः ।। २९ ।।

---

1. शुभर्क्षे सूतिकागेहे चन्द्रसदृशद्युतिं सुतम् ।
असूत तनयं दन्ता चन्द्रलेखामिवाम्बुधिः ।।

2. न्यङ्कुं - A species of antelope.

दन्तिदन्ताङ्घ्रिकटको गुञ्जामुञ्जामणीसरः ।
पान्थाहरणलब्धैश्च लुब्धको भूषणैः शिशुम् ।। ३० ।।

सुकुमारः किरातानां कुमारैस्तनयः समैः ।
चिक्रीड क्रोडबालैश्च श्वभिः कुक्कुटमर्कटैः ।। ३१ ।।

नाल्पकेलीविशेषेण धूलीपालीषु बालकः ।
दृष्ट्वा कुमारं माराभं घनवत्पीवराकृतिम् ।। ३२ ।।

उदघोषयत् पटहैः कुमारो ग्राह्यते धनुः ।
श्रुत्वोदन्तं व्याधसूनोर्धनुग्रहणमङ्गलम् ।। ३३ ।।

व्याधाः समाययुर्हृष्टाः पुष्टाङ्गा विवृताननाः ।
चापानि मधुमूलानि शरान् पक्षविभूषितान् ।। ३४ ।।

सिरासमुद्भा ज्याश्च मधुमूलफलानि च ।
खेटकांश्च तथा पाशान् आखेटकबलानि च ।। ३५ ।।

शुनश्चोपायनं तस्य लशुनं पिशुना हि ते ।
समाजह्रुश्च ते तच्च भिल्लास्ते भल्लपाणयः ।। ३६ ।।

[1]प्रियङ्गुचूर्णं पूर्णं तु सकपित्थं मधुप्लुतम् ।
विशालैः कदलीपत्रैराबध्यैव विनिर्ययुः ।। ३७ ।।

व्याधाधिपं प्रणम्यैनं कुमारमभिनन्द्य च ।
सर्वे ते शबला भुक्त्वा शाबरं पललं तथा ।। ३८ ।।

तृणाय मेनिरे तृप्ता सुरानपि सुधाशनान् ।
परिवार्याचार्यधृतं चापं क्ष्वेलितनिःस्वनैः ।। ३९ ।।

---

1. प्रियंगु - Saffron

श्रृङ्गकाहलशङ्खोत्थैर्भेरीणां भीषणारवैः ।
वराहगजसिह्मानां मृगाणां त्रासदायकैः ।। ४० ।।

आपूरितदिगन्तास्ते वेदीं चक्रुः प्रदक्षिणाम् ।
पार्वतीयाः पर्वतेन्द्रे मृगेन्द्रसमविक्रमाः ।। ४१ ।।

करतालोत्तरं नृत्तं नार्यो बालाश्च चक्रिरे ।
देवतावेशविवशा ननृतुस्तत्र कन्यकाः ।। ४२ ।।

गतेषु तेष्वहस्स्वेवं सप्तमे दिनयौवने ।
नदत्सु तूर्येष्वाचार्यस्तं बालैः[1] ग्राह्यद्धनुः ।। ४३ ।।

अद्रेस्तटे तं दृष्ट्वैव विद्रवन्ति मृगाण्डजाः ।
गुरुप्रशाधितो धीमांश्चापविद्यामशिक्षत ।। ४४ ।।

लक्ष्येऽप्यलक्षहृदयः [2]सव्यः सव्ये[3] बभूव ह ।
अन्येष्वप्यायुधेष्वेवं प्रागल्भ्यं प्राप्तवान् परम् ।। ४५ ।।

विशेषेण समुल्लासिसौन्दर्यं लभते स्म सः ।
नीलो नीलाम्बुदाकारो मातापित्रोर्मुदं व्यधात् ।। ४६ ।।

वार्धकं स्वतनौ दृष्ट्वा शबरेशः सुतं तदा ।
प्रवेष्टुं तद्वने(नं) घोरमाखेटे खेटधारिणम् ।। ४८ ।।

शनैर्विरतमाहुस्ते शबराः शबरेश्वरम् ।

शबरा ऊचुः -

व्याघ्रसिह्मवराहेभैः शरभाद्यैर्मृगाण्डजैः ।। ४९ ।।

---

1. बालमग्राहयद्धनुः । 2. Right. 3. Left.

उद्रिक्तैर्वनामाक्रान्तं तत्प्रवेष्टुं न शक्यते ।
इत्युक्तः प्राह तान्नागो वृद्धत्वान्नालमस्म्यहम् ।। ५० ।।

आखेटकाद्यधिपत्ये युष्माभिः स्थाप्यतां घनः ।
इत्युक्तास्ते पुनः प्राहुर्गाम्भीर्यौदार्यवीर्यवान् ।। ५१ ।।

सर्वाधिपत्ये स घनस्त्वयैव स्थाप्यतामिति ।
आद्योऽस्य मृगयारम्भस्तस्मात्पूज्या हि देवताः ।। ५२ ।।

मन्त्राण्य(न)भ्यस्य तांस्त्वत्तो व्याघ्रेभमुखबन्धने ।
तदा देवार्चनकरीमाह्वयन्ति वनेचराः ।। ५३ ।।

शबरः (उवाच) -

भद्रे चागम्यतामस्य स्वस्तये देवपूजने ।
इत्युक्ता साऽभ्यगात्तत्र आगोमूर्तिरिवापरा ।। ५४ ।।

नद्धप्रोद्यतकेशी सा कोलदंष्ट्रोरुकुण्डला ।
करालधवलोदञ्चद्दन्तावलिविराजिता ।। ५५ ।।

वैयाघ्रचर्मवसना कुक्षिलाविपयोधरा ।
पिञ्छासन्नकरोदञ्चन्निम्बपल्लवधारिणम् ।। ५६ ।।

प्रसादं धारिका दत्वा ददौ नागाय तस्थुषी ।
आशीर्भिर्वर्धयित्वा तं जरठा नागमब्रवीत् ।। ५७ ।।

जरती प्राह -

जीवामि मधुमांसादि लब्ध्वा देवार्चनोचितम् ।
तत्प्रसादोऽस्तु ते स्वामिन् किं मदाह्वानकारणम् ।। ५८

इत्युक्तः प्राह तां नाथो जरां मूर्तिमिवस्थिताम् ।

नागनाथः -

निधास्यामि निषादानामाधिपत्ये सुतं घनम् ।। ५९ ।।

मत्तोऽपि मृगयासिद्धिः स्यादेवं विजयेदरीन् ।
गन्तुराखेटके[1] नित्यमस्य दुष्टमृगाद्भयम् ।।

यथा नस्यात्तथा भद्रे मुखबन्धनमाचर ।
मधुमांसादिबलिभिस्तर्पयारण्यदेवताः ।। ६१ ।।

इत्युक्ता सा निमित्तानि शुभानि जरती तदा ।
त्वत्तोऽप्यधिक एवायं [2]भवेदित्यवदीश्च सा ।। ६२ ।।

मधुमांसफलादीनि कुक्कुटाजाविकं बहु ।
हत्वा विशस्य मांसानि पक्त्वा तण्डुलपायसैः ।। ६३ ।।

वन्यपुष्पफलस्त्रग्भिः रक्तवासोभिराव्रजत् ।
आदाय तैर्वनं प्राप अर्चितुं वनदेवताः ।। ६४ ।।

ततः स्वपुत्रमाहूय विनीतं विनतं घनम् ।
आभिमुख्येन वैयाघ्रचर्मणि स्थाप्य चाब्रवीत् ।। ६५ ।।

नागनाथ उवाच -

पुत्र मे नास्ति मृगयाकौशलं वृद्धभावतः ।
त्वं मत्तोऽप्यधिको भूत्वा किरातधिपतिर्भव ।। ६६ ।।

पाशांश्चार्ममयान्धृत्वा चापं वै सशरावरम् ।
आखेटके खेटधरः खड्गं खड्गेषु विन्यसन् ।। ६७ ।।

---

1. गच्छनः खेटके ।   2. भवेदित्यवदच्च सा ।

व्याघ्रतुल्यानिमान्पाहि नखदंष्ट्रायुधोन्नतान् ।
ललज्जिह्वोरुकर्णाक्षान्पृष्ठलग्नोरुकुक्षिकान् ।। ६८ ।।

शुनां गणानिमान्पश्य वृकव्याघ्रमृगादनान् ।
चार्म पदत्रमाबध्य आगुल्फं कण्टके व्रज ।। ६९ ।।

बद्धगोधाङ्गुलित्राणो गलान्मस्त्येषु पातय ।
मृगान् वराहान्विध्याशु शरासारैः करच्युतैः ।। ७० ।।

एभिः किरातवर्यैस्त्वमाखेटकधृतायुधः ।
इत्युक्त्वा क्षुरिकांचर्म तद्धस्ते दत्तवान् पिता ।। ७१ ।।

तं नत्वा पितुराज्ञेति ते उभे चाग्रबीद्धनः ।

नागनाथः (उवाच) -

त्वं मत्तोऽप्यधिकं रक्ष रक्ष भिल्लान् कुलोचितान् ।। ७२ ।।

मृगयार्थं समंभिल्लैरनुगच्छेत्यथार्च्य ताः ।
वनदेवीर्ययौ तत्र पुत्रेणाथ किरातकैः ।। ७३ ।।

सद्माभ्यगात्तदा नित्यं बुभुजे पललाशनम् ।
निवेदितं देवताभ्यो शुनां च पललं ददौ ।। ७४ ।।

आज्ञां गुरुस्तां प्रतिगृह्यमूर्ध्ना
प्रणम्य तं सिंह्मसमानवीर्यः ।
कृताभिषेकः स घनः किरातै-
निर्जं गृहं प्राप्य निशां निनाय ।। ७५ ।।

।। इति श्रीशिवरहस्ये नवमांशे त्रयस्त्रिंशोऽध्यायः ।।

AN APPEAL

Manuscripts on Palmleaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The Manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made availab' successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar King of Tanjore, **Rajah Serfoji,** has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous **"Sarasvati Mahal Library".** It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DISTRICT COLLECTOR AND DIRECTOR
Sarasvati Mahal Library,
Thanjavur.

சரசுவதி மகால் நூலக அச்சகம்